   quoted by Vidyānātha in his *Pratāpasudriya*, p. 7
\+ धन्वा धनुः ।

सर्वज्ञस्स्वयमी[१]षदप्यतिमहद्दोषं तु नोदीक्षते[२]

*प्रायस्सर्वमपि प्रदाय बहुधा लज्जाभरे[३] मज्जति ।

निस्सङ्गोऽपि विकस्वरो गुणगणो यत्रास्ति तत्तादृशः[४]

किं जातश्शठजिद्दुरापमहिमा क्ष्मामण्डलीमण्डनः ॥३५॥

सुन्दरश्चतुरो विद्वान्गम्भीरः करुणाकरः ।

कुलीनः कीर्तिमान्दाता जीयाच्छठरिपुस्सदा ॥३६॥

सुन्दरत्वं[५] यथा—

आस्तामनङ्गकथनं विधुनाधुना किं

पुंसां दृषत्परुष[६]मद्रवदन्तरङ्गम् ।

दृष्ट्वा यदङ्गमयमादिमपूरुषोऽपि

मग्नोऽभवच्छठरिपोर्वपुरेकदेशे ॥३७॥

---

१. M1 has वि instead of ष

२. M1, M3, My1, My2—नोदीक्षति

३. M1, M2, M3, My2—लज्जापरे

४. तत्तादृशः is suggested; all mss. read तत्रादशत्

५. M2, M2, M3 & My2 omits सुन्दुरत्वं

६. M1, M2, My1—०पुरुषं

* Cf. Parāśara's *Sriguṇaratnakośa*, 58

ऐश्वर्यमक्षरगतिं परमं पदं वा

कस्मैचिदञ्जलिभरं वहते वितीर्य ।

अस्मै न किञ्चदुचितं कृतमित्यथाम्ब

त्वं लज्जसे कथय कोऽयमुदारभावः ॥

चतुरत्वं यथा—

सच्छोमाहरणोद्यतो दिनकरो दोषापवादश्शशी
रामो भिक्षुकधर्मभृद्यदुपतिर्वंशस्य नित्यं स्वयम् ।
रन्ध्रापूरणतत्परो वकुलभृद्वाचा विधायैकया
तत्तत्कार्यविहार्ययं विजयते चातुर्यचर्या[1]विधिः ॥३८॥

बिद्वत्त्वं यथा—

यस्य स्वरूपादित्रिधाकथायां विश्रान्तिमिच्छत्यखिलोऽपि वेदः ।
तस्येशितुः[2] कारिसुतस्स्वरूपाद्याक्रामति[3] स्वानुभवानुभावैः ॥३९॥

गाम्भीर्यं यथा—

स्वेच्छोद्वर्तनकौतुकेन जलधिं पर्यङ्कयन्माधव-
स्तद्गर्भस्थितपर्वतोत्करशिरःक्लिष्ठश्शठद्वेषिणः[4] ।
चेतस्सागरशेखरान्तरगतो निद्राति भद्राकृतिः
श्रीदेवीकुचकुड्मलाग्रनिबिडस्पर्शोऽपि नो बुध्यते ॥४०॥

कारुणिकत्वं यथा—

निद्रालोर्मुरशासनस्य चरितं चिद्रत्नमन्विष्यतो[5]
बुद्ध्वा वारिमहीवनादिषु परिश्रान्त्या[6] विवर्णत्विषः ।

---

१. M_1, M_2—°चर्याविधिः ।

२. M_1—ईशितुं

३. M_1,—स्वरूपादाक्रामति

४. M_1,—द्वेषेणः ।

५. M_1, M_2, M_3, My_2 अन्वीक्षतः

६. M_1, My_2—परिक्रान्त्या; My_1, परिक्लान्त्या

उद्वेलं व्यसनं त्वसा[1]वसहनस्संसारपङ्कोद्धृतं
तत्प्रापय्य सुखोत्तरं वितनुते नाथं शठद्वेषणः[2] ।।४१।।

कुलीनत्वं यथा—

उत्कृष्टाभिजनोऽयमेव शठजिद्यस्सर्ववेदच्छटा-
*कूटस्थत्वमगाद्यदीयवचनाकारा ऋगाद्यागमाः[+] ।
[++]यद्वंश्याः किल नाथयामुनयतीशानादिविप्रोत्तमाः
भाषानाथमुखामरान्तरुदयच्छङ्काकलङ्कच्छिदः ।।४२।।

कीर्तिमत्त्वं यथा—

यदद्भुत[3]यशोभरे[4] त्रिभुवनाप्लुतिं कुर्वति[5]
स्फुरन्ति रजताचलप्रभृतयस्तरङ्गा यथा ।
उडूनि बहुबुद्बुदन्त्यपि च फेनतीन्दुर्विधे-
र्मुखानि कमलन्ति बाग्भजति नीरभीरोर्दशाम्[6] ।।४३।।

---

१. M_2—क्वसौ

२. M_2, M_3, My_1, My_2,—°द्वेषिणः

३. M_1, M_3, My_1 My_2—उदद्भुत°

४. M_1, My_2—°घरे

५. M_1, M_3, My_1, My_1—कुर्वती

६. M_1—नीरभीरुपमाम्; M_2—नीरचो···पमाम्; M_3,My_2—नीर-भीरुपमाम् ।

* Nammāḷvār is known as *Prapannajanakūṭastha.*
Cf. *Prapannāmāmṛta* (*P.A.*), *ch.* 104. *śl.* 104 *b* :
प्रपन्नजनकूटस्थः कारिसूनुर्महायशाः ।।

\+ Cf. The well-known Tamil epithet of Nammāḷvār "Vedam Tamilśeyda Māran."

++ Cf. Yāmuna's *Stotraratna*, *śl.* 5 :
माता पिता युवतयस्तनयाविभूतिस्सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य नः कुलपतेर्वकुलाभिरामं श्रीमत्तदङ्घ्रियुगलं प्रणमामि मूर्ध्ना ।।

दातृत्वं यथा —

योगीन्द्रा यदलाभतोऽनिलजलाद्याजीवभाजस्सुरा-[1]

[*]स्सत्रासावशवर्तिनश्च[2] परितो भ्राम्यन्ति सम्प्रत्यपि ।

तद्दिव्यं धनमागमाचलगुहागूढं मुकुन्दाह्वयं

भोगत्यागसमग्रमेव[3] जगतां धत्ते शठारिस्स्वयम् ॥४४॥

अयमेव शठारातिर्लोकोत्तरगुणाकरः ।

मदीयकाव्यकन्यायाः करग्रहविचक्षणः ॥४५॥

अलङ्काररसाधारा स्पृहणीयगुणोत्करा[4] ।

शुभरीतिः कृतिर्कित्यं[6] रमतां[5] शठवैरिणि ॥४६॥

* * *

अलङ्काराः पुनर्द्विविधाश्शब्दगता अर्थगताश्चेति[7] । तत्र शब्दालङ्कारापेक्षया चारुतातिशयहेतुत्वादर्थालङ्काराः[8] प्रकाश्यन्ते । तेषां मध्ये प्रधानत्वादुपमा तावन्निरुप्यते । सा च समासेन द्विविधा ।

---

१. M_1, My_1, My_2—अलाभतोनिजजलादि°

२. My_1 — °दश°

३. M_2—भोग्यत्याग°

४. M_2—°गुणोत्कराः ।

५. M_1, My_2—नित्या

६. M_2—रमता

७. My_1—अर्थीगताः

८. M_1, M_2, M_3 & My_2 add प्रथमं after °हेतुत्वात्

* Cf. *Kaṭhopaniṣad*, VI. 3 :

भयादस्याग्निस्तपति भयात्तपति सूर्यः ।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥

पूर्णा लुप्ता चेति । *उपमानोपमेयसाधारणधर्मोपमावाचकानां चतुर्णां प्रयोगे पूर्णा । उपमानं चन्द्रादि । उपमेयं मुखादि । आह्लादकरत्वादिस्साधारणधर्मः । इवादिरुपमावाचकः । एतेषामन्यतमा[१]नुपादाने लुप्ता । अत्रेदं[२] लक्षणम् ।

कविसम्मतसादृश्यं व्यङ्ग्यव्यापारमन्तरा[३] ।
द्वयोः प्रकाशते स्पष्टं यत्र तत्रोपमा मता ॥४७॥

यत्र द्वयोरुपमानोपमेययोस्सहृदयहृदया[४]ह्लादित्वेन चारुतरं सादृश्यं व्यङ्ग्यमर्यादां विना स्पष्टं प्रकाशते तत्रोपमेत्यर्थः । यथा—

कृपासौशिल्यसौलभ्यप्रमुखैरखिलैर्गुणैः ।
प्रकाशते शठद्वेषी किरणैरिव भानुमान् ॥४८॥

अत्र भानुमानुप[५]मानं, शठद्वेष्युपमेयं, प्रकाशस्साधारणधर्मः, इवशब्दः उपमावाचकः, एषां चतुर्णा[६]मप्युपादानात् पूर्णोपमा । गुणानां किरणानाञ्च बिम्बप्रतिबिम्बभावः । **स्वरूपतो भिन्नयोरप्युपमानोपमेयधर्मयोरन्योन्यसादृश्यादभिन्नयोश्शब्देन पृथगुपादानं बिम्बप्रतिबिम्बभाव इत्यालङ्कारिकाणां सिद्धान्तः । यथा वा[७]—

---

१. M_2—तेषां
२. M_1, M_2, M_3 My_2—अत्रायं लक्षणश्लोकः ।
३. M_2—°सम्मतव्यङ्ग्य व्यङ्ग्य व्यापारं···।
४. M_1 & My_2 omit हृदय
५. M_2—भानुरुपमानं
६. M_2 omits अपि
७. M_1 omits वा
* M_1 omit this and the following sentence.
** Cf. *Kuvalayānanda* (Ku. Ā.) p. 16 : वस्तुतो भिन्नयोरप्युपमानोपमेयधर्मयोः परस्परसादृश्यादभिन्नयोः पृथगुपादानं बिम्बप्रतिबिम्बभाव इत्यालङ्कारिकसमयः ।

विद्योतते[1] विधुरिवातितरां शठारि-
ज्योत्स्नाविकास इव राजति मन्दहासः ।
धारेव केसरसरप्रततिस्सुधाया[2]
विस्तारयत्यखिलदिक्प्रकरेषु लक्ष्मीम् ।।४६।।

लुप्ता त्वष्टविधा । उपमेयादीनां चतुर्णां मध्ये वाचकस्य वा, धर्मस्य वा, धर्मवाचकयोर्वा, वाचकोपमेययोर्वा, उपमानस्य वा, वाचकोमानयोर्वा, धर्मोपमानयोर्वा, धर्मोपमानवाचकानां वानुपादाने सति क्रमेण वाचकलुप्ता, धर्मलुप्ता, धर्मवाचकलुप्ता, वाचकोपमेयलुप्ता, उपमानलुप्ता, वाचकोपमानलुप्ता, धर्मोपमानलुप्ता, धर्मोपमानवाचकलुप्ता चेति । अत्रेदं लक्षणम् ।

उपमानस्य वर्ण्यस्य धर्मवाचकयोस्तथा ।
एकद्वित्र्यप्रयोगेण लुप्ता भवति साष्टधा ।।५०।।

यत्र वाचकलुप्ता यथा—

चन्द्रिकाधवलामंसे बिभ्रद्वकुलमालिकाम् ।
विधत्ते जगदानन्दं सुन्दरः कारिनन्दनः ।।५१।।

अत्र चन्द्रिका उपमानम् । धवलत्वं साधारणधर्मः । वकुलमालिका उपमेयमित्[3]येषामेवोपादानम्[4] । चन्द्रिकाधवलां[5] इत्यत्र चन्द्रिकेव धवलेत्यर्थे विवक्षिते* "उपमानानि सामान्यवचनै"रिति समासविधायकशास्त्रेण वाचकस्येवशब्दस्य लुप्तत्वाद्भवति वाचकलुप्ता ।

---

१. M_1—विप्रोतते
२. M_1—°भ्रतति:
३. M_1, M_2, M_3 & My_2 omit इति.
४. My_1 —उपादानात्
५. M_1, M_2, M_3, & My_2 omit the *anusvāra*.
* Pāṇini, II 1.55.

धर्मलुप्ता यथा—

चञ्चरीकसमकुन्तलावलिं कल्पपल्लवसदृक्तराधरम् ।
काञ्चनाम्बुरुहसन्निभाननं वन्दिषीय कुरुकापुरीश्वरम् ।।५२।।

अत्र चञ्चरीककल्पपल्लवकाञ्चनाम्बुरुहाण्युपमानानि । समादयो वाचकशब्दाः । कुन्तलाधराननान्युपमेयानि । एतेषामुपादानात् कान्त्यादिसाधारणधर्मस्याप्रयोगाद्भवति धर्मलुप्ता ।

धर्मवाचकलुप्ता यथा—

कर्पूरनिकरायन्ते कीर्तयश्शठविद्विषः ।
अतो निवर्तते तापस्तादृशो मादृशां दृशाम् ।।५३।।

अत्र कर्पूरनिकरायन्ते कीर्तय इत्यत्र कर्पूरनिकरा इवाचरन्तीत्यर्थे विवक्षिते कर्पूरनिकरकीर्त्योरुपमानोपमेययोरेव ग्रहणम्; न तु साधारणधर्मवाचिनः । क्विप्प्रत्ययस्य सर्वस्यैवशब्देन सहैव लोपा[1]द्भवत्ति धर्मवाचकलुप्ता ।

वाचकोपमेयलुप्ता यथा—

सौन्दर्येण मनोजयन्तमनघैरुद्यत्प्रभावैभवै-[2]
श्श श्वत्काञ्चनयन्तमुद्विलसनैस्तारेशायन्तं पुनः ।
गाम्भीर्येण समुद्रयन्तमसकृज्जीमूतयन्तं सता-
मौदार्येण शठद्विषं हृदि महाविद्यानवद्यं भजे ।।५४।।

अत्र[4] सौन्दर्येण[3] मनोजयन्तमित्यादौ वाचकोपमेयलोपः । सौन्दर्येणेत्यत्र विशेषणसामर्थ्यात् सौन्दर्येण स्वात्मानं मनोजमिवाचरतीत्यस्यार्थस्य

१. M_1, M_3, M_2. My_2—लोभात्
२. M_2—°प्रभावैर्भवैः
३. M_1 omits सौन्दर्येण
४. My_1 omits अत्र

प्रतीयमानतया स्वात्मन उपमेयस्य सादृश्यवाचकस्य चानुपादाना-द्वाचकोपमेयलुप्ता । एवं काञ्चनयन्तमित्यादिषु द्रष्टव्यम् ।

उपमानलुप्ता यथा—

सर्वदानुभव[1] एष मे भवेत्स्वर्गवद्वकुलमालिकाभृतः ।
निर्गलत्कुसुमसौरभाकृतेरद्भुतामृतरसैकनिर्भरः ॥५५॥

अत्र स्वर्गवदित्यत्रोपमानलोपः । स्वर्गानुभववदित्यस्यार्थस्य विवक्षित-त्वाच्छठजिदनुभवस्योपमेयस्य वाचकस्य वतिप्रत्ययस्याद्भुतामृतरसैक[2]-निर्भरत्वरूपस्य धर्मस्य चोपादानाद्भवत्युपमानलुप्ता ।

वाचकोपमानलुप्ता यथा—

चन्दनीयति दिक्कान्ताशरीरेषु निरन्तरम् ।
कीर्तिरार्तिहरोदारदृक्कान्तेर्वकुलस्रजः ॥५६॥

अत्र चन्दनीयतीत्यत्र चन्दनानुलेपनसदृशी भवतीत्यर्थं वर्णिते सति चन्दनानुलेपनस्योपमानस्योपमावाचकस्य च छप्रत्ययविधायकशास्त्रेण लोपस्य कृतत्वात्कीर्त्यार्ति[3]हरत्वरूपयोरुपमेयसाधारणधर्मयोरूपात्तत्वाद्भवति वाचकोपमानलुप्ता ।

धर्मोपमानलुप्ता यथा—

अस्मासु नित्यानुचरत्वलक्ष्मीसाम्राज्यसंस्थापनपट्टबन्धः[4] ।
पीयूषधारावदमुष्य सूरेरपाङ्गभङ्गीतरलः कटाक्षः ॥५७॥

---

१. My_1—सर्वानुभव
२. This is the emended reading
M_1, My_2—अद्भुतामृतरस्यैक°; M_2, M_3, My_2—अद्भुतरसा मृतरसैक°
३. M_1 & My_1 omit आर्ति
४ M_1, M_3, My_1 My_2—°पट्टबन्धे

अत्र पीयूषधारावदित्यत्र पीयूषधाराभिषेकसदृशो भवतीत्यस्यार्थस्य विवक्षितत्वादभिषेकरूपस्योपमानस्य साधारणधर्मस्य चानुपादानाद्वते-र्वाचकस्य कटाक्षरूपस्योपमेयस्य च ग्रहणाद्भवति धर्मोपमानलुप्ता ।

धर्मोपमानवाचकलुप्ता यथा—

शुकीयति पुनर्वाणी किंशुकीयति सम्प्रति ।
रदनांशुकजा कान्तिः कारिसूनोर्महीयसः ॥५८॥

अत्र शुककिंशुकशब्दाभ्यां वचनच्छाये विवक्षिते । तेन *शुक-किंशुकवचनच्छायारूपयोरुपमानयोरुपमावाचकस्य माधुर्यदर्शनीयत्वा-दिसाधारणधर्मस्य चानुपादाना+द्वाण्याद्युपमेयमुपात्तमिति[1] भवति[2] धर्मो पमानवाचकलुप्ता । अस्यां लुप्तोपमायामुपमानलोपरहिताश्चत्वारो भेदा उपमानलोपसहितास्तावन्तो भेदा इत्युपमा निरूपिता ।

अथा**नन्वयो** निरूप्यते ।

****उपमानोपमेयत्वकलपनं यत्र वस्तुनः ।**
एकस्यैवेष्यते तत्रानन्वयस्स्यादलङ्कृतिः ॥५९॥

यद्यप्युभयोरेवोपमानोपमेयभावान्वयानुकूल्यं तथापि स्वस्य स्वेन साधर्म्यं नान्वेतीत्यस्य[3] वर्णनात्सदृशान्तरव्यवच्छेदेन निरुपमत्वलाभ

१. M_1—वाक्याद्युपमेयं
२. M_1 & M_3 omit भवति
३. M_3, My_1—इत्यर्थस्य
* शुककिंशुकयोः इति विवक्षितम् ।
\+ वाण्याद्युपमेयस्योपात्तत्वाच्च भवति इति साधीयान् पाठः ।
** Cf. Ku. Ā., Śl. 10 a : उपमानोपमेयत्वं यदेकस्यैव वस्तुनः ।

इति निरवद्यम् । यथा[1]—

निखिलान्युपमानानि निवर्तन्ते जगत्त्रये ।
अत एव शठद्वेषी शठद्वेषीव तिष्ठति ॥६०॥

यथा वा[2]—

श्रीमानविरलकरुणासीमाभूमैकधामविज्ञानः ।
शठरिपुरुल्लसति सदा शठरिपुरिव मेदिनीवलये ॥६१॥

अत्र शठरिपुरिव शठरिपुःश्रीमानित्यभिधाने[3] श्रीमत्त्वादौ शठरिपुसदृशो नान्योऽस्तीति सदृशान्तरव्यवच्छेदलाभादेकस्यैकेन सादृश्यमसम्भवद्[4]प्यनुपमत्वे[5] पर्यवस्यतीत्येकस्यैवोपमानोपमेयत्वाभिधानाल्लक्षणसङ्गतिः । पूर्वत्र धर्मो नोक्तः । इह तु तदुपातानमिति विशेषः ।

अथो**पमेयोपमा** निरूप्यते । अत्रेदं लक्षणम्[6] ।

उपमानोपमेयत्वं पर्यायेणोच्यते द्वयोः ।
उपमेयोपमा सा स्यात्सदृशान्तरबाधिका[7] ॥६२॥

यद्यपि द्वयोर्मध्येऽन्यस्यान्यनरेणैकदा सादृश्ये वर्णिते सत्यन्यतरस्यान्यसादृश्यमर्थसिद्धं सत्[8] पर्यायेण तद्वर्णनस्य वैयर्थ्यमापादयति; तथापि पुनस्तद्[9]वर्णनं तृतीयसदृशान्तरव्यवच्छेदेन निरूपमत्वद्योतनार्थमित्यदोषः ।

---

१. M_1 omits यथा. My_1 has यथा वा.

२. M_1, M_2 M_3 & My_2 omit यथा वा.

३. M_1, M_2, M_3, My^{2}—इत्याद्यभिधाने

४. My_2—असम्भवमपि

५. M_1—असम्भवत्वे

६. M_1 omits अत्रेदं लक्षणम् ।

७. My_2 —°भाविका

८. सत् is suggested, My_1 has सति । All other mss. omit this.

९. M_2 omits तत्

यथा—

विद्या भक्तिरिवात्यर्थं भक्तिर्विद्येव पुष्कला ।
वकुलाभरणे साक्षाज्जगदाभरणाकृतौ ॥६३॥

अत्र प्रकृतयोरेवोपमानोपमेयभावः प्रकृताप्रकृतयोरप्ययमस्ति ।

यथा[१]—

***कल्पतरुरिव शठजिच्छठजिदिवोल्लसति कल्पतरुः ।**
कुसुमाकारा हारा हाराकाराणि कुसुमानि ॥६४॥

अथ **प्रतीपं** निरूप्यते[२] । प्रतीपं तावत्पञ्चविधाम् । उपमानस्योपमेयत्ववर्णनं, अवर्ण्यमुपमेयं प्रकल्प्य वर्ण्यतिरस्कारवर्णनं, वर्ण्योपमेयालाभेनावर्ण्यतिरस्कारवर्णनं, वर्ण्येन सहावर्ण्यस्य साम्यानिष्पत्तिवर्णनं, उपमेयलाभेनोपमानस्यानर्थक्य[३]वर्णनञ्चेति । तत्रेदं प्रथमप्रतीपस्य लक्षणम् ।

प्रतीपमुपमेयत्वमुपमानस्य कल्प्यते ।
वर्ण्यानुपमतासिद्ध्यै यत्र तत्राभिधीयते ॥६५॥

यथा—

सुधारसझरी[४] परा शठजिदुक्तिसाधारणी[५]
सुधांशुखलम्बते वकुलभूषणास्योपमाम् ।

---

१. M_1, M_2, M_3 & My_2 omit यथा
२. M_1, M_3, My_1, My_2—उच्यते
३. M_1 & My_2 omit क्य
४. M_2—निरी
५. M_2—साधारणा
* The metre employed in this verse is *Upagīti*. However, the first quarter has only eleven *mātrās* instead of twelve.

पराङ्कुशकचाकृतिर्भवति नीलनीलावलि-
स्सरोजमपि कारिभूचरणतुल्यताम्[1]च्छति ॥६६॥

अत्र[2] वर्ण्यस्य शठजिदुक्त्यादेरुपमेयत्वमवर्ण्यस्य सुधारसादेरूपमानत्व-मिति नियतिमतिलङ्घ्य वर्ण्यस्योपमानत्वमवर्ण्यस्योपमेयत्वमिति प्राति-लोम्येन कल्पनाद्भवति प्रतीपमन्वर्थकम्[3] ।

द्वितीयं यथा--

उपमेयं प्रकल्प्याऽ[4]न्यत्प्रकृतस्याभिमानिनः ।
वर्ण्यतेऽनादरो यत्र प्रतीपं तदपीष्यते ॥६७ ।

यथा—

तत्त्वत्रितयविवेचननिपुणेति तवाभिमानिनी वाणी ।
वि[5]द्यत एव शठारे तत्सदृशी प्राक्तनो फणितिः ॥६८॥

अत्रासदृश[6]गुणोत्कृष्टतया गर्वितस्य दिव्यवाणीरूपस्योपमेयस्य वेदरूप-मुप[7]मेयं सदृशं परिकल्प्य तिरस्कारा[8]त् द्वितीयं प्रतीपं पूर्वस्मादपि चमत्कार-शील ।

---

१. M_2—इच्छति

२. My_1—यत्र

३. M_1—अन्वङ्गम् ।; M_2—अन्वर्थश्च ।

४. M_2—असत्

५. M_1, M_3—विद्रुत; My_1—विद्युत

६. M_2, M_3, My_2—सदृश°

७. M_1—द्वेदुनिवोपमेयं

८. M_1, M_2, M_3, My_2—तिरस्कारा

तृतीयं यथा—

उपमेयस्य वर्ण्यस्य प्रतिलम्भादनादरः[१] ।

अवर्ण्यस्यापि वर्ण्येन[२] तत्प्रतीपमुदीर्यते ॥६९॥

यथा—

किं चन्द्र चङ्क्रमसि[3] गर्वभरेण चन्द्र-

कान्ताश्मविद्रवणकारणसम्भवेन ।

त्व-तुल्यमुल्लसति दिव्यवचःकदम्बं

नाथस्य मे वकुलहारमनोहरस्य ॥७०॥

अत्र शिलाविद्रावणरूपो[४]त्कृष्टगुणतया क्वचिदप्युपमानभावमसहमानस्य[५] चन्द्रस्य शठरिपुवचनरूपं वर्ण्यमुपमेयं परिकल्प्य तेन तस्य तिरस्कारा[६]-त्तृतीयं प्रतीपम् । पूर्वमवर्ण्योपमेयलाभेन वर्ण्यतिरस्कारः, अत्र तु वर्ण्योपमेय-लाभेनावर्ण्यस्य तिरस्कार इति भेदः ।

चतुर्थं यथा—

वर्ण्येन वस्तुना साकमवर्ण्यस्यापि वस्तुनः ।

वर्ण्यते यत्र सादृश्याभा[७]वस्तदपि कथ्यते ॥७१॥

---

१. M_1, M_2, M_3, My_2—प्रतिस्नाभात्

२. M_1, M_2, M_3, My_1—वर्ण्येऽपि

३. M_2, M_3—चन्द्रमसि

४. M_1, M_2, M_3, My_2—विद्रवण°

५. My_1 adds वर्ण्यस्य

६. M_1, M_2, M_3, My_2 तिरस्कारा

७. M_9—सादृश्यभावः

यथा[1]—

पयोजलविवेचनक्षमतया तिरश्चामपि
प्रकाशमयते मतिः किमिव मानुषैस्सर्वतः ।
स तावदपि लभ्यते जगति हन्त किं ब्रूमहे
मुरारिरूपमीयते मुहुरहो शठद्वेषिणा ॥७२॥

अत्र वर्ण्येन शठरिपुणा सहावर्ण्ये मुरारौ सादृश्यानिष्पत्ति कथनात् पूर्वेभ्य उत्कर्षशालि[2] चतुर्थं प्रतीपम् ।

पञ्चमं यथा—

उपमानस्य कैमर्थ्यमुपमेयस्य लाभतः ।
तत्कार्यकारिणो यत्र प्रतीपमपि तद्विदुः ॥७३॥

यथा—

कुरुकापुरिकारिजन्मनः[3] कमनीयं वपुरक्षिलक्ष्यताम् ।
यदि मे गतमाश्रितस्य किं कनकैः कल्पकशाखिभिश्च किम् ॥७४॥

अत्रोपमेयस्य वपुषस्सन्दर्शनेनोपमानकनकादिदर्शनजनितकौतूहलादिकार्यासम्भवादुपमानकैमर्थ्योक्ते[3]र्भवति पञ्चमं प्रतीपम् ।

अथ **रूपक**मभिधीयते । अत्रेदमादौ द्विविधम् । अभेदरूपकं, ताद्रूप्यरूपकञ्चेति । विषयिरूपेण विषयस्य रञ्जनं रूपकम् । अन्यरूपेण रूपवतः करणा[4]द्रूपकमित्यन्वर्थसंज्ञा । यत्स्वपदेनानुपात्तस्य विषयस्य विषयिरूपेणवर्णनं तद्विषय्यभेदपर्यवसितं सदभेदरूपकमित्युच्यते । यत्स्वपदोपात्तयोर्विषयविषयिणोर्भेद प्रतीयमान एव विषयिरूपेण विषयस्य वर्णनं तत्तदीय-

---

१. M_1 omits यथा
२. M_1, M_3, My_1, My_2—शाली
३. M_1—कारिकां; M_3—कुरिका°
४. M_1, M_2, M_3—°उक्तैः
५. M_1, M_2, M_3, My_2—रूपवत्करणात्

धर्मारोपमात्रपर्यवसितं सत्ताद्रूप्यरूपकमित्युच्यते । तद्[1]द्विविधमपि[2] प्रत्येकं विषय्यपेक्षया विषयस्याधिक्यवर्णनेन, न्यूनत्ववर्णनेन, तदुभयानुक्त्या च त्रिविधं भवति । ततश्चाधिका[3]भेदरूपकं, न्यूनाभेदरूपकं, अनुभयाभेदरूपकं, अभिकताद्रूप्यरूपकं, न्यूनताद्रूप्यरूपकं, अनुभयताद्रूप्यरूपकञ्चेति षड्विधं रूपकम् । अत्रेदं लक्षणम् ।

क्वचिद्विषय्यभेदेन रञ्जनं विषयस्य तत् ।
क्वचिद्विषयताद्रूप्यरञ्जनञ्चेति रूपकम् ॥७५॥
द्विविधं पृथगाधिक्यन्यूनत्वानुभयोक्तिभिः ।
त्रिधा विभक्तं षड्[4]भेदभिन्नं तत्पुनरुच्यते ॥७६॥

तत्रा[5]धिकाभेदरूपकं यथा—

दर्शनीयमतिशीतलं[6] महःतुञ्जमेष कलयन्विभावसुः ।
आन्तरं तिमिरभारमुद्धतं[7] व्याधुनोति जगतामनारनम् ॥७७॥

अत्र दुर्दर्शदुःसहतेजःपरित्यागपूर्वकं बाह्य[8]तमोनिवर्तनापेक्षयान्तरतिमिरषिधनं[9]नोक्त्या भास्करस्य पूर्वावस्थातः वर्णनीयवकुलभूषणावस्थायामुत्कर्षवर्णनादधिकाभेदरूपकम् ।

---

१. M_1, M_2, M_3, My_2—तद्विषयं
२. My_1 adds पुनः
३. M_1 & M_2 omit अधिक
४. My_1—तद्भेद°
५. M_1—अत्र
६. M_1, M_2, M_3—°शीतकं
७. M_2—उच्छ्रितं
८. M_1, M_2—बाह्य
९. M_1, M_2, M_3, My_2 —°तमोविधूननं

न्यूनाभेदरूपकं यथा—

मुरारिरयमुर्वराभरनिवारणैकत्वरा-
पराकृत[1]परिच्छदः परमदुर्भरानुग्रहः ।
विभाति कुरुका[2]पुरे विमलताम्रपर्णी[3]स्फुर-
त्सरोरुहचरन्मरुच्छमितमार्गजन्यश्रमः ॥७८॥

अत्र जगद्रक्षणत्वरया पत्नीपरिजनानिपरिहारोक्त्या विष्णोः । पूर्वावस्थातो न्यूनत्वप्रदर्शना[4]न्न्यूनाभेदरूपकम् । न्यूनत्ववर्णनमपि विषयस्य विषय्यभेददार्ढ्यापादकत्वाच्चमत्कारशालि ।

अनुभयाभेदरूपकं यथा—

रत्नाकरोऽयं रमणीयरूपो यत्राविरासीदमृतप्रपूरः ।
किञ्चित्तदास्वादनसम्भवेन दूरीभमन्त्यत्र जराविकाराः ॥७९॥

अत्रामृतपूराविर्भावाधारतया वर्णनीये शठजिति प्रसिद्धरत्नाकराभेदानुरञ्जनाद्रत्नाकरस्य पूर्वावस्थातो वर्णनीय[5]शठजिद्भावा वस्थायां न्यूनत्वाधिक्ययोरवर्णनाच्चानुभयाभेदरूपकम् ।

अधिकताद्रूप्यरूपकं यथा—

असावसाधारणकान्तिपूरैश्शठारितारारमणस्तनोति ।
दिवापि लोकोत्पलधारणीनामानन्दमिन्दोरतिरिक्त एव ॥८०॥

अत्र निशामात्रप्रकाशमानप्रसिद्धचन्द्राच्छठजिच्चन्द्रस्य भेदमाविष्कृत्य ततोऽप्यस्य दिवा प्रकाशनरूपाधिक्यवर्णनादधिकताद्रूप्यरूपकम् ।

---

१. M_1—परातत्वात°; My_2—°पराक्यत°
२. M_1—कुरिका°
३. M_1, My_1—°ताम्रवर्णी°
४. My_1—न्यूनत्वाप्रदर्शनात्
५. M_1—वर्णनीयं

न्यूनताद्रूप्यरूपकं यथा—

पुष्पचापविधुरोऽयमङ्गजः कारिसूनुरपरस्सुधाकरः ।
एष साम्प्रतमनत्रिनेत्रभूरक्षियुग्मरहितचरः पुरन्दरः ॥८१॥

अत्रपर इति[1] भेदे प्रतीयमान एव वर्णनीये विषये मन्मथादिताद्रूप्यमात्ररञ्जनात्कुसुमचापादिवैकल्यप्रतिपादनाच्च न्यूनताद्रूप्यरूपकम् ।

अनुभयताद्रूप्यरूपकं यथा—

नेत्रानन्दं जनयति परं सारसौरभ्यलक्ष्म्या
साक्षादाशः[2] परिमलयति प्रौढविश्राणनश्रीः ।
सूते ख्यातिं [3]शठरिपुसुरद्रुः [4]किमन्योऽस्ति कल्पो
***हन्ताहन्ता[5] यदि मधुरसाद[6]स्य सोऽप्युक्तिसिद्धः ॥८२॥**

अत्रान्यःकल्प इत्यनेन शठरितुसुरद्रुमस्य प्रसिद्धसुरद्रुमाद्भेदमाविष्कृत्य तत्कार्यकारित्वमात्रप्रतिपादनादुत्कर्षापकर्षयोखचनाच्च[7] अनुभयताद्रूप्यरूपकम् । एवं रूपकस्य षड्भेदाः निरूपिताः ।

---

१. M_1, M_2 M_3— अत्राङ्गजादि
My_2—अत्रापह्नुति°
२. M_1···साक्षदाशाः
३. M —ख्या···रिपु°
४. My_1—कं
५. My_1—मान्ताहता
६. M_2—मधुरसावस्य
७. My_1—अवर्णनात्
* यदि प्रसिद्धस्य कल्पवृक्षस्य मधुरसाद् मधुरसो मय्यस्तीति अहन्ता अहङ्कारः, हन्त आश्चर्ये (सन्तोषे), सोऽपि मधुरसः अस्य शठरिपुसुरद्रुमस्य उक्तौ सिद्धौ एवेति ।

अथ **परिणामो** निरूप्यते। +यत्रारोप्यमाणो विषयी प्रकृतकार्योपयोगित्वेन निबध्यमानः स्वतः स्वात्मना तदुपयोगित्वासम्भवात्तत्सिद्धये विषयात्मतामपेक्षते तत्र परिणाम इति निर्णयः[1] अत्रेदं लक्षणम् ।

आरोप्यमाणो विषयी विषय्यैक्यमपेक्षते ।
किञ्चित्कार्योपयोगित्वे परिणामस्स उच्यते ।।८३।।

यथा[2]—

अविद्यासन्दोहप्रचुरतिमिरान्धीकृतदिशां
दृशामेषामीषद्बहिरबहिरालोकविरहे ।
प्रभासैरान्तर्यं[3] शठमथनदृक्दीपकलिका
दिशान्ति श्रीकान्तप्रियवचरणावाप्तिसरणे:[4] ।।८४।।

अत्रारोप्यमाणदीपकलिकारूपस्य विषयिणः स्वत आविद्यक[5]तमोनिवर्तनपूर्वकं भगवच्चरणसरणिपर्यन्तप्रदर्शनरूपकार्योपयोगित्वासम्भवादतःस्वस्य तत्कार्योपयोगित्व[6]सिद्धये प्रकृतशठरिपुदृग्रूपविषयात्मना[7] परिणत्यपेक्षणाल्लक्षणसङ्गतिः। विषयिणो विषयात्मना परिणतिः परिणाम इत्यन्वर्थसंज्ञा ।

---

१. M_1, M_2, M_3, My_2—निश्चयः
२. M_1 omits यथा
३. M_1, M_3, My_2—प्रभासैकान्तर्यं
   My_1—प्रभानैरन्तर्यं
४. M_1, My_1, My_2—सरणैः
५. My_2—अविद्यकं
६. My_1—तत्कार्ययोगित्वं
७. M_2—विशेषात्मना

+ Cf. Ku. Ā, p. 20 : यत्रारोप्यमाणो विषयी किञ्चित्कार्योपयोगित्वेन निबध्यमानः स्वतस्तस्य तदुपयोगित्वासम्भवात्प्रकृतात्मन परिणतिमपेक्षते तत्र परिणामलङ्कारः ।

अथोल्लेखो निरूप्यते । स द्विविधः । एकस्यानेकैरनेकधोल्लेखनरूपः, एकस्य एकेनैवानेकधोल्लेखनरूपश्चेति । द्वयोरप्यनयोरिमे लक्षणे ।

अनेकधर्मयोग्येकं वस्त्वनेकैरनेकधा ।
ऊह्यते हेतुभिस्तैस्तैर्धर्मैरुल्लेख इष्यते ॥८५॥
***एकेनानेकधाप्येकमेवं विषयभेदतः ।**
भवत्युल्लिखितं यत्र तत्रोल्लेखोऽपरो[1] मतः ॥८६॥

तत्राद्यो यथा—

कन्दर्प इति कान्ताभिश्चिन्तामणिरिति द्विजैः ।
मृत्युरित्यरिभिर्दृष्टः स्पष्टं कारितनूभवः ॥८७॥

अत्रैक एव कारिकुमारो निरतिशयसौन्दर्यवितरणविक्रमशाली कान्तादिभिरनेकैर्ग्रहीतृभिः ग्रहीतृधर्मैः प्रयोजकैः रुच्यर्थित्व-[2] भयैः कन्दर्पत्वादिबहुप्रकारैरुल्लिखित इति लक्षणसङ्गतिः । अयं वर्ण्यविषये कन्दर्पत्वाद्यनुरञ्जनाद्रूपकसङ्कीर्णः । शुद्धोऽप्ययं दृश्यते ।

विज्ञानशालीति विवेकनिष्ठैर्माधुर्यसीमेति महानुरागैः ।
वाग्मीति तत्तत्समयान्तरस्थैस्संवीक्ष्यतेऽसौ सरसश्शठारिः ॥८८॥

अत्र रुच्यर्थित्व[3]भयानि यथार्हं योजनीयानि ।

द्वितीयो यथा—

भास्वानयं तेजसि चारुवाचमत्क्रियायां चतुराननश्च ।
सहस्रचक्षुः प्रतिपक्षशिक्षालीलाविधाने शठकोपसूरिः ॥८९॥

---

१. M1—परं

२. M1—रुच्यक्थित्व°; M2—रुच्यर्थत्व°; My1—रुच्यथित्य°

३. ,, ,, ,, ,, ,, —रुच्यर्थिक्य°

* Cf. Op. cit., śl. 23a : एकेन बहुधोल्लेखेऽप्यसौ विषयभेदतः ।

अत्रैकेनैव ग्रहीत्रा एक एव शठकोपः तेजःप्रभृतिविषयभेदाद्बहुभिर्भास्वत्वचतुराननत्वसहस्र[1]नेत्रत्वप्रकारैरुल्लिखित इति लक्षणसङ्गतिः । इदमुदाहरणंश्लेषसङ्कीर्णम् । तेजसि विषये भास्वान्प्रशस्तभाः इत्यादिवत्सूर्याद्यर्थान्तरस्या[2]पि सङ्ग्रहात् । शुद्धो यथा—

वक्त्रे सुन्दरमुद्विलासि वपुषि स्फारं पुनर्यौवने
भ्रूयुग्मे तरलं गतौ जडिमवद्दीर्घञ्च नेत्रद्वये ।
श्यामं कुन्तलसन्ततौ तनुतरं मध्ये पृथूरस्स्थले
वस्तु स्वस्ति तनोतु मे वकुलभृद्रूपं समृद्धं गुणैः[3] ॥९०॥

अथ **स्मृतिभ्रान्तिमत्सन्देहा**लङ्काराः निरूप्यन्ते । यत्र कविसम्मतसादृश्याद्विषयविषयिणोरन्यतरनिरीक्षणेनान्यत्र स्मृतिर्निबध्यते तत्र स्मृतिमदलङ्कारः । यत्र विषये विषयिभ्रमो निबध्यते तत्र भ्रान्तिमान् । यत्र विषयविषयिणोस्साधारणधर्ममर्शनाद्वैलक्षण्यदर्शनाच्च[4] सन्देहो निबद्धयते तत्र सन्देहालङ्कार इति निर्णयः । अलङ्कारत्रयस्येदं चक्षणम् ।

स्मरणभ्रान्तसन्देहास्सादृश्याद्यत्र यन्त्रिताः ।
तत्पदाङ्कितसंज्ञित्वादलङ्कारस्त्रयो मताः ॥९१॥

तत्र स्मृतिमदलङ्कारो यथा—

चन्द्रे सान्द्रांशुनिनिस्तन्द्रे सति लोचनगोचरे ।
आरोहति मनःपीठीं[5] शठारेर्वदनं मम ॥९२॥

१, M_1 omits स्र

२ M_2—सूर्यादित्यान्तरस्य

३. M_1—समृद्धेर्गु···।
M_2, M_3, My_2—समृद्धैर्गुणैः

४. M_2, M_3— वैलक्षण्यधर्मात्

५. M_2—°पीठं

भ्रान्तिमदलङ्कारो यथा—

स्फूर्तौ[१] कीर्तिभरस्य *केसरभृतो[२] ज्योत्स्नावदाताकृतौ
ब्रह्माण्डप्रतिहत्यधः[३]प्रसरणोपात्तत्वरायां[४] पुनः ।
धाता स्नातुमनाश्शिरांसि[५] कलयन्मन्दाकिनीविस्तृ[६]-
स्रोतःपातधिया दुरापफलमित्यानन्दमाविन्दति ॥६३॥

अत्र सादृश्यात्कीर्तौ गङ्गाभ्रमनिबन्धनाद्भ्रान्तिमान् । सन्देहालङ्कारो यथा—

किं क्षीरवाराशितरङ्गसङ्घाः किं वा शरच्चन्द्ररुचिप्रपञ्चाः ।
एवं तु सन्देहपदं प्रविष्टाश्शठद्विषश्चारुतराः कटाक्षाः ॥६४॥

अत्र शठजित्कटाक्षेषु क्षीरसागरतरङ्गसङ्घ[७]त्वशरच्चन्द्ररुचिप्रपञ्चत्वकोटिकसन्देह निबन्धनात्सन्देहालङ्कारः ।

यथा वा—

शाखाः स्पृशन्ती सुमनोविकासं[८]धत्ते न बध्नाति च वासनाभिः[९] ।
किं वा सजातिः किमु वा विजातिश्शठारिसूक्तिर्मलयानिलस्य ॥६५॥

---

१. My_1—स्फूर्ता

२. My_1—°धृतौ

३. My_1—°प्रतिहत्सतः°

४. उपात्त is the emended reading; all mss. have उपात

५. स्नातुमनाः is the emended reading; all mss. have स्तातुमनाः

६. विस्तृत is the emended reading; all mss. read विसृत

७. M_1, M_2 & M_3 omit सङ्घ

८ M_1 has a gap for सं; My_2—समनोविकासं

९. M_1—यत्नेन बध्नाति···सनाभिः1; M_2, M_3—यत्ने निबध्नाति च वासनाभिः ।

* वकुलाभरणस्येति यावत् ।

पूर्वोदाहृतसन्देहः प्रसिद्धकोटिकः। अयं तु क[1]विकल्पितकोटिक इति विशेषः।

अथापह्नुतिर्निरूप्यते। सा च षड्विधा। शुद्धापह्नुतिः, हेत्वपह्नुतिः, पर्यस्तापह्नुतिः, भ्रान्तापह्नुतिः, छेकापह्नुति, कैतवापह्नुतिश्चेति[2]। तत्राद्यस्येदं लक्षणम्।

यत्राप्रकृतधर्मस्य समारोपाय निह्नवः।
क्रियते वर्ण्यधर्मस्य शुद्धापह्नुतिरुच्यते ॥९६॥

यथा—

नेदं व्योम जगद्विहारजनितश्रान्तेश्शठद्वेषिणः
कीर्त्यम्भोजदृशः[3] स्फुरत्कुवलयैश्शय्यातलं कल्पितम्।
तारा नैव हिमाम्बुबिन्दव इमे[4] क्षौमोपधानं विधु-
र्नायं[5] तत्कुचगन्धतैलजरसो[6] नाङ्को[7]ऽयमालक्ष्यते ॥९७॥

अत्र व्योमादीनां व्योमत्वादिधर्मनिह्नवः कुवलयरचितशय्यात्वाद्यारोपफल इति भवति शुद्धापह्नुतिः।

हेत्वपह्नुतिर्यथा—

अन्यारोपार्थको धर्मनिह्नवः प्रकृतस्य यः।
सहेतुको यदि स्यात्सा हेत्वपह्नुतिरिस्यते ॥९८॥

---

१. M1 omits क
२. My2 omits चेति
३. M2—°दृशा
४. My2—इमा
५. M2—न्यायं
६. My2—°तैलजनितः
७. My1—°तैलजसितिराकोऽयं

यथा—

नेमे वाङ्निकराः परं बहुमुखा गङ्गातरङ्गोत्करा
नैवं शीतलयन्ति किन्तु निशिता मर्माहतिं कुर्वते ।
बाणा नैव गुणप्रयोगरहिता वज्रा[1] विपक्षच्छिदो[2]
निश्चिन्वन्ति विपश्चितश्शठजिता वादाहवे निर्जिताः ॥९९॥

अत्राशीतलता[3]करत्वगुण[4]प्रयोगरहितत्वयुक्तिभ्यां गङ्गातरङ्गत्वबाणत्वापह्नवो वज्रत्वा[5]रोपार्थमिति भवति हेत्वपह्नुतिः ।

पर्यस्तापह्नुतिर्यथा—

यत्रावर्ण्यगतः स धर्मनिषेधः वर्णनीयवस्तुनि तस्य निषिद्धस्य धर्मस्यारोपार्थो भवति तत्र[6] पर्यस्तापह्नुतिरिति निर्णयः[7] ।

अवर्ण्यगतधर्मस्य निषेधो वर्ण्यवस्तुनि ।
तद्धर्मारोपफलकः पर्यस्तापह्नुतिस्तु सा ॥१००॥

यथा—

नायं कल्पकशाखी कल्पकशाखी शठाहितो जगति ।
यदयं[8] बन्धकफलदः स्थिरतरपुरुषार्थदोऽयमर्थिततेः[9] ॥१०१॥

---

१. M_1, M_2—°रहितावज्ञाविपक्ष°
२. My_2—°च्चिदः
३. My_1—अत्र शीतलता°
४. M_1, M_2, M_3, My_2—°कल्पनगुण°
५. My_1—वज्ञत्व°
६. तत्र is suggested; all mss. read अत्र
७. M_1, M_2, M_3, My_2—निष्कर्षः
८. M_1—अदयं
९. M_1, M_2, M_3—अर्थततेः My_2—अर्थितत्रेः

अत्रावर्ण्ये कल्पकशाखिनि कल्पकशाखित्वस्य निह्नवः वर्णनीये शठरिपावारोपार्थमिति[1] लक्षणसङ्गतिः । अत्रापि युक्तिपूर्वत्वाच्चमत्कारः ।

भ्रान्तापह्नुतिर्यथा—

यत्र[2] केनचिद्वक्त्रा किञ्चित्प्रकृतमुद्दिश्य वृत्तान्ते कथिते सति तादृशवृत्तान्तस्याप्रकृतेऽपि सम्भवादन्यस्य श्रोतुः तत्त्वापरिज्ञानादनुद्देश्यविषयशङ्कायां सत्यां वक्त्रा तत्त्वकथनेन तद्भ्रान्तिर्निवार्यते तत्र भ्रान्तापह्नुतिरिति निर्णयः[3] ।

***तत्त्वाज्ञानेन[4] शङ्कायामन्यस्य भ्रान्तिवारणे ।**
यथार्थकथनाद्वक्त्रा भ्रान्तापह्नुतिरुच्यते ॥१०२॥

यथा—

आनन्दं विदधाति सम्प्रति दृशां[5] पादामृतैश्शीतलै-
स्तापं तावदपोहति स्वमहसा व्याप्नोत्यनन्तान्तरम्[6] ।
गाढं हन्ति तमः करोति विबुधाजीवञ्च किं चन्द्रमाः
न ह्याकर्णय हे सखे गुणनिधिर्नाथश्शठानां रिपुः ॥१०३॥

---

१. M_2—आरोपार्थो भवतीति

२. My_2—अत्र

३. M_1, M_2, M_3, My_2—निश्चयः

४. M_1, M_3, My_1, My_2—तत्त्वज्ञानेन

५. M_1—स मृतिदृशां

६. M_1—प्रा···त्यनन्तानन्तरम्

* Cf. Ku Ā., śl 29a : भ्रान्तापह्नुतिरन्यस्य शङ्कायां भ्रान्तिवारणे ।

अत्र शठरिपुपदमनुपादाय वक्त्रा "आनन्दं विदधाती"त्युपन्यासे कृते तस्य चन्द्रमस्साधारण्यात् ऋजुबुद्ध्या सहचरेण पृष्टे "न ह्याकर्णये"ति तत्त्वकथनेन भ्रान्तिनिवारणादियं भ्रान्तापह्नुतिः। इयं सम्भावितभ्रान्तिमूला। कल्पितभ्रान्तिमूला यथा—

नाब्जं न स्पृश हे रवे परमिदं भूयः[1] कठोरैः करै-
र्नो गङ्गा नखकान्तिरीश शिरसा घोरेण किं श्लिष्यसि।
इत्यभ्यागतदैवतभ्रमपरीहारोक्तिपूर्वं चल-
द्वेत्रा यत्र परिभ्रमन्ति शठजिद्देशाङ्गणे प्राणिनः ॥१०४॥

अत्र शठकोपस्य[2] पादादौ रव्यादेरब्जादिभ्रमे सति वेत्रधरैस्तत्त्वकथनेन तत्परिहारः कृत इति भ्रान्तापह्नुतिः। भ्रान्तिश्च कल्पिता नाब्जमित्यादिनिषेधमात्रादुन्नेया[3] पूर्ववत्प्रश्नाभात्।

अथ **छेकापह्नुतिर्**निरूप्यते। यत्र केनचित्कञ्चिदाप्तजनं प्रति स्वरहस्ये निवेद्यमाने दैवादन्येन श्रुते सति तत्प्रकाशनभीत्या वैदग्ध्यादतथ्यनिवेदनेन तथ्यनिगूहनं क्रियते तत्र छेकापह्नुतिरलङ्कारः। अत्रेदं लक्षणम्।

स्वोक्तावन्येन तत्त्वार्थप्रश्नेऽतत्त्वनिवेदनात्।
तथ्यं[4] निगूह्यते यत्र छेकापह्नुतिरुच्यते ॥१०५॥

---

१. M_1—भूयं

२. M_1 omits शठ

३. M_1, M_2, M_3—इत्यादिनि विषयमात्रात्

४. M_1, M_2,—तत्त्वं

यथा—

स्वेदस्तूदयते वपुष्यविरलं स्तम्भस्समुज्जृम्भते

भ्रान्तिश्चेतसि भाति[1] वाचि भवति स्खालित्यमङ्कूरति ।

वैवर्ण्यं समये रुचिरं विलसत्याः किं शठद्वेषिणा[2]

विद्यावादमुखे जितोऽसि न हि न ह्यङ्गेषु तापज्वरः ॥१०६॥

इदं शठजिता वादमुखे[3] निर्जितस्य कस्यचिद्विमतस्य वचनम् । स्वस्य वादपरिभवमेवोद्दिश्याप्तजनसकाशे वदता विमतेन "आःकि"मित्यादिना तमेव पृच्छन्तमात्मजनं प्रत्यतथ्यमङ्गतापज्वरं निवेद्य झटिति वैदग्ध्येन तथ्यपरिभवनिह्नवाच्छेकापह्नुतिः । छेकस्य विदग्धस्यापह्नुतिरित्यन्वर्थसंज्ञा । अत्र स्वेदोदयाद्यर्थस्यान्यत्र योजनया तथ्यनिह्नवः । क्वचिच्छब्दयोजनयापि निह्नवो दृश्यते । यथा वा—

नो चेत्सम्मदकारिनन्दनमुखालोकः[4] किमुज्जीवनं

किं वा देवकुलप्रियं[5] प्रियतमं हित्वा कथं प्राणिमि ।

इत्याभाष्य सरोषभीषणमुखश्वश्रूदृशा[6]लोकिता

तमुक्तिं[7] प्रकृते नियोजितवती काचिद्विदग्धाङ्गना ॥१०७॥

---

१. My_1,—भ्रान्ति

२. My_2—°द्वेषिणः

३. My_2—वादाहवे

४. M_1, My_1, My_2—°आलोकं

५. M_1, M_2, M_3 & My_2 omit the *anusvāra*

६. M_1,—°मुखश्चश्री°

७. M_3 My_1—उक्तिः

अत्र शठकोप[१]निरूपमसौन्दर्यमोहितया कयाचिन्नायिकया नर्मसख्यै स्वाभिप्रेते निवेदिते कारिनन्दनादिशब्दश्रवणादन्यथाशङ्कयातिकुपितां पापीयसीं श्वश्रूं प्रति तत्तच्छब्दानां प्रस्तुतविषयक[२]त्वयोजन[३]या तथ्यनिह्नव-कारणाल्लक्षणसङ्गतिः । इदं विषयान्तरयोजनया तथ्यनिह्नवोदाहरणम्[४] । एकस्मिन्नपि[५] विषये अवस्थाभेदा[६]त्तथ्यनिह्नवो दृश्यते । यथा वा—

निद्राणे दयिते निजे गुरुजने जाग्रत्यपि च्छद्मना
छायामात्रसखी गता शठरिपोः प्राप्ता पुनस्सन्निधिम् ।
जातं तत्र कियद्वदामि तदिहेत्युक्त्वावबुद्ध्यात्मना
श्वश्रूं[७] हन्त न वेद्मि किन्न्व[८]पि तदा[९] स्वप्नो हि चित्राकृतिः ॥१०८॥

अत्रैकस्मिन्नेव शठरिपौ जाग्रद्दशायां कृतसेवादिभोगस्य स्वप्न-दशायां योजयित्वा निह्नवादेकस्मिन्नेव विषये अवस्थाभेदेन तथ्य-निह्नवः ।

---

१. M_2—शठरिपु°

२. M_2 omits त्व

३. After °योजनया M_1, has only तथ्यनिह्नवोदाहरणे of the following sentence.

४. M_1, M_3, My_2—°उदाहरणे

५. M_1, M_2, M_3 & My_2 omit अपि

६. My_1—वस्तुभेदात्

७. M_2 omits the *anusvāra*

८. M_1—तत्त्वपि; M_2, My_1, My_2—तन्न्वपि

९. तदा is suggested; all mss. read कदा

कैतवापह्नुतिर्यथा । यत्र नञ्पद[1]योगेन कण्ठतो[2]ऽपह्नवाभावेऽपि कैतवादिपदैरसत्यत्वप्रतिपादकैरेव धर्मापह्नवः प्रतीयते[3] तत्र कैतवापह्नुतिरलङ्कारः । अत्रेदं लक्षणम् ।

यत्र प्रतीयते व्याजकैतवप्रमुखैः पदैः ।
धर्मस्यापह्नवस्तत्र[4] कैतवापह्नुतिर्मता ॥१०६॥

यथा—

निर्मर्यादयशस्समुत्करसुधापूरेण चक्राचल-
व्याजावृत्ततटाकसीमनि परं पूर्णे शठद्वेषिणः ।
उद्रेकेण स एव तत्पृथुशिलाजालान्तरेभ्यो[5] बहि-
र्निर्यात्यन्तिक[6]दन्तिसन्ततिरदच्छद्मैकधाराकृतिः ॥११०॥

अत्रासत्यवाचिभ्यां व्याजच्छद्मपदाभ्यां नायं चक्राचलः[7] **नेमे** दिग्दन्तिरदा इति चक्राचलत्वदिग्दन्तिरदत्वरूपधर्ममपह्नुत्यावृत्ततटाकत्वसुधाधारात्वारोपाल्लक्षणसङ्गतिः ।

---

१. M_1—नर्मपद°; My_1—नग्नपद°; My_2—नजिपद°

२. M_1—कर्णतो; My_1—अकण्ठतो

३. My_2 adds इति

४. M_1—अपह्नवं

५. My_2—°जालान्तराख्यो

६. M_1, M_3, My_2—अन्तक°

७. M_1—नायकाचलः

यथा वा—

लोके बलाद्विषयभूरिभुजङ्गदृष्टे
त्रातुं तदीयहृदयं बहुधा निपीड्य ।
पीत्वा ततस्स्रुतमसृक् तदिदं शठारे
रागच्छलान्नखमुखद्युतयो वमन्ति ॥१११॥

अत्रासत्यत्व[१]वाचि[२]ना च्छलपदेन स्वाभाविकरागत्वमपह्नुत्य विषयफणिदष्टजनहृदय[३]पीतवान्तासृक्त्वारोपात्कैतवापह्नुतिः ।

अथोत्प्रेक्षा निरूप्यते । अयमत्र निर्णयः । *अन्यधर्मसम्बन्धेन निमित्तेना[४]न्यस्यान्यतादात्म्यसम्भावनोत्प्रेक्षा[५] इत्युत्प्रेक्षा[६]सामान्यलक्षणम् । सा च त्रि[७]विधा । कस्यचिद्वस्तुनः वस्त्वन्तरतादात्म्यगोचरत्वेन, अहेतोर्हेतुभावगोचरत्वेनाफलस्य फलभावगोचरत्वेन चेति । तत्र आ[८]द्या स्वरूपोत्प्रेक्षा उक्तविषया, अनुक्तविषया चेति द्विविधा । द्वितीया हेतूत्प्रेक्षा सिद्धविषया, असिद्धविषया चेति द्विविधा । तृतीया फलोत्प्रेक्षापि तथैव द्विविधा । तथा च उक्तविषयस्वरूपोत्प्रेक्षा, अनुक्तविषयस्वरूपोत्प्रेक्षा,

---

१. M_1, M_3, My_1 —सत्यत्व°

२. M_2 omit वाचि

३. M_1, M_3, My_1 My_2—°पीतावान्त°

४. M_1 & My_1 omits अन्य

५. My_2 adds उच्यते

६. M_1 & My_1 omits इत्युत्प्रेक्षा

७. M_2—त्रिधा

८. M_1, M_2 M_3, & My_2 omit आद्या

* Cf. Ku. Ā. p. 32 : अन्यधर्मसम्बन्धनिमित्तेनान्यस्यान्यतादात्म्यसम्भावनमुत्प्रेक्षा ।

सिद्धविषयहेतूत्प्रेक्षा, असिद्धविषयहेतूत्प्रेक्षा, सिद्धविषयफलोत्प्रेक्षा, असिद्धविषयलोत्प्रेक्षा चेति षट्प्रकारा भवन्ति[1]। अत्रेदं लक्षणम् ।

यत्रान्यधर्मसम्बन्धादन्यतादात्म्यगोचरः ।
वितर्कोऽन्यस्य सोत्प्रेक्षा वस्तुहेतुफलात्मना ॥११२॥

त्रिधोक्तानु[2]क्तविषया प्रथमा द्विविधा मता ।
पृथक्प्रसिद्धाप्रसिद्धविषये भवतः परे ॥११३॥

तत्रो[3]क्तविषयस्वरूपोत्प्रेक्षा यथा—

मन्दस्मितं शठारातेर्मन्ये वदनमण्डले ।
चेतःकमलनिष्ठ्यूतमकरन्दझरीभरम् ॥११४॥

अत्र मन्दस्मितस्य माधुर्यवैशद्यादिधर्मसम्बन्धं गम्यमानं निमित्तीकृत्य हृदयकमलविनिर्गतमकरन्दझरीभरतादात्म्यसम्भावनादुत्प्रेक्षा । सा च मकरन्दतादात्म्यस्य मन्दस्मितस्य तादात्म्यकलो[4]गोचरत्वात्स्वरूपोत्प्रेक्षा भवति । सा च पुनर्मन्दस्मितस्य विषयस्योक्तत्वादुक्तविषया । अनुक्तविषयरूपोत्प्रेक्षा यथा—

---

१. My_2—भवति

२. M_1, M_2, M_3—अथोक्ता

३. M_1— अत्र

४. M_1, M_3, My_1—तदात्मकता°
M_2—तदात्मता°

नाथस्य तस्य[1] पदपङ्कजयुग्मलक्ष्मी-
बन्धूक[2]बन्धुरतर[3]स्तबकैकबन्धुः ।
आलिम्पतीव हृदयानि नमज्जनानां
रक्तानि तामनुसरन्त्यत एव तानि ॥११५॥

अत्र रञ्जकत्वधर्मसम्बन्धं निमित्तीकृत्य शठरिपुचरणलक्ष्मीप्रसरणस्य तच्चरणलक्ष्मीकर्तृकलेपनतादात्म्योत्प्रेक्षा । तत्सरूपविषयस्यानुपादानादनुक्तविषया । यथा वा—

शठद्विषद्वक्त्रसुधासमुद्रो निर्णिद्रदृक्कान्तितरङ्गसङ्घैः ।
निषिञ्चतीवान्तिकभाग्जनौघान्[4]नानम्यते तैरपि मूर्द्धसार्थः[5] ।११६।

अत्र मुखकृतदृक्कान्तिव्यापनं सुधासमुद्रकृततरङ्गसेचनत्वेनोत्प्रेक्ष्यते[6] । अस्यामुत्प्रेक्षायामुद्वर्तनभृश[7]तरपातित्वादिकं[8] निमित्तं दृक्कान्तिव्यापनरूपविषयानुपादानादनुक्तविषया स्वरूपोत्प्रेक्षा ।

---

१. My_2—यस्य

२. My_1 omits बन्धूक

३. M_1—°बन्धुरितर°

४. M_1, My_3—°जनौघो

५. M_1, M_3, My_1, My_2—°सार्द्धः

६. M_1, M_3—उत्प्रेक्षते

७. M_1, omits the letter र

८. M_2, M_3—°वादित्वादिकं

सिद्धविषयहेतूत्प्रेक्षा यथा—

अत्यन्तमाधुर्यधुरन्धराणि नूनं शठारेर्वचनान्यमूनि ।
अत्यन्तविद्यामृतसागराम्भोनिरन्तरास्वादसम्भवेन ॥११७॥

अत्र शठकोपवचनेषु माधुर्यस्य पौष्कलयेन स्वतस्सिद्धत्वात्तत्र वेदान्तविद्या[1]मृतस्वादनं वस्तुतो न हेतुः । अतोऽहेतुभूतस्य तस्य हेतुभावेनोत्प्रेक्षणाद्धेतूत्प्रेक्षा । सा च ब्रह्मविद्यास्वादरूपविषयस्य सिद्धत्वा[2]सिद्धविषया ।

असिद्धविषया हेतूत्प्रेक्षा यथा—

चाञ्चल्यमेतत्तव दृग्विलासैरङ्गी[3]कृतं ब्रूहि कुतश्शठारे ।
मन्ये पुनस्त्वच्छ्रवणा[4]ग्रलग्नप्रसूनमाध्वीरसनप्रसङ्गात् ॥११८॥

अत्र नैसर्गिकस्य दक्चाञ्चल्यस्य कर्णपूरप्रसवरसनप्रसङ्गो न हेतुः । अतस्तस्य तथात्वेनोत्प्रेक्षणाद्धेतूत्प्रेक्षा । प्रसवरसपानस्यासिद्धत्वादसिद्धविषया ।

---

१. M_2 adds जाता after विद्या

२. M_1,—सिद्धित्वात्
My_1—प्रसिद्धत्वात्

३. M_2— °विलासैरहःकृतं

४. °श्रवणाग्र° is suggested; all mss, read °चरणाग्र°

सिद्धविषयफलोत्प्रेक्षा यथा—

त्वत्कीर्तिराजिरधुना[1] शठकोपसूरे[2]
दुग्धार्णवामलपयस्यवगाह्य पश्चात् ।
चन्द्रातपांशुकमिदं परिधाय नूनं
विक्रामतीन्द्रतरुकुञ्जकुटीविहृत्यै[3] ॥११९॥

अत्र सकलदेशविशृङ्खलप्रसरणरूप[4]कीर्तिराजिविक्रमणं सुरतरुनिकुञ्जविहृतिफलमित्यफलस्य फलत्वेन सम्भावना फलोत्प्रेक्षा । सा च सुरतरुविहारः सिद्ध इति सिद्धविषया ।

असिद्धविषयफलोत्प्रेक्षा यथा—

इन्दुरिन्दुधरमूर्धमण्डलीसङ्गसङ्गतकलङ्कशोधनात् ।
त्वन्मुखानुगतयेऽन्तरिक्षभाक् ज्ञान[5]वेष शठजित्तपस्यति ॥१२०॥

अत्रेन्दोरन्तरिक्षावस्थानम[6]न्तरिक्षवासितपोरूपेणा[7]ध्यवस्योत्प्रेक्ष्यते । स्वभावादेवेन्दोरन्तरिक्षावस्थानं, न तु[8] हरशिरस्संसर्गजनितनिजकलङ्क-

---

१. M_1, M_2, M_3, My_1—अमुना
२. My_2— °मौने
३. M_2—विश्रामति
४. My_1 omits रूप
५. M_2—ज्ञात°
६. M_1 & M_2 omits म
७. My_1— °रूपत्वेन
८. M_2 omits न तु and has मनोहरसंसर्ग°

शोधनपूर्वकं[1] शठजिद्वदनानुगमनार्थमतः[2] अफलस्य तद्वदनानुगमनस्य तादृश-तपःफलत्वेनोत्प्रेक्षणात्तदनुगमनस्य[3] गगनकुसुमवद[4]सिद्धत्वाच्चसिद्धविषया[5] फलोत्प्रेक्षा ।

यथा वा—

त्वत्कीर्तिश्शठजित्सुरेन्द्रतटिनीरङ्गत्तरङ्गोर्मिभृ-[6]
च्छृङ्गारोहणकल्पिताङ्घ्रिकमला[7] पाणिं प्रसार्यात्मनः ।
चन्द्राकारमुदङ्कुरा[8]ङ्गुलिमुखादादातुमुज्जृम्भते
वाग्देवीश्रवणाग्रगुम्भित[9]लसन्मन्दारपुष्पावलिम् ॥१२१॥

अत्र कीर्त्युज्जृम्भणस्य नैसर्गिकस्य वाणीकर्णपूरकुसुमादानं फलमित्यफलस्य[10] फलत्वमुत्प्रेक्षितम् । तदादानञ्च अत्र[11]सिद्धमित्यसिद्ध

---

१. M_1, M_2, M_3, & My_2 add न

२. M_2 omits र्थ

३. M_2—°गमनात्

४. M_1, M_3, My_1, My_2—अप्रसिद्धत्वात्

५. M_2—सिद्धविषया

६. M_2—°तरङ्गोऽद्रिभृत्°
M_3, My_1—°उर्विभृत्°

७. My_2—°भृङ्गरोहण°

८. °अङ्कुर° is emended reading; all mss have °अङ्कुश°

९. M_1, M_2, M_3—°शुम्भित°

१०. M_1, M_2, M_3—°कुसुमावासफलं
My_2—°कुसुमावासं न फल

११. M_1, M_2, & M_2 omits असिद्ध

विषया[1] फलोत्प्रेक्षा । नूनं शङ्के ध्रुवं प्राय इत्यादिव्यञ्जकपदानुपादानाद्-गम्या, तदुपादाने तु वाच्येति भेदः[2] ।

अथा**तिशयोक्तिर्निरूप्यते** । सा च सप्तविधा । रूपकातिशयोक्तिः, भेदकातिशयोक्तिः, सम्बन्धातिशयोक्तिः, असम्बन्धातिशयोक्तिः, अक्रमातिशयोक्तिः, चपलातिशयोक्तिः, अत्यन्तातिशयोक्तिरिति भेदात् । तत्राद्या[3] द्विविधा । शुद्धा, सापह्नवा चेति । यत्रोपमेयं स्ववाचकशब्देनोपादानमन्तरेणो[4]पमानवाचकपदै[5]रुपादाय तद्रूपेणावधार्यते तत्र शुद्धा रूपकातिशयोक्तिरिति निश्चयः । अत्रेदं लक्षणम् ।

विषय्यध्यवसानेन वर्ण्यं यत्र निगीर्यते ।
रूपकातिशयोक्तिस्स्यात्तत्र हृद्या मनीषिणाम् ॥१२२॥

यथा—

कमले विचकास्ति पल्लवो
विलसत्यत्र वितन्द्र[6]चन्द्रिका ।
किमिदं समुदेति तन्मुखा-
न्मधु मादृग्जनभृङ्गमङ्गलम् ॥१२३॥

---

१. M_1, M_3, My_1—°विषय°; M_2—सिद्धविषय°

२. M_2—भाव:

३. M_2, M_2, M_3, My_2—अत्र

४. M_2—उपादानान्तरेण

५. उपमानवाचकपदैः is suggested
M_1—उपमानवाचकवस्तुवाचकपदैः
M_2, M_3, My_1, My_2—उपमानवस्तुवाचकपदैः

६. M_1, M_2, M_3, My_1,—वितन्त्रि°

अत्र शठकोपस्य वदनेऽधरो विचकास्ति तत्र दरहासो विलसति तदन्तरादतिभोग्यं वचनमुदेतीति वक्तव्ये विषयनिगरणेन वदनादीनां विषयिवाचकपदैरेवोपादानाद्रूपकातिशयोक्तिः। उत्कर्षापकर्षयोरवर्णनाद-नुभयाभेदरूपा।

यथा वा—

कालिका शशधरस्य मण्डलादूर्ध्वमुल्लसति विद्युदुत्करैः।
आवृताकृतिरुपैति[1] देहभृत्तापदीपनसमापनादरम् ॥१२४॥

अत्र शठरिपोर्मुखमण्डलादुपरि वर्तमानश्चिकुरनिकरः कनकदाम-भिराबद्ध इति वक्तव्ये विषयनिगरणेन विषयिशब्दैरुपादानान्मेघमालिका-याश्चिकुरभारावस्थायां[2]चन्द्रमण्डलादधोवर्त्तित्वरूपपूर्वावस्थातस्तदुपरिवर्तना-धिक्यवर्णनाच्चाधिकाभेदरूपकातिशयोक्तिः। यथा वा—

उत्तुङ्गगङ्गापरिवाहधारा पद्मोदरादद्भुतमाविरासीत्[3]।
भिनत्ति पूर्वं तटमुत्तटं तु प्रकाशयित्वा वहनानुकूल्यम्[4] ॥१२५॥

अत्र शठवैरिणो मुखोदरविनिर्गलद्[5]वाणीविलसितस्य विषयनिगरणेन

---

१. M₁, M₂—आर्द्रताकृतिरूपैति; M₃—आद्रताकृतिरूपैति; My₁—आद्य-ताद्यतिरूपैति

२. My₁—विषयिभूतकालिकायाश्चिकुरीभावस्थायां

३. My₁—आविरस्ति

४. °आनुकूल्यम् is suggested while all mss. read °आनुकूल्यात्

५. My₁—°विनिर्गमत्°

गङ्गाप्रवाहरूपताध्यवसानादन्यतरकूलभेदकत्वे[1] न्यूनतावर्णनाच्च[2] न्यूनाभेद-रूपकातिशयोक्तिः । यथा वा[3]—

विधत्ते कमलोल्लासमपरोऽयमहस्करः ।
नानामुखतमश्छेदं[4] कलयन्करमुद्रया ॥१२६॥

अपरोऽयमहस्कर इति प्रसिद्धसूर्याद्भेदाविष्करणान्न्यू[5]नाधिक्ययोरनुपन्यासाच्चानुभयताद्रूप्यरूपकातिशयोक्तिः[6] ।

यथा वा—

अपरः कुसुमायुधो वपुःस्फुरणाद्वीक्षणसाक्षिवैभवः ।
कुरुते धनुरन्तरार्पितैर्विशिखैः पुम्वनितासमागमम् ॥१२७॥

अत्रापर इति प्रसिद्धमदनाद्भेदो वर्णितः । भ्रूनिहितकटाक्षैः जीवपरौ घटयतीति वक्तव्ये विषयनिगरणेन तेषां धनुरादिपदैरूपादानं च कृतम् । वपुःस्फुरणादित्याधिक्यं च विभावितमि[7]ति अधिकताद्रूप्य[8]रूपकातिशयोक्तिः । यथा वा—

---

१. M_1, M_2, M_3, & My_2 omit भेदकत्वे
२. M_1, My_2—°वर्जनात्
३. M_1, M_2, M_3 & My_2 omit यथा वा
४. M_2—°तमस्छेदं
५. M_2—भेदाविषयकरणान्न्यून°; M_1 My_2—भेदाविष्कारणान्न्यून°
My_1—भेदाविष्करन्यून°
६. M_1—अनुभयताद्रूपरूपकातिशयोक्तिः
M_2—अनुभयतारूप्यातिशयोक्तिः
७. My_1—विभावितीं
८. M_2—अधिकतरूप्य°

अपरः पारिजातोऽयमनिन्द्रभुवनाश्रयः ।

अनल्पमर्थिसार्थस्य[1] कल्पते फलसम्पदः ॥१२८॥

अत्रानिन्द्रभुवनाश्रय इति न्यूनताभिधानान्न्यूनताद्रूप्यरूपकातिशयोक्तिः ।

अथ सापह्नवातिशयोक्तिर्निरूप्यते । यत्रापह्नवपूर्वकं विषयनिगरणेन विषयिरूपेणाध्यवसानं तत्र सापह्नवातिशयोक्तिरिति[2] निर्णयः । अत्रेदं लक्षणम् ।

अपह्नवस्य विन्यासो यत्र चेदुपपद्यते ।

रूपकातिशयोक्तिर्हि सैव सापह्नवोच्यते ॥१२९॥

यथा—

क्षोणीमण्डलमण्डनोऽयमपरः कल्पद्रुमः कारिभू-

राविर्भूतमरन्दशीकरभरैरानन्दयत्यादरात् ।

शाखाच्छाय[3]विधानतोऽखिलजनव्यद्ध्व[4]श्रमापोहनं

पश्याङ्गीकुरुते[5] वदन्ति किममुं मूढाः पुनःस्वर्गतम् ॥१३०॥

अयमेव सर्वाभीष्टदः मधुरवचनैरानन्दयति वेदप्रतिबिम्बभूतदिव्यप्रबन्धकरणेन संसारपरिवर्तनश्रान्तजनविश्रान्तिं करोतीति वक्तव्ये

---

१. अनल्पमुक्ति°

२. M_2—सापह्नवरूपकातिशयोक्तिः

३. M_2 omits च्छा

४. M_2 omits द्ध्व

५. M_2—पश्याप...कुरुते

विषयनिगरणेन कल्पादिरूपत्वेनाध्यवसानाद्रूपकातिशयोक्तिः । अयमेव कल्पद्रुमः न स्वर्गस्थ इत्यपह्नवगर्भा । इदं च पर्यस्तापह्नुतिगर्भत्वमुत्प्रेक्षायामपि सम्भवति । तत्र स्वरूपोत्प्रेक्षायां यथा—

असदृशवितरणयुक्तश्चिन्तामणिरेष एव शठवैरी ।
मन्ये पुनरहमुपलं भ्रान्ताः प्रलपन्त्यभीष्टदं जगति ॥१३१॥

अत्र प्रसिद्धचिन्तामणौ चिन्तामणित्वमपह्नुत्य वितरणातिरेकनिमित्ताच्छठरिपौ तदुत्प्रेक्षणादुत्प्रेक्षेयं पर्यस्तापह्नुतिगर्भा । हेतूत्प्रेक्षायां यथा—

आलोक एषामनिशं शठारेस्तेजोयशोभ्यां ध्रुवमेव लोके ।
न चैव ताभ्यामिह पुष्पवद्भ्यां न किं तयोरस्ति तमःप्रवेशः ॥१३२॥

अत्र सूर्याचन्द्रमसोरालोकहेतुत्वमपह्नुत्य सतत[1]प्रकाशयोस्तेजोयशसोर्निवेशितमित्यपह्नुतिगर्भा हेतूत्प्रेक्षा । फलोत्प्रेक्षायां यथा—

शठजित्कलशार्णवोदरादुदिता कीर्तिरमा विगाहते ।
विधिलोकमधिष्ठितं गृहं पुनराहर्तुमनेन नान्यथा ॥१३३॥

अत्र नान्यथेति सत्यलोकपर्यन्तव्यापननिष्ठफलत्वम[2]पह्नुत्य विधिगृहीतस्व[3]गृहकमलस्य पुनराहरणार्थमित्यन्यत्रसमर्पणार्थापह्नवेयं[4] फलोत्प्रेक्षा । एव मुत्प्रेक्षाभेदेषु द्रष्टव्यम् ।

---

१. M_2—सा तत्तत्

२. M_1—°पर्यन्तफलत्वं
M_3, My_2—°पर्यन्तफलव्यापननिष्ठफलत्वं
My—°पर्यन्तप्रवेशफलव्यापननिष्ठफलत्वं

३. M_1, M_2, M_3, My_2—°गृहीतस्य

४. M_1, M_2, M_3, My_1—अपह्नवोऽयं

अथ **भेदकातिशयोक्तिर्निरूप्यते** । यत्र लोकप्रसिद्धस्यैव वस्तुनः स्वाभेदे सत्यपि तद्भिन्नत्वेन वर्णनं तत्र भेदकातिशयोक्तिरिति निर्णयः । लक्षणम्—

लोकप्रसिद्धं यद्वस्तु तस्यैवापूर्व[1]वर्णनम् ।
भेदकातिशयोक्तिस्स्यात्तत्र विद्वन्मनोहरा ।।१३४।।

यथा—

अन्यद्रूपं वचनरचनाप्रौढिरन्येयम[2]न्य-
तेजोऽप्यन्यो वितरण[3]भरो धैर्यमप्यन्यदेव ।
अन्या लक्ष्मीः प्रसदनकलावैभवोऽप्यन्य एव
श्रीमान्भूमावजनि जनताभाग्यहेतोश्शठारिः ।।१३५।।

अत्र शठरिपोः रूपादीनां लोकप्रसिद्धाभिन्नत्वेऽपि भेदो वर्णितः ।

अथ **सम्बन्धातिशयोक्तिर्निरूप्यते** । अत्रेदं लक्षणम् ।

असम्बन्धेऽपि सम्बन्धवर्णनं यत्र दृश्यते ।
***यदि स्यात्तत्र सम्बन्धातिशयोक्तिस्सतां मता ।।१३६।।**

यथा—

अस्यश्रीशठवैरिणो मणिमयप्रासादकेतुच्छटा-
शाटीझाटपटत्क्रिया[4]रववशाद्भीता मरुद्योषितः ।

१. M_1, My_2—अपूर्ण°
२. M_1, My_1, M_2—अन्ये
३. M_2—वितरणमहो
४. M_1, M_2, M_3—°झादधवत्क्रिया°
My_2—°झाटधलत्क्रिया°
* अत्र यदि स्यात् इति पदद्वयमनपेक्षितम् ।

पाञ्चं मानमपोह्य निर्भरपरीरम्भैरलम्भावना
दूरानन्दभरान्तरेषु दयितेष्वापादयन्त्यद्भुतम् ॥१३७॥[1]

अत्र ध्वजपटरवश्रवणजनितभयासम्बन्धेऽपि सम्बन्धोक्तेस्सम्बन्धातिशयोक्तिः । यथा वा—

स्वाधीनजीवनमिदं तु चकोरजातं
दीनं दिने कथमहं बत जीवयामि ।
इत्यार्तिमिन्दुरुपयन्शठवैरिकीर्ति-[2]
ज्योत्स्नाप्रपूरमभिवीक्ष्य सुखं प्रयाति ॥१३८॥

अत्र चन्द्रस्योक्तसुखदुःख[3]सम्बन्धाभावेऽपि तत्सम्बन्धो वर्णितः ।
अथासम्बन्धातिशयोक्ति[4]र्निरूप्यते । अत्रेदं लक्षणम्[5] ।

सम्बन्धे सत्यसम्बन्धवर्णनं यत्र दृश्यते ।
सम्मता स्यादसम्बन्धातिशयोक्तिर्मनीषिणाम् ॥१३९॥

---

१. दयितेषु is suggested; all mss read दयितान्

२. M_2—°कीर्ति°

३. M_1, M_2, M_3, & My_1 omit सुखदुःख

४. M_1, My_1, My_2—सम्बन्धातिशयोक्तिः

५. M_1, My_2, & My_3 omit अत्रेदं लक्षणम्
My_2 omits अत्रेदं

यथा—

द्राक्षामधूकमकरन्दसुधारसानां[1]
वार्तापि *मे श्रवणयोः कटुतां विधत्ते ।
नाथ त्वदीयमधुरोक्तिषु शक्तिभाजो[2]
ह्याजीवनीषु[3] **शठकोप कृपाम्बुराशे ॥१४०॥**

अत्र द्राक्षादिषु भोग्यतया स्वीकारसम्बन्धेऽप्यसम्बन्धो वर्णितः । यथा वा—

नयनयोरनयोरितरेतरोत्तरलताधृतिपातचिकीर्षुणोः ।[4][5]
शठरिपोर्वदने वद नेत्रताविरचनस्य किमन्तर****मान्तरम्**[6] **॥१४१॥**

अत्र नेत्रयोर्वदनपरिच्छेद्यत्वसम्बन्धेऽपि तदसम्बन्धवर्णनादतिशयोक्तिः ।

अथा**क्रमातिशयोक्ति**र्निरूप्यते । अत्रेदं लक्षणम् ।

कार्यकारणयोरेककालत्वं यत्र वर्ण्यते ।
अक्रमातिशयोक्तिस्स्यात्कविचेतोविलासिनी ॥१४२॥

---

१. M_1—°मधुक°

२. M_1, M_2 M_3—भक्ति°

३. M_2—अजीवनीषु; My_2—राजीवनीषु

४. M_2 omits अनयोः

५. M_1, M_2, M_3 My_1 °उत्तरलतास्वधृत°

६. आन्तरम् is suggested. M_1, M_3, My_1, My_2—अन्तरम्; M_2—अन्तरा

*मे इत्यस्य रक्तिभाज इत्यनन्तरपादस्थेन पदेनान्वयः ।

** अत्र ब्रह्मण इत्यध्याहार्यम् ।

यत्र कारणं पूर्वं कार्यमनन्तरमिति लोकमर्यादामतिलङ्घ्य तयोर्यौगपद्यं वर्ण्यते तत्राक्रमातिशयोक्तिरिति निर्णयः ।

यथा—

यदा चलति केसराभरणचक्षुरुद्वीक्षणं
तदा चलति मेदुरा दुरितधोरणी देहिनाम् ।
यदा शठजिदन्तिकं सरति[१] योऽपि कोऽप्यादरा-
त्तदा सरति तच्छिरस्यरिभृदङ्घ्रिजांशूत्करः ॥१४३॥

यथा वा[३]—

उत्तरोन्मुखतां गच्छत्यनङ्ग[४]शठवैरिणि ।
गच्छत्यपि च दुर्वादि[५]धोरणी धरणीतले ॥१४४॥

पूर्वत्र शठरिपुदृक्चलन[६]दुरितचलनयोः कार्यकारणयोरेककालत्वं वर्णितम् । यथा हि[७] यदा मनुष्यः तत्सन्निधिं व्रजति तदानीमेव स्वशिरसि

---

१. M_2 omits सरति

२. M_1, M_3, My_1—°शिरस्सरिभृत्°
M_2—°शिरस्सभृत्°

३. M_2 & My_2 omit वा

४. M_2—ग्रनङ्गः

५. M_2—दुर्व्याधि°

६. M_2—द्रुत°

७. हि is suggested though not found in any mss.

प्रसादोन्मुख[1]भगव[2]च्चरणकिरणनिकरः सर्वदा चरतीत्यनयोश्च समकालत्वमभिहितम् । अत्र य[3]दा शठरिपुरुपन्यासोन्मुखो भवति तदानीमेव दुर्वा[4]दिवर्गः पलाय्योद[5]ग्दिशं गच्छतीति कार्यकारणयोः क्रमं विहाय यौगपद्यवर्णनाद्भवत्यक्रमातिशयोक्तिः ।

अथ **चपलातिशयोक्तिर्निरूप्यते** । अत्रेदं लक्षणम् ।

***हेतुप्रसक्तिमात्रेण यत्र कार्यसमुद्भवः ।**
चपलातिशयोक्तिस्स्यात्तत्र काव्य[6]ज्ञसम्मता ॥१४५॥

यथा[7]—

यद्विद्याश्रवणेच्छयापि गलति[8] ग्रन्थिस्त्व[9]विद्यामयी
यत्संश्लेषक[10]थाविधावपि मनस्सम्मोहमारोहति ।

---

१. My_1—°उन्मुखी°
२. M_1 & M_3 omit भगवत्
३. M_1, M_3, My_1, My_2—यथा
४. M_2—दुर्व्याधि°
५. M_1, My_1, My_2—उदिक्°
M_2—उदुक्°
६. M_2—कार्यज्ञ°
७. M_1, M_2 & M_3 omit यथा
८. M_2—°इच्छया विगलति
९. My_2—ग्रन्थिस्थ°
१०. M_1, M_3—यथं श्लेष°; M_2—याः संश्लेष°
* Cf. Ku. Ā., śl. 42a.

यद्वार्तालपनान्तरेष्वपि[1] वपुष्याभाति काश्यं सतां
तस्यामुष्य शठद्विषो गुणगणः को नाम भूमाविह[2] ॥१४६॥

अत्र शठवैरिदिव्यसारस्वतश्रवणादीनां हेतूनां[3] प्रसक्तिमात्रेण तत्तत्कार्यभूताविद्याग्रन्थिगलनादीनां कार्यमुखेन वर्णनाच्चपलातिशयोक्तिः ।

अथात्यन्तातिशयोक्तिर्निरूप्यते । अत्रेदं लक्षणम् ।

कार्यकारणयोस्सिद्धपौर्वापर्यव्यतिक्रमः ।
यत्रोपवर्ण्यतेऽत्यन्तातिशयोक्तिरितीष्यते ॥१४७॥

यथा—

आदावेव धरीधरीति पुरुषस्सर्वज्ञमूर्धन्यतां
प्रागेवाद्य सरीसरीति यशसां पूरो दिशामन्तरे[4] ।
अग्रे चैव चरीचरीति विबुधश्रेणीविनोदोत्सवः[5]
पश्चात्तत्र[6] शठद्विषस्सुरुचिरा जागर्ति काचित्कृपा ॥१४८॥

अत्र शठजित्कृपारूपकारणात्पूर्वमेव तत्कार्यभूतसर्वज्ञमूर्धन्यताधरणादेर्वर्ण्यमानत्वादत्यन्तातिशयोक्तिः ।

---

१. M_1, My_2—°लवन°
२. My_1—भूमावह
३. M_1, M_2, M_3 & My_2 omit हेतूनां
४. M_1, M_2, My_1—दशां
५. M_1, M_3, My_1, My_2—°उत्सवं
६. M_1, M_2, M_3, My_2—तस्य

अथ तुल्ययोगिता निरूप्यते । सापि त्रिविधा । वर्ण्यावर्ण्यैकधर्मान्वयरूपा, हिताहितवृत्तितौल्यरूपा, उत्कर्ष[1]समीकरणोक्तिरूपा चेति । तत्राद्या पुनर्द्विविधा । केवलप्रकृतगोचरा, केवलप्रकृतगोचरा चेति । यत्र केवलप्रकृताना[2]मेकधर्मान्वयः तत्र केवलप्रकृतगोचरा । यत्र केवलाप्रकृतानामेकधर्मान्वयः तत्र केवलाप्रकृतगोचरा । अत्रेदं लक्षणम् ।

वर्ण्यानामप्यवर्ण्यानामेकधर्मान्वयः पुनः ।
यत्रोपवर्ण्यते तत्र गीयते तुल्ययोगिता ॥१४९॥

तत्र केवलप्रकृतगोचरा यथा—

हेयाहेयविवेचनौपयिकतारूढास्समूढागम-
स्वार्था मेदुररागयोगतरला विज्ञानभावोदयाः ।
संस्कृत्यन्तरमुत्कटाक्षसुमुखा यातास्समुन्मीलनं
दृक्पाताश्शठवैरिणस्तनुभृतश्चान्तःप्रसादश्रिया ॥१५०॥

अत्र शठवैरिणः निर्हेतुका[3]ङ्गीकारवर्णनवैभवे तदीयत्वेन प्रकृतानां दृक्पातानां तनुभृतां च समुन्मीलनप्राप्तिरू[4]पैकक्रियान्वयः । केवलाप्रकृतगोचरा यथा—

शठारातेर्वा[5]चां मधुरिमधुरीणैकवपुषां
कणोऽप्येकः कर्णान्तरचुलकपीतो भवति यैः ।

---

१. M_2, M_3—उत्कृष्ठ°

२. M_1—अप्रकृतानां

३. My_1, My_2—निर्हेतुनाङ्गीकार°

४. M_1—°प्रवृत्तिरूपेण; M_2, My_2—°प्रकृतरूपैक°; M_3—°प्रवृत्तिरूपैक°

५. M_1, M_2, My_1—वाच्यां

न किं सूते चेतः प्रसवरसमाध्वीनवसुधा—
गुडक्षौद्रक्षीरप्रभृतिकटुतानादरभरम्[1] ॥१५१॥

अत्र शठवैरिवाणीमधुरिमणि वर्णनीयत्वेन प्रस्तुतेऽवर्णनीयानां[2] प्रसवरसादीनां कटुतैकगुणान्वय इति भवति तुल्ययोगिता। हिताहितवृत्ति-तौक्ष्यरूपा यथा—

यत्र मित्रे च शत्रौ च यदि व्यापारतुल्यता।
वर्णिता कविभिस्तत्र मता सा तुल्ययोगिता ॥१५२॥

यथा—

समाधत्ते शठारातिर्हिते हृदयहारिताम्।
अहिते च समाधत्ते नित्यं हृदयहारिताम् ॥१५३॥

अत्र हृदयरञ्जकत्वाङ्गीकरणस्य हृदयभेदकत्वाङ्गीकरणत्वस्य श्लेषेणाभेदाध्यवसानात्[3] हिताहितयोर्विषये हृदयहारितासमाधानरूपैक-विघव्यापारस्तुल्य इति लक्षणसङ्गतिः।

यथा वा[4]—

यः श्रीशठारेश्चरणारविन्दद्वन्द्वाभिनिष्यन्दरसैकतृप्तः[5]।
स निन्दकानन्दकयोर्विधत्ते समानसत्त्वानुगुणानुकूल्यम् ॥१५४॥

---

१. M_1, My_1—°भरः

२. M_1, M_2, M_3—प्रस्तुतेकवर्णनीयानां

३. M_1, My_1, My_2—श्लेषाभेदाध्यवसानात्
M_2—श्लेषेणाभेदेनाध्यवसानात्

४. M_2 omits यथा वा

५. My_1—°तृप्तम्

अत्र दूषकभूषकयोर्विषये स्वान्तःकरणसदृशानुकूल्यविधानरूपतुल्यव्यापारवर्णनात्तुल्ययोगिता । उत्कृष्टसमीकरणरूपा[1] यथा[*]—

औदार्यादिगुणोत्कृष्टैः[+] समानीकृत्य वस्तु यत् ।
वर्ण्यते यत्र तत्र स्यात्[++] कथ्यते तुल्ययोगिता ॥१५५॥

यथा—

धीरो गभीरश्चोदारस्सुमेर्वरुणालयः[2][3] ।
पारिजातश्शठारातिरपि लोकत्रयीमतः ॥१५६॥

अत्र धैर्यादिगुणगरिष्ठैः मेर्वारिभिस्समीकृत्य वर्णनात् तृतीया तुल्ययोगिता । यथा वा[4]—

नित्यैकभोग्यः[**] परशास्त्रदायी सधर्मसंस्थापनकारिरूपः ।
सर्वान्तरङ्गप्रणयी सुपूज्यश्शौरिश्शठारिश्च[5] जगद्धितैषी ॥१५७॥

---

१. M_1, M_3, My_1—उत्कर्ष°

२. My_1—गम्भीरः

३. M_2, My_2—समेरुः; M_3—न मेरुः

४. M_1 omits यथा वा

५. M_1, M_3, My_1 My_2—°प्रणयासुपूज्यः

* M_1 omits the following two verses and the following sentence.

\+ Cf., Ku. Ā., śl: 47a.

++ स्यादित्यनन्वयि पदम् ।

** This verse refers to the five *Avasthās* of the Lord viz. *Para, Vyūha, Vibhava, Antaryāmin* and *Arcā*. For their features and functions see T. Otto Tehrader, *Introduction to the Pāñcarātra and the Ahirbuddnyasaṁhitā*, Adyar Library, Madras, 1916, pp. 35-54.

अत्र हेयप्रतिभट[1]कल्याणगुणोत्कृष्टतया पञ्चावस्थास्ववस्थितेन भगवता शठवैरी समीकृतः । यथा वा—

आयूंषि देहिनामूर्मि[2]जालान्युच्छ्रायभाञ्ज्यपि ।
लीय[3]न्ते बत हन्तैते नाश्रयन्ते शठद्विषम् ॥१५८॥

पूर्वत्र स्तुतिपर्यवसायी, इदं तु निन्दापर्यवसायीतिभेदः[+] । अस्यां तुल्ययोगितायां सिद्धिरिति केषाञ्चिद्व्यवहारः ।

अथ **दीपकं** निरूप्यते । [++]प्र[4]स्तुतैकनिविष्टस्समानो धर्मः प्रसङ्गादन्यत्रोपकरोति । प्रासादार्थमारोपितो दीपो [5]इव रथ्यायामिति दीपसादृश्याद्दीप-

---

१. My_2—°प्रतिभय°

२. M_2—देहिनामूर्ति°

३. M_1, M_2, M_3, My_2—लीयते

४. M_1, M_3—प्रस्तुतैकनिबद्धचमानो
M_2—प्रस्तुतैकनिविष्टैस्समानो
My_1—प्रस्तुतैकनिविष्पत्समानो

५. M_1, M_2, M_3, & My_2 **omits** इव

\+ **Cf.** ***Candrāloka*. III.** 8a : सिद्धिः ख्यातेषु चेन्नाम कीर्त्यते तुल्यतोक्तये ॥

++ **Cf. Ku. Ā., p. 50**

कमित्यन्वर्थसंज्ञा । अत्रेदं लक्षणम् ।

प्रकृताप्रकृतानां च धर्मैक्यं यत्र वर्ण्यते ।
तत्र दीपकमित्याहुरलङ्कारविदो बुधाः ॥१५९॥

यथा—

चन्द्रश्चन्द्रिकया रविस्सुमहसा वीचोचयैस्सागरः
पुष्पैः कल्पतरुस्सुमं परिमलैर्विद्वान्वचःकल्पनैः ।
काव्यं व्यङ्ग्यगुणैर्मणिर्विलसनैर्दातासुपात्रव्ययै-
र्वैदग्ध्यैर्वनिताजनः शठरिपुस्सारैर्गुणैश्शोभते ॥१६०॥

अत्र प्रकृतस्य शठरिपोरप्रकृतानां चन्द्रादीनां शोभारूपैकधर्मान्वया-द्दीपकम् ।

अथावृत्तिदीपकं निरूप्यते । दीपकस्यानेकोपकारकत्वाद्दीपकस्थानीय-[*][1] स्य पदस्य वा[2] अर्थस्य वा[3] उभयोर्वा आवृत्तौ क्रमेण पदावृत्तिदीपकमर्था-वृत्तिदीपकं पदार्थोभयावृत्तिदीपकं चेति त्रिविधमावृत्तिदीपकं भवति । अत्रेदं लक्षणम् ।

आवृत्तिर्दृश्यते यत्र पदस्यार्थस्य वा द्वयोः ।
आवृत्तिदीपकं नाम कथयन्ति कवीश्वराः ॥१६१॥

---

१. My_1—अनेकोपकत्वात्

२. & ३. M^1, M_2, M_3 & My omit वा

* Cf. Op. cit., p. 51

तत्राद्यं[1] यथा—

प्रदीपयत्युक्तिभरं शठारिस्तमोविमोकाय जगज्जनानाम् ।
प्रदीपयत्यन्तरनन्तरूपस्वरूपसम्पद्गुणवेषमेषः ॥१६२॥

अत्र प्रदीपयतीत्येकं पदं वाक्यद्वये आवर्तते । अत्र प्रथमे प्रदीपयतीत्यस्य प्रदीपकमिव करोतीत्यर्थः । द्वितीये प्रकाशयतीत्यर्थः । एवमर्थस्य[2]भिन्नत्वात्पदावृत्तिदीपकम् । अथार्थावृत्तिदीपकं यथा—

उद्घूर्णा ताम्रपर्णी जलभरविचरद्[3]बालवातूललीला
यात्राखेदं जनानां व्यपनयति शठद्वेषिसेवारुचीनाम् ।
सद्यो विद्योतमानाम्बुजरुचिरपदद्वन्द्वशृङ्गारलक्ष्मी-
स्सर्वेषामन्तरान्ध्यं[4] व्यपगमयति च प्रायशः कारिसूनोः ॥१६३॥

अत्र व्यपनयति व्यपगमयतीति पदयोर्भेदे व्यपनोदनरूपार्थस्यैकत्वात्तस्यावृत्तत्वेना[5]वृत्तिदीपकं द्वितीयम् ।

तृतीयं यथा—

वर्धते शठजिदुल्लसद्गुणास्वादनेन सततं सतां गणः ।
वर्धते च तदुरोऽन्तर[6]स्फुरत्केसरावृत्तरसा[7]वलिस्रजः[8] ॥१६४॥

---

१. M_1 M_2, M_3 My_1—अत्र
२. My_1 adds पदा
३. M_2—°विचलत्°
४. M_1 My_1, My_2—°आढ्य°
५. M_2—आवृत्तत्वात्
६ My_1—तमरोन्तर°
७. My_1—°केनर°
८. My_1—°अवलिवज्रः

अत्र वृद्धिप्राप्तिरूपार्थस्य वर्धत इति पदस्य चोभयोरप्यावृत्तत्वादुभयावृत्तिदीपकम् ।

अथ **प्रतिवस्तूपमा** निरूप्यते । *यत्रोपमानोपमेयपरवाक्ययोः एक एव साधारणधर्मः पृथग्भिन्नपदाभ्यां प्रतिपाद्यते तत्र प्रतिवस्तूपमा । प्रतिवस्तु प्रतिवाक्यार्थमुपमासाधारणधर्मो यस्यास्सेत्यन्वर्थसंज्ञा । अत्रेदं लक्षणम् ।

यत्रोपमानोपमेयपरयोर्वाक्ययोर्भवेत् ।
एकस्साधारणोधर्मः प्रतिवस्तूपमा मता ॥१६५॥

यथा—

विस्तारयति सौरभ्यं सन्तानस्सुमसम्पदा ।
विशालयति सौलभ्यं शठारिर्गुणसम्पदा[1] ॥१६६॥

अत्र सन्तानशठवैरिणोरूपमानोपमेयभावः । तथा चोपमानोपमेयप्रतिपादकवाक्ययोर्विस्तृति[2]करणरूप एकस्साधारणो धर्मः विस्तारयति विशालयतीति पृथक्पदाभ्यां निर्दिश्यत इति लक्षणसङ्गतिः । यथा वा—

प्रभूतहृदयज्वरज्वलनशान्तिकृत्कान्तिभि-
विना शठजिदुक्तिभिः किमपरा सतां[3] जीविका ।

---

१. M_2—विस्तारयति सौलभ्यं शठारिर्गुणसम्पदा ।
विलासयति सौलभ्यं सन्तानपुष्पसम्पदा ॥

२. M_1, My_2—विस्मृति°

३. M_1, M_3, My_2—नता; M_2—वतां

* Cf. Op. cit., p. 52.

चिरन्तनपरिश्रमातिशयदूरनिर्वापणीं[1]

विहाय मरुतां सुधां न हि परास्ति वृत्तिक्रिया[2] ॥१६७॥

अत्रोपमानोपमेयपरवाक्ययोर्जीवनाभावस्साधारणधर्मः पृथक् निर्दिष्ट इति भवति प्रतिवस्तूपमा । नन्वर्थावृत्तिदीपकापेक्षया अस्याः को भेद इति चेदुच्यते । अर्थावृत्तिः* प्रस्तुतानामप्रस्तुतानां वा[3] भवति । प्रतिवस्तूपमा तु प्रस्तुताप्रस्तुपानामिति[4] विशेषः[5] । अर्थावृत्तिदीपकं वैधर्म्येण न सम्भवति । प्रतिवस्तूपमा तु वैधर्म्येणापि सम्भवति । यथा—

शठारिरेषामनपेक्षणेऽपि प्रकाशयत्येव परं तु तत्त्वम् ।

न हि प्रभामण्डलमात्मनिष्ठं सङ्कोचयत्यम्बुजिनीभुजङ्गः[6] ॥१६८॥

यथा वा[7]—

शठजित्करुणापाता मय्येव दुरिताकरे[8] ।

न हि[9] वारिपरोवाहो वहत्युन्नतभूतले ॥१६९॥

---

१. M_1—°परिक्लमातिशन्दूरं; M_2—°परिक्लमातिशय°; My_1—परिक्षमातिशय°

२. M_1—न हि पासितवृत्ति°; M_2—न हि वशस्ति वृत्ति°; My_1—न पापरास्ति वृत्ति°

३. M_1,M_3, & My_2 omit वा

४. M_1, M_2, My_1 My_2—प्रस्तुतानां for प्रस्तुताप्रस्तुतानां

५. M_2—अर्थावृत्तिस्तु प्रस्तुतानां भवति ।
प्रतिवस्तूपमा तु प्रस्तुतानामप्रस्तुतानामिति विशेषः ।

६. M_1, M_3, My_1, My_2—अम्बुजनी°

७. My_2—omits वा

८. M_1, M_3, My_1, My_2—दुरिताकले

९. M_1, M_3, My_1 —नवा

अथ **दृष्टान्तालङ्कारो** निरूप्यते। +यत्र[1]ोपमानोपमेयपर[2]वाक्ययोर्भि-न्नावेव धर्मौ[3] बिम्बप्रतिबिम्बभावेन निर्दिश्येते तत्र दृष्टान्ताख्योऽलङ्कार इति निष्कर्षः। अत्रेदं लक्षणम्।

भिन्नौ धर्मौ[4] पृथक् बिम्बप्रतिबिम्बतया[*] यदि।
वाक्ययोर्यत्र निर्दिष्टौ तत्र दृष्टान्त उच्यते ॥१७०॥

यथा—

विद्वांसश्शतशो भवन्तु यदिदं वाक्यार्थबुद्धिस्पृशो
दुर्वादिप्रबलोक्ति[5]पाटनविधिं धत्ते शठानामरिः।
खद्योतांश्च[6] कनन्त[7] एव दिशिदिश्यर्कस्तु भूमि[8]नभः-
क्रान्तध्वान्तवितानखण्डनकलापाण्डित्यमाढौकते[9] ॥१७१॥

---

१. M1, M3—अत्र
२. M1 & M3 omit पर
३. M2—भिन्नवैधर्म्यौ
४. M1, M3, My1—धर्मौ भिन्नौ
   My1—धर्माभिन्नौ
५. M2—°प्रसवोक्ति°
६. M1—खद्योतः
७. M1—किगन्त; M3—किनन्त
८. My1—भूमि
९. M2--आदौ कलेः
* 'यदि' इत्यनन्वयि पदम्।
* Cf. Ibid., p. 55

अत्र शठारिरूपनेयभूतः अर्क उपमानभूतः । तत्परवाक्यद्वो[1]र्भिन्नयोरपि दुर्वादिवादपाटनदुर्वारतिमिरखण्डनयोस्सादृश्यादभिन्नयोस्सामान्यधर्मत्वेन पदभेदेन निर्देशात् दृष्टान्तालङ्कारः । वैधर्म्येणाप्ययं दृश्यते । यथा (वा)—

सतश्शठारिप्रवणान्[2] जनोऽयमत्येतु[3] किं तेन[4] महत्वहानिः ।
न[5] हि द्विपेन्द्रे नरनाथयोग्ये प्रयाति घोषैः प्रबलैर्निजैश्वा[6] ।।१७२।।

अत्र वैधर्म्येण बिम्बप्रतिबिम्बभावः ।

अथ **निदर्शनालङ्कारो** निरूप्यते । सा च त्रिविधा । वाक्यार्थवृत्तिनिदर्शना, पदार्थवृत्तिनिदर्शना, सदसदर्थबोधनरूपा चेति । अत्रेदमाद्याया लक्षणम् ।

***यत्र वाक्यार्थयोरैक्यारोपस्सदृशयोर्भवेत् ।**
वाक्यार्थवृत्तिरूपेति मता तत्र निदर्शना ।।१७३।।

यथा—

अन्यो वदान्योऽस्ति[7] यदुर्विभागे नाथं शठद्वेषिरणमन्तरेण ।
तदद्य वन्ध्यासुतरूपदृष्टिर्व्योमारविन्दामृतपानसिद्धिः ।।१७४।।

---

१. My_2—°द्वये

२. M_2—शठारिः प्रणवात्

३. M_2 – अन्येतु

४. M_1, My_2—तन

५. M_1, M_3, My_2—स

६. M_1, M_2—निजैर्वा

७. M_1, M_3, My_2—यदन्योऽस्ति

* Cf. Op. cit., śl. 53a.

अत्र शठवैरिव्यतिरेकेण वदान्यान्तरसद्भावस्य वन्ध्यासुतरूपख[1]-पुष्पादेश्च[2] यत्तत्पदाभ्यामैक्यारोपाद्वाक्यार्थवृत्तिनिदर्शना ।

पदार्थवृत्तिरूपा निरूप्यते[3] । यत्रान्यस्मिन्पदार्थेऽन्यधर्मस्यान्वयो वर्ण्यते तत्र पदार्थवृत्तिनिदर्शनेत्युच्यते । अत्रेदं लक्षणम् ।

अन्यधर्मान्वयोऽन्यत्र[4] पदार्थे यदि वर्णितः ।
पदार्थवृत्तिरूपां तामन्यामाहुर्निदर्शनाम् ॥१७५॥

यथा—

धम्मिल्लबन्धश्शठकोपसूरेर्निरर्गलश्यामलताभिरामः ।
धत्ते प्रसूनासवसारपानप्रकर्षमत्तभ्रमराङ्गलक्ष्मीम् ॥१७६॥

अन्यधर्मस्य लक्ष्मीपदार्थस्यान्यत्र शठरिपुधम्मिल्ले समारोपादत्र पदार्थवृत्तिनिदर्शना । यथा वा—

प्रणतमनुजमूर्धप्राप्तयोः[5] कारिसूनो-
रुणचरणपाथोजातयोर्यो[6] विलासः ।
तमनुभवति साक्षादिन्द्रनीलचललाग्र-
प्रसरदपरसन्ध्याभागरागप्रपञ्चः ॥१७७॥

---

१. M_1, M_3, My_1 & My_2 omit ख

२. My_1—°दृष्टचादेः

३. M_1, M_2, M_3 & My_2 have निदर्शना यथा instead of निरूप्यते

४. M_1, My_1 My_2—यत्र

५. °मूर्ध° is the emended reading. All mss read °मूर्धा

६. M_1, M_3, My_1—°जातयोर्वो; M_2—°जातयोर्ये

अत्रान्यदीयस्यारुण्य[1]विलासस्यान्यत्र वर्णनात्पदार्थवृत्तिनिदर्शना । *पूर्वत्रोपमेये उपमानधर्मारोपः । इह तूपमाने उपमेयधर्मारोप इति भेदः । उभयत्राप्य[2]न्य[3]धर्मस्यान्यत्रासम्भवात्तत्सदृशधर्मापेक्षणादौपम्ये[4] पर्यवसानं तुल्यम्[5] ।

अथसदसदर्थबोधनरूपा निदर्शना निरूप्यते। सा द्विविधा । सदर्थ-बोधनरूपा, असदर्थबोधनरूपा चेति । यत्र यः कश्चन पदार्थः काञ्चित्क्रियां कुर्वन् सन् तया क्रियया दृष्टान्तया परान्प्रति सन्तमसन्तं वाथ ज्ञापयन्स-न्निबध्यते तत्रेयं निदर्शना । अत्रेदं लक्षणम् ।

अन्यस्य[6] कस्यचित्स्वीयक्रियया यत्र बोधनम् ।
सतो वाप्यसतोऽर्थस्य तदप्यन्या निदर्शना ॥१७८॥

---

१. M_1, M_3, My_1, My_2 —अन्यदीय्यस्वारुण्य°

२. My_1—उभयस्यापि

३. M_1, M_2, M_3 & My_1 add स्य after अन्य

४. My_2 —°धर्मापेक्षे पादौपम्ये

५. My_1—समानम्

६. अन्यस्य is suggested. M_2—अत्रास्य
M_1, M_3, My_1, My_2—अर्थस्य

* Cf. Op. cit., p. 57.

यथा—

गौरवेऽपि विनयेन भूयतामित्युदञ्चितफलैकपुष्कलाः ।

शालयः[१] शठरिपोः पुरःक्षितौ नम्रभावमुपयान्ति सर्वतः ।।१७९।।

अत्र शालयः[२] फलगौरवेण नम्राः[३] सन्तस्तया नमनक्रियया दृष्टान्तभूतया गुरुत्वसम्भवेऽपि विनयेन भवितव्यमिति[४] परान्प्रतीमं[५] श्रेयस्करमर्थं[६] बोधयन्तः निबद्धा इति सदर्थबोधनरूपेयं निदर्शना । असदर्थबोधनरूपा यथा—

विभवोदयस्[७]सपदि भङ्गुरो भवे-

दिति वप्रमण्डलगता झषोत्[८]कराः ।

क्षणमात्रचञ्चलविवल्गनैरदृ-

ग्विषया भवन्ति शठवैरिपट्टणे ।।१८०।।

---

१. M_1, M_3, My_2—शालमयः

२. M_1, M_3—शालमलयः; My_2—शालमयः

३. M_2—नताः

४. M_1, M_2, M_3, My_2—भवतीति

५. M_1—अवनम्यापरान्यप्रति

M_2—अवनतान्परान्प्रति

M_3, My_2—अवमतापरान्प्रति

६. M_1—अर्थः

७. M_1, My_1, My_2—°उदयाः

८. This is the suggested reading

M_1—तीव्रववृद्धयन्तझष°

M_2—तीव्र............झष°

M_3—तीव्रवप्रम्यन्तझष॰; My_1—वप्रमण्डलझष°

My_2—तीव्रप्रमन्तझोझष°

अत्र केदारगता मीनगणाः क्षणचञ्चलविवल्गनो[1]पलक्षिताः तथैवा-दृष्टास्[2]सन्तः[3] निजया[4] क्रियया[5] दृष्टान्तभूतया विभवोऽपि क्षणविलसित एव, भङ्गुरस्सन्नदृष्टो[6] भवेदित्यनिष्टपर्यवसायिनमर्थं बोधयन्तो निबद्धा इत्यस-दर्थबोधनरूपा निदर्शना ।

अथ **व्यतिरेको** निरूप्यते । स च त्रिविधः । उपमेयाधिक्यपर्यव-सायी, उपमेयन्यूनत्वपर्यवसायी, अनुभयपर्यवसायी चेति । अत्रेदं लक्षणम् ।

वर्ण्यते यत्र वशिष्ट्[7]यमुपमानोपमेययोः ।
कथ्यते व्यतिरेकोऽयमलङ्कारो विचक्षणैः ॥१८१॥

अत्र उपमेयाधिक्यपर्यवसायी यथा—

कलाविशेषैस्सुमनःप्रहर्षं[8] करोति चानन्दपदप्रसादम्[9] ।
राकासुधाभानुरिवाभिरामोऽप्ययं शठारिर्भुवि निष्कलङ्कः ॥१८२॥

---

१. M_1, M_3, My_1—°विवल्गिना
२. M_1, M_3, My_1, My_2—दृष्टाः
३. My_1—सतः
४. My_1—तया for निजया
५. M_1 omits क्रियया
६. M_2, omits अदृष्टो. Space left.
७. My_1,—वैशेष्यं
८. M_2—करालशेषैस्सुमनःप्रकर्षं
९. M_2—°प्रसादः

अत्रोपमानचन्द्रापेक्षया निष्कलङ्कत्वादिना शठरिपोराधिक्यवर्णनादयमुपमेयाधिक्यपर्यवसायी व्यतिरेकः । तन्न्यूनत्वपर्यवसायी यथा—

भोगाभोगैरसदृशमहङ्कारधारास्सृजन्तः
क्ष्वेलासारं वदनकुहरादुद्गिरन्तः[१] करालम् ।
क्रूराकाराः कुटिलगतयो दुर्जना निर्जयन्ति[२]
च्छिद्रोत्क्रान्ति[३] क्वचिदपि फणिव्रातवच्छ्रीशठारे ॥१८३॥

अत्र फणिनां क्वचिच्छिद्रनिष्क्रमणमस्ति । दुर्जनानां तु सर्वदा [४]न तदस्तीत्युक्त्या उपमेयन्यूनत्व[५]पर्यवसायी व्यतिरेकः । अनुभयपर्यवसायी यथा—

***भ्रमरहितस्य दानभरवासितदिक्समितेः**
परबलभङ्गमङ्गलकरस्य महत्वजुषः ।
जलजडतानिबर्हणकृतस्त्वियमाकृतितः
करितनयस्य कारितनयस्य च भेदकथा ॥१८४॥

---

१. M_1, M_3, My_1, My_2—उत्किरन्तः

२. This is the emended reading.
M_1, M_3, My_2—दुर्जनानां जयन्ति
M_2—दुर्जनानर्जयन्ति; My_1—दुर्जनान्निर्जयन्ति

३. M_1, My_1—°उत्क्रान्तीः

४. M_1, M_2, My_1 & My_2 omit न

५. M_2, M_3, My_1, My_2—°न्यूनता°

* My_1 alone has this verse and the following paragraph. All other mss. omit this portion.

आकृतिराकारो रूपं द्वितीयस्वरवर्णश्च । अत्र आकृतिमात्रेण भेदः अन्यत्सर्वमविशिष्टमित्युपमानोपमेययोः न्यूनाधिकत्वाभावादनुभयपर्यवसायी व्यतिरेकः ।

अथ **सहोक्ति**र्निरूप्यते । अत्रेदं लक्षणम् ।

सहभावो जनानन्दकरः कस्य च केनचित् ।
वस्तुनो वर्ण्यते यत्र सहोक्तिस्तत्र कथ्यते ॥१८५॥

*अत्र जनानन्दकर इति विशेषणोपादानेन +"अनेन सार्धं विहराम्बुराशे"रित्यादौ न सहोक्तिः[१] तत्र[२] सहभावस्य चारुतातिशयहेतुत्वाभावात् । यथा—

उरस्तरलविस्फुरद्बकुल[३]मालिकासौरभ-
प्रलोभविवशा इव प्रणतलोकदृक्पङ्क्तयः ।
उपर्युपरि सम्भ्रमद्भ्रमरडिम्भसङ्घैस्समं
विशन्ति शठवैरिणो विमलभाग्रहे विग्रहे ॥१८६॥

अत्र दृक्पङ्क्तीनामलिभिस्सहभाववर्णनस्य चमत्कारशालित्वात्सहोक्तिरलङ्कारः । यथा वा—

नानादिङ्मुखविश्रान्तास्सूक्तयश्शठवैरिणः ।
वादिभिस्सह दुर्दान्तसिद्धान्तविनिपातितैः ॥१८७॥

---

१. M_1, M_2, My_1, & My_2 add fullstop.

२. M_1, M_3, My_2—अत्र

३. M_1, M_2, My_1—°विस्फुरत्तरल°

* Cf. Ku. Ā., p. 64.

\+ *Raghuvaṃśa*, VI. 57.

अथ **विनोक्तिर्**निरूप्यते । सा च द्विविधा । किञ्चिद्विना हैन्यरूपा, किञ्चिद्विना रम्यरूपा चेति । अत्राद्याया इदं लक्षणम् ।

यत्र*[1] किञ्चिद्विना वस्तु प्रस्तुतं हीनमुच्यते ।
विनोक्तिरिति विख्याता तत्रालङ्कृतिरिष्यते ॥१८८॥

यथा—

सम्पदस्सकलवस्तुपुष्कलास्सर्वदोन्नतिपदोपपादिकाः ।
कारिसूनुसुपदर्पणं[2] विना हेयतामनुभवन्त्य[3]धोऽप्यधः ॥१८९॥

अत्र सम्पदां सर्वप्रकारो[4]त्कर्षहेतुत्वेऽपि वि[5]शिष्टपात्रा[6]र्पणं विना हैन्य-वर्णनाद्विनोक्तिः । यथा वा—

शठारेऽचरणाम्भोजमयूरवैरान्तरं तमः ।
येन निघ्नन्त्युपघ्नन्ति जना हैन्यसमुन्नतेः ॥१९०॥

अत्र सकलदोषनिवर्तकशठवैरिचर[7]णतामरसध्यानं वि[8]ना पुरुषाणां हीनत्वं विनाश[9]ब्दमन्तरेण दर्शितम् ।

---

१. M_1, My_2—अत्र
२. सुपदर्पणं is suggested while all mss. read समदर्पणं
३. M_1, M_2—अनुभवति
४. My_1 omits सर्वप्रकार
५. My_2 omits वि
६. My_1—°पादार्पणं
७. My_1 omits चरण
८. My_1 has हि instead of विना
९. M_2—हि ··विना
* Cf. Ku. Ā., śl. 59a,

द्वितीयाया लक्षणमुच्यते *।

यत्र किञ्चिद्विना वस्तु प्रस्तुतं रम्यमुच्यते ।
तत्रापरा विनोक्तिस्स्याद्भुवि चित्तानुरञ्जनी ॥१६१॥

यथा—

वाचां प्रपञ्च इव रोषगणैरपेत-
श्चक्षुःप्रकाश इव काचविकारदूरः ।
योगप्रकार[1] इव दुर्विषयैरभिन्नो
रम्यश्शठारिजन एष विना तमोभिः ॥१६२॥

अत्र शठवैरिसम्बन्धिजने अविद्यादिदोषै[2]र्विना रम्यत्ववर्णनाद्विनोक्तिः ।

अथ **समासोक्ति**र्निरूप्यते । समासेन संक्षेपेण प्रस्तुताप्रस्तुतवृत्तान्तयोरुक्तिः वर्णनमित्यन्वर्थसंज्ञा । अत्रेदं लक्षणम् ।

यत्र प्रस्तुतवृत्तान्ते वर्ण्यमाने प्रतीयते ।
अप्रस्तुतस्य वृत्तान्तस्सा समासोक्तिरुच्यते ॥१६३॥

यथा—

सञ्जातनूतनरसामसकृत्समीक्षा-
युक्तामदृष्टसमयान्तरमर्थयन्तीम् ।
अन्तर्विनोदनमनाकुलितं शठारि-
स्संश्लिष्यति प्रियतमो महतां मनीषाम् ॥१६४॥

---

१. My_2—°प्रकाश

२. M_1—अविद्यविदूष्यैर्विना; M_2—अविद्याविदोदैर्विना; M_3—अविद्याविदूष्यैर्विना

* Cf. Op. cit., śl. 60a.

अत्र सञ्जातः नूतनो रसो भक्तिर्यस्यास्तथोक्ताम् । अदृष्टसमया-न्तरं अदृष्टानि अत्यन्तहेयत्वादनवलोकितानि समयान्तराणि दर्शनान्तराणि यस्मिन्कर्मणि तत्तथा । असकृत्समीक्षायुक्तां असकृत्सर्वदा समीक्षया सम्यक्तत्त्वविचारेण युक्तामभियुक्तां तथा अनाकुलितं तापत्रयव्यसनै[1]रक्षु-मितं अन्तर्विनोदनं मनःप्रसरणमर्थयन्तीं प्रार्थयमानां तथाभूतां महतां सतां सम्बन्धिनीं मनीषां अध्यवसायात्मिकां बुद्धिं प्रियतमः अत्यर्थं[2] प्रियः शठारिः संश्लिष्यति ध्येयविषयतया (अत्र) सङ्गच्छत इत्यर्थः । एवं प्रस्तुतवृत्तान्ते वर्ण्यमाने सम्भूता[3]भिनवशृङ्गारां नायकागमनं कदा कदेति प्रतिक्षणं तदा-गमनमेव प्रतीक्षमाणां[4] इतः परं सम्भोगसमुचितकालान्तरासम्भावनया निष्कण्टक[5]स्वच्छन्दविहारमभिलषन्तीं महापुरुषसम्बन्धोपस्कृतां मनीषा-शब्दगतस्त्रिल्लिङ्गेन प्रतीयमानो नायकः अभिमतस्सन्नालिङ्गतीत्येवंरूपो महत्[6]सम्बन्धोपस्कृतवराङ्गनालिङ्ग[7]नप्रवृत्तो[8] नायकवृत्तान्तः प्रतीयते इति[9] भवति[10] समासोक्तिः ।

---

१. M_2—°त्रयस्य शनैः

२. M_2—ग्रसत्सार्थं

३. M_1, M_3—संहृत°

४. M_1, M_2, M_3, My_1—प्रवीक्षमाणां

५. M_2 omits ण्ट. Space left.

६. M_1—दृक्° instead of महत्°

७. M_1—°पराहना°

८. M_3, My_2—°प्रवृत्तौ

९. M_1 & M_3 add इत्थं

१०. M_2, My_2—सम्भवति

यथा वा—

*क्रीडाखिन्नधनस्तनीतनुलतास्वेदापनोदक्रिया-
शीलः क्वाप्यनवस्थितः कथमपि स्पर्शे स्ववाप्तोद्यमः ।
सायं प्रातरनर्गलैः परिमलैरात्मानमाख्यापयन्
वाति श्रीनगरेऽनिलो नवतरः श्रीताम्रपर्णीसखः ॥१९५॥

अत्र मन्दानिलवृत्तान्ते[1] वर्ण्यमाने क्रीडाखिन्नेत्यादि[2]विशेषणसाधारण्यात्कामुकवृत्तान्तः प्रतीयते। पूर्वोदाहरणे विशेषणानि श्लिष्टानि, अत्र साधारणानीति भेदः[3]। यथा वा—

चारुगीतं वितन्वानो वकुलामोदलोलुपः ।
स्पृहणीयगतिश्चित्ते शठजिद्वलते सताम् ॥१९६॥

अत्र प्रकृतवृत्तान्ते विशेषणसाम्यात्[4]कमलसञ्चारचतुरभृङ्गवृत्तान्तः[5] प्रतीयते ।

अथ **परिकरा**लङ्कारो निरूप्यते। अत्रेदं लक्षणम् ।

+विशेषणानि गृह्यन्ते साभिप्रायाणि यत्र[6] तु ।
प्राहुर्धीराः परिकरमलङ्कारं रसावहम् ॥१९७॥

---

१. M_1—वृन्दानिल°

२. M_1, M_2, M_3 & My_2 omit क्रीडाखिन्नेत्यादि

३. My_2—भावः

४. My_1—°समात्

५. M_1, M_2, M_3, My_2—कमलसञ्चारीभृङ्ग°

६. M_1, M_2, M_3, My_2—तत्र

* M_1, M_2, M_3, My_2 omit this verse.

\+ Cf. Ku. Ā., śl. 62a.

यथा—

मरन्दधारामधुरोक्तिपू[1]रैर्विकस्वरैः केसरमाल्यसङ्घः ।
अलङ्कृतस्सुन्दरमन्दहासश्शठारिरन्तर्ज्व[2]लनं क्षिणो[3]ति ॥१९८॥

अत्र मरन्देत्यादिविशेषणानि हृदयगत[4]तापक्षपणसामर्थ्याभिप्रायगर्भाणीति भवति परिकरालङ्कारः ।

अथ **परिकराङ्कुरो** निरूप्यते । अत्रेदं लक्षणम् ।

विन्यस्यते विशेष्यं[5] तु यत्राभिप्रायगोचरम् ।
वदन्ति तत्रालङ्कारं धीराः परिकराङ्कुरम् ॥१९९॥

यथा—

अनादिमायापरिवृत्तिभेदैर्येये विरोधाः प्रभवन्ति पुंसाम् ।
नि[6]र्हन्ति तांस्तान्[7]भगवत्प्रबोधप्रत्यूहरूपान् परितश्शठारिः ॥२००॥

अत्र शठारिरिति विशेष्यं तस्य[8] *शठनिरासकत्वात्सकल[9]विरोधनिबर्हणसामर्थ्याभिप्रायगर्भमिति परिकराङ्कुरः ।

---

१. M_2, My_1—°पूरः
२. M_1, M_3, My_2—°ज्वलसं; M_2—अन्तस्खलनं
३. My_1 –क्षणोति
४. My_1 omits गत
५. M_1, M_2, M_3, My_2—विशेषः
६. M_1, My_2—नयन्ति; M_2, M_3— नियन्ति
७. M_1, My_2—तां सतान्
८. M_2—तत्र
९. M_1 —शठारिरासोक्त्या सकल°
M_2 My_2 —शठनिरासकतो सकल°
M_3—शठनिरासकतोक्त्या सकल°

* Nammāḷvār is said to have conquered the breath (Śaṭha) which causes transmigration and hence his name *Śaṭhāri*. See K. C. Varadachari, *Ālvārs Of South India*, p. 142

अथ श्लेषालङ्कारो निरूप्यते । स च त्रिविधः[1] । प्रकृतानेकगोचरः, अप्रकृतानेकगोचरः, प्रकृताप्रकृतानेकगोचरश्चेति । अत्रेदं लक्षणम् ।

***प्रकृताप्रकृतानेकगोचरोभयगोचरा[2] ।**
नानार्थसंश्रया श्लेषालङ्क्रिया कथ्यते बुधैः ॥२०१॥

केवलप्रकृतपरकेवलाप्रकृतपरतदुभयविषयशब्दविन्यासरूपस्त्रिविधः श्लेष इति लक्षणार्थः[3] । तत्र केवलप्रकृत (अनेक)[+] गोचरो यथा—

सहसा ननु कारिभूविभुर्मम चेतः कुरुते वशंवदम् ।
हितदो रसिकः श्रिया ज्वलन् सविशेषः कृतवंशपूरणः ॥२०२॥

अत्र कारिभूविभुः शठवैरी मम चेतः सहसा वशंवदं कुरुते ननु इत्येकोऽर्थः । भूविभुर्विष्णुः । अननु[4]कारिविषयान्तरसञ्चार[5]सद्भावाद्भगवदनुवर्तनर[6]हितमित्यर्थः । शठवैरिपक्षे हितदः पुरुषार्थसाधनप्रदः, रसिकः भक्तिमान्, श्रिया वैष्णवलक्ष्म्या ज्वलन्, सविशेषः वैलक्षण्ययुक्तः[7], कृत[8]वंशपूरणः[++] कृतं[9] वंशस्य वैष्णवसन्तानस्य पूरणं येन तथोक्तः । तस्य कूटस्थ-

---

१. M_2, My_2—द्विविधः
२. M_1—°गोचरानेकगोचरा
३. M_1—लक्ष्यार्थः; M_2—लक्षणात्
४. My_1, My_2—ननु कार्यननुकारि°
५. M_2 omits सञ्चार
६. M_1, M_2, M_3, My_2—°अनुभवरहितं
७. M_1, M_3, My_2—वैलक्षण्योक्तः
M_2—कृतं
९. M_1, M_2, My_1, My_2—कृत
* Cf. Ku. Ā., śl. 64a.
\+ उद्देशानुरोधेन 'अनेक' इति पदेन भाव्यम् ।
++ Cf. śl. 42 above.

त्वादिति भावः । भगवत्पक्षे हितदोरसिकः हिताः सङ्गताः दोर्षु असयश्च[1]-क्रादिरूपाः यस्य तथोक्तः । स्वार्थे कप्रत्ययः । श्रिया श्रीदेव्या[2] ज्वलन्, सविशेषः विः गरुडः, शेषः अनन्तः, ताभ्यां सहितः, कृतवंशपूरणः[3] कृतं वंशस्य वेणोः पूरणं येन तथोक्तः । एवञ्च स्तोतव्यत्वेन प्रकृतयोश्शठवैरि-मधुवैरिणोः श्लेष इति भवति केवलप्रकृतानेकगोचरः[4]। केवलाप्रकृतानेक[5]-गोचरो यथा—

प्रवालमसृणौ पादौ[6] विजयेते[7] शठद्विषः ।
सुहृद्यशरराशिस्थं विरोचनकराहतम् ॥२०३॥

प्रवालं विद्रुमं किसलयञ्च, विद्रुमपक्षे सुहृद्यशरराशिस्थं अति-मनोहरसमुद्रस्थितं[8], विरोचनकराहतं विरोचनकरं प्रकाशनकरं आहतं

---

१. असयः is the emendation for अनयोः

२. My_1 omits श्री

३. M_1, M_2, My_1 & My_2 omit the *anusvāra*.

४. M_1, M_2, M_3 & My_2 omit केवल

५. M_1, M_2, M_3, & My_2 omits अनेक

६. पादौ is suggested. M_1, omits this word.
M_2 M_3, My_2—पाणी
My_1 —पदौ

७. M_2 —किसलयञ्च instead of विजयेते
My_1—विजयते

८. M_1 —°सुद्र···स्थितं
My_2 —°समुद्रस्थं

खण्डितं च[1], किसलयपक्षे सुहृद्यशरराशिस्थं सुष्ठु हृद्यः हृदिभवः मनसिजः तस्य शरराशिः तत्र तिष्ठतीति तथोक्तः[2] शरकोटिघटितमित्यर्थः । विरोचन-कराहृतं रविकिरणाभिहतम् । अत्र प्रवालपदस्य उपमानत्वेनाप्रकृत[3]वि-द्रुम[4]किसलयगोचरत्वा[5]दप्रकृतश्लेषः । प्रकृताप्रकृतगोचरो यथा—

गुरुरेष लसत्ताराहृदयङ्गमवीक्षणः ।
माधुर्यका[6]व्यसच्छायश्शोभते भावमासनः[7] ॥२०४॥

एष गुरुराचार्यो बृहस्पतिश्च, लसत्ताराहृदयङ्गमवीक्षणः लसद्भ्यां[8] ताराभ्यां कनीनिकाभ्यां हृदयङ्गमानि वीक्षणानि यस्य सः । अन्यत्र लसन्त्याः तारायाः स्वपत्न्याः मनोहराणि वीक्षणानि यस्य सः । माधुर्य-काव्यसच्छा[9]यो माधुर्यप्रधानं काव्यं कविता यस्य माधुर्य[10]काव्यः मधुरकविः तेन सच्छाय इति तथोक्तः, अन्यत्र माधुर्येण काव्यः कविः शुक्रः (तेन) सवर्ण[11] इति तथोक्तः । भावभासनः भावं भासयतीति तथोक्तः तमोनिवर्त-

---

१. M_1, M_2, M_3 & My_2 omit च
२. M_1, M_2, M_3, & My_2 omit the *visarga.*
३. My_1 adds भूत
४. M_1, My_1 & My_2 omit विद्रुम
५. M_1—°गोचरतात्
६. My_1—°कार्य°
७. M_1—भवभासनः; My_1—भावभासः
८. M_2 —लसत्ताराभ्यां; My_2—लसन्तीभ्यां
९. My_1—°सभायः
१०. M_1—°काव्यं
११. M_1 M_2, M_3—सर्ववर्णः

कत्वादिति भावः[1]। अन्यत्र भरूपः नक्षत्ररूपः सन्नवभासत[2] इति तथोक्तः। अत्र शठरिपुः प्रकृतः अप्रकृतः बृहस्पतिरिति प्रकृताप्रकृतश्लेषः[3]।

अथा**प्रस्तुतप्रशंसा** निरूप्यते। यत्राप्रस्तुतवृत्तान्तवर्णनेन प्रस्तुतवृत्तान्तप्रतीतिस्तत्राप्रस्तुतप्रशंसालङ्कारः। अत्र प्रशंसाशब्दः कीर्तनमात्रपरः[4]। तेन यत्र[5] स्तुतिरूपं निन्दारूपं सरूपाख्यानरूपं वा कीर्तनं तत्र सर्वत्राप्यप्रस्तुतप्रशंसा न निवार्यते। यदि प्रशंसाशब्दस्य[6] स्तुतिपरत्वमेव नियम्यते तर्हि निन्दास्थले सरूपाख्यानस्थले च सा न स्यादिति तथोक्तमेव रमणीयम्। अत्रेदं विवेचनीयम्। *अप्रस्तुतवृत्तान्त[7]वर्णनेन प्रस्तुतवृत्तान्तप्रतीतिः प्रस्तुताप्रस्तुतयोस्सम्बन्धे सति भवति[8]। स च सम्बन्धः क्वचित्सारूप्यरूपः[9] क्वचित्सामान्यविशेषभावः[10] क्वचित्कार्यकारणभावश्चेति[11]। तथा चाप्रस्तुतसरूपात्प्रस्तुतसरूपप्रतीतिः अप्रस्तुतसामान्यात्प्रस्तुतविशेषप्रतीतिः,

---

१. M_1—°निवर्तकत्वाभावः

२. M_1, M_2, M_3, My_2—नक्षत्ररूप इव भासत

३. M_1, M_2 & My_2 add इति

४. M_2 omits शब्दः कीर्तनमात्रपरः

५. M_2 omits यत्र

६. M_2—°पदस्य for °शब्दस्य

७. M_1, M_2, M_3, & My_2 omit वृत्तान्त

८. M_2—सम्बन्धेन भवति

९. M_1, My_1, My_2—सरूप्य°

१०. M_2—°विशेषलाभः

११. M_1, My_2—कारणकार्यभावः

* Cf Ku Ā., p. 78.

अप्रस्तुतविशेषात्प्रस्तुतासामान्यप्रतीतिः, अप्रस्तुतकारणात्प्रस्तुतकार्य-प्रतीतिः, अप्रस्तुतकार्यात्प्रस्तुतकारणप्रतीतिः इत्यप्रस्तुतप्रशंसा पञ्च-प्रकारा । अत्रेदं लक्षणम् ।

प्रस्तुतावगतिर्यत्र[१] स्यादप्रस्तुतकीर्तनात् ।
अप्रस्तुतप्रशंसाख्योऽलङ्कारस्तत्र सम्मतः ॥२०५॥

तत्र सारूप्यनिबन्धनाप्रस्तुतप्रशंसना[२] यथा—

क्षीराम्भोनिधिरेक[3] एव जगति श्रेयस्विनामग्रणी-
र्यस्यान्तः परमः पुमान् कमलया शय्यासुखं विन्दति ।
यज्जाताः फलदा भवन्ति जगतां कल्पद्रुमाद्याः परं
यत्रासीच्च सुधाकरस्त्रिभुवनप्रौढप्रकाशोदयः ॥२०६॥

अत्र शठरिपुरेव लोकोत्तरः यस्य हृत्पुण्डरीके सलक्ष्मीकः पुण्डरीकाक्षः वैलक्षण्येन स्फुरति, यद्वंश्याः नाथयामुनप्रभृतयश्चेतनोज्जीवनं कुर्वन्ति, यन्मूलकावतारो[*] यतिवरो विभूतियुगलैश्वर्यधुर्योऽभूदिति[४] प्रस्तुत-

१. M₂—प्रस्तुतादगतिः
२. My₁ —अत्र सामान्यनिबन्धना
३. M₁, M₂ M₃, My₂—एषः
४. M₂—°ऐश्वर्यशय्यो
* Rāmānuja is generally considered to be an incarnation of Ādiśeṣa. Tradition has it that Nammāḷvār gaue the idol of Bhaviṣyadācārya i.e., Rāmānuja to Nāthamuni. See *Prapannāmṛta*, ch. 107. śls. 55-70.

Cf. however *Yatirājasaptati* of Vedāntadeśika where Rāmānuja is said to be an incarnation of Viṣvaksena :

नानाभूतैर्जगति समयैर्नर्मलीलां विधित्सो-
रन्त्यं वर्णं प्रथयति विभोरादिमव्यूहभेदे ।
विश्वं त्रातुं विषयनियतं व्यञ्जितानुग्रहस्सन्
विष्वक्सेनो यतिपतिरभूद्वेत्रसारस्त्रिदण्डः ॥ śl. 32.

वृत्तान्ते वर्णनीये सति[1] तत्प्रत्यायनाय तत्सरूपाप्रस्तुतक्षीरसागरवृत्तान्तो[2] वर्णित इति भवति[3] सारूप्यनिबन्धना[4] ।

यथा वा—

किं काक कर्णकठिनं रटनं करोषि
कस्यादरो भवति तत्र वृथाप्रयासः ।
किं तुल्यमेतदखिलस्पृहणीयभूरि-
क्षेमप्ररोहकरवारिदगर्जनेन ॥२०७॥

अत्र पुरुषार्थाहेतुत्वादनाकर्णनीयस्तव[5] निस्सारोपन्यासः आयासफल एव, लोकोत्तरपुरुषार्थप्रापकशठकोपदिव्यसूक्तिप्रपञ्चेन सदृशः किमिति[6] कस्यचित्प्रतिपक्षिणः प्रसङ्गे निन्द्यत्वेन[7] प्रस्तुते सति तत्सरूपाप्रस्तुत-काकरटननिन्दा[8] प्रस्तुतनिन्दापर्यवसायिनीत्यप्रस्तुतप्रशंसा । सामान्यनि-बन्धना यथा—

---

१. M_2 omits सति
२. M_2—तत्स्वरूप°
३. M_2 omits भवति
४. M_1, M_2, My_1 My_2—सारूप°
५. M_1—अनाकरणीयः
६. My_2—कः for किं
७. M_1—निबुकेन; My_1—निन्दत्वेन
८. M_1—तत्प्रस्तुत°

सारसौरभमरन्दमाधुरीभोगयोग[1]कृतमञ्जुगुञ्जिता[2]: ।
दर्शनीयवपुषश्शिलीमुखाः कस्य चित्तहरणं न कुर्वते ॥२०८॥

अत्र[3] निरतिशयभगवदनुभवपरीवाहरूपदिव्यप्रबन्धगानचतुरश्शठरिपुस्सकलजनमनोहरो भवतीति वक्तव्ये तत्प्रत्यायनार्थं सामान्यमभिहितम् । यथा वा—

पश्य कान्तारपथिका विश्रान्तिं यान्ति न क्वचित् ।
न लभन्ते यतस्तापहरच्छाया[4]तरुस्थलीम् ॥२०९॥

अत्रैते संसारिणः सकलसांसारिकतापहरतया[5] सर्वाश्रयणीयं शठरिपुमलब्ध्वा[6] भ्रमन्ति, त्वं तु सनिर्वेदमद्यैव तमाश्रयस्वेति स्वात्मानं परं प्रति वासमुद्दिश्योपदेशे प्रस्तुते तत्प्रत्यायनार्थं सामान्यमभिहितम् । विशेषनिबन्धना यथा—

निर्घातपातहतिमप्यनवेक्ष्य कुक्षौ
पाथःकणांस्त्रिचतुरानपि मेघमुक्तान् ।
सद्यः क्षिपत्यपि च चातक एष धीरः
क्षोणीजलं कथमपीच्छति नैव साक्षात् ॥२१०॥

---

१. M_2—°हेतु° for °योग°

२. M_2, My_1—°गुम्फिता:

३. M_2 omits अत्र

४. M_2,—लभन्ते यत्र तु सतापहरदायातरु°
M_3—तापहरदां या तरु°

५. My_2—°तापहतया

६. M_1, M_3, —अलभ्य; My_1—उपलब्ध्वा

अत्र मुमुक्षुजनः दोषबाहुल्यमगणयित्वैव क्वचिदप्यवसरे[1] सत्पुरुषोपदिष्टान् कतिचिदुज्जीवनार्थानुपादाय[2][3] तदुपादानफलभूतफलान्तरासङ्ग[4]रहितो वर्तत इति सामान्ये[5] वक्तव्यत्वेन प्रस्तुते तत्प्रत्यायनार्थमप्रस्तुतचातकवृत्तान्तरूपविशेषोऽभिहित इति भवति विशेषनिबन्धना। कारणनिबन्धना यथा—

क्षीराब्धिस्सुरदैत्यमन्थनभिया[6] यावत्सुधासङ्ग्रहा-
त्प्राप्तस्सूक्तिमयत्वमस्य शठजित्सूरेर्ध्रुवं भूयसः।
स्वस्थानानवलोकनेन कमलानाथः कुटुम्बान्वितो
वासार्थी निरतं[7] ततो निविशते तद्वाग्वपुष्यादरात् ॥२११॥

अत्रोपमानत्वादप्रस्तुतेन क्षीराब्धिगततयोत्प्रेक्ष्यमाणेन[8] यावदमृतसङ्ग्रहपूर्वकं शठवैरिवचनतादार्थ्यभजनरूपकारणेन तत्कार्यरूपो वर्णनीयतया प्रस्तुतशठकोपदिव्यसूक्तिगतो लोकोत्तरमाधुर्यविशेषः प्रतीयते। एवं च क्षीराब्धेस्तदुक्तिरूपतापत्त्या वितर्क्यमाणेन[9] गुणविभूत्यादिसहितलक्ष्मी-

---

१. My_2—अनवसरे
२. My_1 & My_2 add अपि
३. My_1—°अर्थं
४. M_2—°अन्तरसङ्ग°
५. My_1—सामान्येन
६. M_1,M_2—°भिदा
७. M_1, M_3, My_2—निगतं; M_2—वासार्थीनि...निगतो
८. M_1, My_2—उत्प्रेक्षमाणेन
९. M_1, My_2—वितर्कमाणेन; My_2 वितर्यमाणेन

पतिगतेन तद्वचनप्रवेश रूपेण कारणेन तत्कार्यरूपं वर्णनीयतया[1] प्रस्तुतंवकुल-[2] भूषणभाषणगतमनन्यपरत्वरूपं वैलक्षण्यं च प्रतीयते। अतस्तदुक्तिमाधुर्य-[3] वैलक्षण्यरूपकार्यप्रस्तावेऽप्रस्तुतकारणयुगलकीर्तनादियमप्रस्तुतप्रशंसा[4] कारण-निबन्धना। कार्यनिबन्धना यथा—

नाथस्य कारितनयस्य मुखारविन्दे
स्वात्मानमिन्दुरुदयन्नवलोकिता स्यात्।
सद्यः प्रविश्य जलधिं तनुमुत्सृजेत
जन्मान्तरे नखविभामपि[5] वा किमृच्छेत् ॥२१२॥

अत्र वर्णनीयत्वेन प्रस्तुते कारिकुमारमुखारविन्दे प्रतिफलित-स्वात्मगतकलङ्कादिदोषदर्शनेन औचित्यात्सम्भाव्यमानेनेन्दुगततनुत्याग-रूपेणाप्रस्तुतेन कार्येण तत्कारणं प्रस्तुतशठरिपुवदनारविन्दगतं लोकोत्तर-नैर्मल्यकैवल्यं प्रतीयते। एवञ्चारनन्तरजन्मनि वा दोषप्रमार्जनेनापि नासौ[6] तन्मुखसादृश्यलक्ष्मीमनुभवितुमर्हति। किन्तु तन्मुखरुचिसाम्यानु-

---

१. My_1—वर्णितया

२. M_1, My_2 omit the *anusvāra.*

३. M_1, M_2, My_1, My_2—°उक्त°

४. M_2, My_1, My_2—°बहुल°

५. M_2—जन्मान्तरेण...विभां

६. प्रनासौ is the emended reading.
M_1—°प्रमार्जनेनाविनाभावौ
M_2—वासौ; M_3—नानौ
My_1—अपि न सा तन्मुख°
My_2—अपि नासातन्मुख°

कारोऽपि सन्दिग्ध इत्युक्त्वा इन्दुगतसम्भाव्यमानो[1]त्तरजन्मसिद्ध[2]निर्दोष-लावण्यवत्ताप्रयुक्ततत्साम्यसन्देहेन हेतुना तत्कार्यरूपः प्रस्तुत[3]शठवैरिनख[4]-रेखानिष्ठः कश्चित्कान्तिप्रकर्षः प्रतीयत इत्यत्रैव कारणनिबन्धना कार्य-निबन्धना चाभिहिता ।

अथ **प्रस्तुताङ्कुरो** निरूप्यते । यत्र प्रस्तुतवृत्तान्तप्रत्यायनाय प्रस्तुतस्यैव वृत्तान्तो वर्ण्यते तत्र प्रस्तुताङ्कुरोऽलङ्कार इति निष्कर्षः । अत्रेदं लक्षणम् ।

प्रस्तुतव्यक्तते[5] यत्र प्रस्तुतस्यैव वर्णनम् ।
प्रस्तुताङ्कुर इत्याहुस्तत्रालङ्कारकोविदाः[6] ॥२१३॥

यथा[7]—

किं कोकिल *शृणु वदामि कदापि काक-
र्मा सङ्गतिं कलय ते हि करालघोषाः ।
अत्यन्तभोग्यमिह पल्लवमास्वदस्व[8]
चूत[9]प्रसूत[10]मनुकूजित[11]मारभस्व[12] ॥२१४॥

---

१. M_1, M_2, M_3, My_2—°गततयोक्त्यसम्भाव्यमान°
२. My_1—सिद्धेः
३. M_3—प्रस्तुतः
४. My_1—°नखि°
५. M_1, My_2—°व्यत्यये
M_2, M_3—°व्यक्तयये
६. My_2—°कोविदः
७. M_1 omits यथा
८. M_1 M_2, M_3, My_2—आस्पदस्य
९. चूत is suggested;
M_1, M_2, M_3, My_2—दूत°; My_1—मात°
१०. M_1, M_3—अपि
११. M_2—अनुकूलितं
१२. M_1, M_3, My_1, My_2—आरभस्य
* The first line is metrically defective.

अत्र कस्य[1]चिद्विचक्षणस्य ब्रह्मचारिणा साकमुद्यानं गतस्य दुष्टजन-साङ्गत्यलोलुपतां विज्ञाय हेऽविवेकिन् ! [2]अविलक्षणसंसर्गं मा कुरु ते हि नानापराधसमारोपणैकप्रयोजनाः तेन तवाधिकारभङ्गस्स्यात् अत इदानी-मत्यन्तभोग्यशठरिपुमुखाविर्भूतदिव्यसूक्तिमास्वाद्य तामनुसन्धत्स्वेति प्रस्तुतवृत्तान्ते वर्णनीये तत्प्रत्यायनार्थं तत्स[3]रूपः प्र[4]स्तुत एव कोकिलवृत्तान्तो वर्णित इति भवति प्रस्तुताङ्कुरः । दिव्योद्यानवर्णनप्रस्तावात्कोकिल-वृत्तान्तोऽपि वर्णनीयतया प्रस्तुत इति नाप्रस्तुतत्वमाशङ्कनीयम् । यथा वा—

काञ्चीगुणस्स्फुरति कारिसुतस्य मध्ये
निध्यानरीत्यतिगमद्रुचि[5]गुच्छपुञ्जः ।
आवृत्त[6]रम्यवलिभङ्गभराद्गभीर-
नाभीमुखोत्सरदुरस्स्थलकान्तिपूरः ॥२१५॥

अत्र वर्णनीयत्वेन प्रस्तुतकाञ्चीगुणस्य वलिभङ्गुरावृत्तनाभी-निपातविनिस्सरदुरस्स्थलकान्तिपूरत्वोत्प्रेक्षणेनातिपूर्णतटाक इव स्वस्थाने-

---

१. M_1, M_3, My_1, My_2—कश्चित्

२. M_1, M_2, & M_3 omit अ

३. M_1, My_2—तत्स्वरूपः

४. My_2—अप्रस्तुतः

५. M_1, My_2—°गमद्युचि°

६. आवृत्त is the emended reading;
M_1, M_3—आवृत्य°; M_2—आवर्त°; My_1 My_2—आवर्त्य°

ऽमान्ती[1] अमृतप्रवाह[2]कारणीभूता[3] कापि वक्षःस्थलप्रभासमृद्धिः प्रतीयते सापि वर्णनीयत्वेन प्रस्तुतैवेति प्रस्तुतेन प्रस्तुतप्रत्यायनात्प्रस्तुताङ्कुरः ।

अथ **पर्यायोक्तिर्**निरूप्यते । तच्च द्विविधम् । गम्यस्य रूपान्तरवर्णनरूपं व्याजेनेष्टसाधनरूपं चेति । तत्राद्यस्येदं लक्षणम् ।

स्वतोऽर्थस्यैव गम्यस्य यद्रूपान्तरवर्णनम् ।
तत्पर्यायोक्तमित्याहुरालङ्कारिकशेखराः ॥२१६॥

प्रस्तुतकार्यवर्णनमुखेन प्रस्तुतकारणगम्यत्वं प्रस्तुताङ्कुरस्य विषयः । यः वर्णितेन गम्यस्तस्यैव रूपान्तरेणावगमनं[4] पर्यायोक्तस्य विषय इति भेदः । कार्यवर्णनमुखेन गम्यस्यैव रूपान्तराभिधानं पर्यायोक्तमिति लक्षणार्थः । यथा—

मधुरकविललितकवितावनितानवयौवनस्फूर्तिः ।
विरचितसाफल्यवती येन तमेनं भजे निजे हृदये ॥२१७॥

अत्र भगवतः[5] पराङ्कुशस्य स्वासाधारणरूपेण गम्यस्य मधुरकवि[6]कवितावनितावय[7]स्साफल्यकारित्वरूपान्तरेणाभिधानात्पर्यायोक्तम् ।

---

१. M_2—अ...न्ति; My_1—अमान्तः

२. M_2, M_3, My_1, My_2—अद्भुत°

३. M_1, M_2, M_3, My_2—°करणीभूता

४. This is the emended reading.
M_1, M_2, M_3, My_2—यः वर्णितेन रूपान्तरेण गम्यस्तस्यैव तद्रूपेणावगमनं
My_1—यः वर्णितेन रूपान्तरेण यो यद्रूपेण गम्यस्तस्यैव तद्रूपेणावगमनं

५. M_1, M_3—भवतः

६. M_2 omits कवि

७. My_1—°वनितावीयवः°

व्याजेष्टसाधनरूपं द्वितीयं निरूप्यते । स्वाभीष्टं यत्र कार्यं[1] कार्यान्तरव्याजेन साध्यते तदपि पर्यायोक्तमिति निर्णयः । अत्रेदं लक्षणम् ।

यत्र स्वाभिमतं कार्यमन्यव्याजेन[2] साध्यते ।
तत्पर्यायोक्तमप्याहुरलङ्कारं[3] मनीषिणः ॥२१८॥

यथा—

मामुद्यतस्तनतटां[4] निकटं[5] प्रविष्टा-
मुद्वीक्ष्य तत्सहचरी कुत एव हेतोः ।
याता[6] पुनर्वकुलमाल्यभृता कृतानि
किं ते ब्रवीम्यतिमनोहरचेष्टितानि ॥२१९॥

अत्र नायिकायां नायकसन्निधौ वर्तमानायां स्वसन्निधाने तयोर्भोग-सङ्कोचः स्यादिति केनचिद्व्याजेन विनिर्गता सखी स्वाभिमतं तयो-स्सम्भोगसौख्यं सम्पादितवतीति भवति पर्यायोक्तम् । यथा वा—

---

१. M_1, My_2—स्वाभीष्टकार्यं

२. M_1, M_2, M_3, My_2—कार्यव्याजेन

३. My_1—इति instead of अपि

४. M_1, M_2, M_3, My_2—°तटं

५. M_1, M_2, M_3, My_2—सुसुखं

६. M_1, M_3, My_2—यान्ता

शब्दादिभोगेषु मयि प्रवृत्ते यां[1] काञ्चिदुक्तिं[2] प्रसभं प्रदाय।
सर्वस्वमेतन्मम कारिसूनुस्स्वाधीनमन्तःकरणं विधत्ते ॥२२०॥

अत्र[3] येन कारणेनास्य शब्दादिसुखसङ्ग्रहणं भवति[4] तत्कारणहरण[5] रूपस्वाभिमतस्य यत्किञ्चिद्वचनोपदेशव्याजेन साधनात्पर्यायोक्तम्। पूर्वं परेष्टसाधनमत्र स्वेष्टसाधनमिति[6] भेदः।

अथ **व्याजस्तुति**र्निरूप्यते। अत्रेदं लक्षणम्।

***निन्दास्तुतिभ्यां यत्राभिव्यक्तिस्स्यात्स्तुतिनिन्दयोः।**
द्विविधाभिमता तत्र व्याजस्तुतिरलङ्कृतिः ॥२२१॥

यत्र निन्दाव्याजेन स्तुतिरेव क्रियते सा व्याजस्तुतिः। तथा यत्र स्तुतिव्याजेन निन्दैव क्रियते सापि व्याजस्तुतिरिति लक्षणार्थः। तत्राद्या यथा—

किं ते शठारे सर्वज्ञभावगर्वधुरीणता।
न विजानासि किञ्चिन्मे दोषान् पर्वतसन्निभान् ॥२२२॥

अत्रोक्तनिन्दया स्वाश्रितदोषानभिज्ञत्वं रक्षकस्य सर्वोत्कर्षशील-त्वापादत्वान्निरूपमः कश्चिद्गुणविशेष इति स्तुतिरेव गम्यते। अतो व्याजस्तुतिः। व्याजेन स्तुतिः व्याजस्तुतिरिति अन्वर्थसंज्ञा। द्वितीया यथा—

---

१. M_1, M_3, My_1, My_2—या
२. M_1, M_3—किञ्चित्
३. M_2—यत्र
४. M_2—सम्भवतीति
५. M_2 omits हरण
६. My_1 omits अत्रस्वेष्टसाधनं
* Cf. Ku. Ā., śl. 70a.

श्रीमत्कारिजपश्यतोहरपुरोवृत्तिर्न सम्पादिता
सद्धर्मान्तर[1]दुर्गमार्गगमनायासोऽपि नासादितः ।
कि[2]ञ्चित्स्मेरमुखारविन्दवनिताभोगः प्रसादः कृत-
श्चेतः किं भवदाहितामुप[3]कृतिं वक्ष्यामि साक्षादहम् ।।२२३।।

अत्र एतावानुपकारः कृत इत्यापाततः [4]स्तुत्या चेतसोऽनादिकालमारभ्याद्यापि बह्वनर्थक[5]रणोपकारकत्वेन धिगिति निन्दा गम्यते । अत इयं स्तुत्या निन्दाभिव्यक्तिरूपा व्याजस्तुतिः । ननु यत्र निन्दाव्याजेन स्तुतिस्तत्र व्याजस्तुतिरस्तु । यत्र तु स्तुत्या निन्दावगतिस्तत्र कथं व्याजस्तुतिरिति चेन्न । यत्र निन्दया स्तुतिस्तत्र व्याजेन स्तुतिः व्याजस्तुतिः । यत्र स्तुतिव्याजेन निन्दाभिव्यक्तिस्तत्र व्याजरूपा स्तुतिः व्याजस्तुतिरिति युज्यत इति संक्षेपः । सर्वमिदमुदाहरणं निन्दास्तुत्योरेकविषयत्वे । तयोर्भिन्नविषयत्वमपि दृश्यते । तत्र निन्दया स्तुत्यभिव्यक्तिर्यथा—

क्वाहं नीचश्शठारातेर्दासदासा[6]नुजीविनाम् ।
अनर्हः पुरतः स्थातुं मन्ये नस्सुहृदो हि ते ।।२२४।।

---

१. M_1, M_2, M_3, My_2—सत्कर्मान्तर°
२. M_1, M_2, M_3, My_2—मेरु° for स्मेर°
३. M_1, M_2, M_3, My_2—अपकृतिं
४. M_2—आपातस्तुत्या
५. °करण° is the emended reading; all mss. read °कारण°
६. दासदासानु° is the emended reading.
M_1, M_2, M_3, My_1—दानदासानु°
My_2—दासदानानु°

अत्र दासभावाविशेषेऽपि स्वनिन्दया तद्दासदासस्तुत्यभिव्यक्तिः । स्तुत्या निन्दाभिव्यक्तिर्यथा—

सा ताम्रपर्णी सरसोर्मिसङ्गा[1] मन्दानिलस्तादृगमन्दगन्धः[2] ।
ते मानवा श्रीनगरीनिवेशास्सर्वे शठारेश्चरणौ स्पृशन्ति ॥२२५॥

अत्र शठारिसेवासौभाग्यभाग्जनादिस्तुत्या स्वस्य तदसम्भवान्निन्दा व्यज्यते । *अनया प्रक्रियया[3] यत्रान्यगतस्तुतिविवक्षयान्यस्य स्तुतिः क्रियते तत्रापि व्याजस्तुतिः । अन्यस्य स्तुतिव्याजेनान्यस्तुतिरित्यर्थानुगमसद्भावात् ।

यथा[4] —

कृतसुकृतपाकजन्यं फलमनुभवति प्रकाममलिबृन्दः ।
शठवैरिचरणसदृशे मधु मधुरं पिबति यत्सरोजवने ॥२२६॥

अत्र भ्रमरस्तुत्या शठवैरिदिव्याङ्गसौगन्ध्यसौकुमार्याद्यतिशयस्तुतिर्व्यज्यते ।

अथ **व्याजनिन्दा** निरूप्यते । अत्रेदं लक्षणम् ।

यत्रान्यनिन्दयान्यस्य निन्दाभिव्यक्तिरिष्यते ।
तत्र स्याद्व्याजनिन्दाख्योऽलङ्कारो विदुषां मतः ॥२२७॥

---

१. My_1—सरलोर्मि°

२. M_1, M_2, M_3—°गन्धम्

३. M_2 omits अनया प्रक्रियया

४. M_1, M_2, M_3 & My_2 add वा

* Cf. Op. cit., p. 93.

यथा—

निन्द्य एव खलु वाक्पतिर्नृणां सर्जनाद[1]पि च वाक्प्रकल्पनात् ।
यद्वदन्ति किल कारिनन्दनं नन्दनद्रुमसमानमित्यमी ॥२२८॥

अत्र निर्मातृधातृनिन्दया वाग्भाग्यलाभेऽपि अविमृश्यवादित्वान्न[2]राणां निन्दा व्यज्यते । ततश्च शठवैरिणो लोकोत्तरौदार्यविशेषोऽभिव्यज्यत इति चमत्कारातिशयः ।

अथाक्षेपालङ्कारो निरूप्यते । स च त्रिवि[3]धः । स्वयमुक्तस्यैव विचारात्प्रतिषेधरूपः, निषेधाभासरूपः, तिरोहितनिषेधकविधिव्यक्तरूपश्चेति । तत्राद्यो निरूप्यते । कश्चित्कञ्चिदर्थं प्रथमं सम्प्रार्थ्य पुनः स्वसम्बन्धिवस्त्वन्तरसत्त्वेन तद्वैयर्थ्यं विचार्य तमर्थं निषेधतीति यत्सोऽयमा[4]क्षेप इति निष्कर्षः । अत्रेदं लक्षणम् ।

***विचार्य प्रतिषेधो यस्स्वयमुक्तस्य कस्यचित् ।**
स आक्षेपसमाख्यस्स्या[5]दलङ्कारस्सतां म[6]तः ॥२२९॥

---

१. M_1, M_2, M_3, My_2—वर्णनात्

२. °वादित्वात् is suggested.
M_1, M_2, M_3, My_2—°वादिकत्वात्
My_1—°दातित्यात्

३. M_1, M_2—द्विविधः

४. M_1—ययस्त्वेयं
M_2, M_3, My_2—यस्स्वयं

५. M_1, M_2, M_3, My_2—समाख्योऽयं

६. M_1—सता वृतः; M_2—अलङ्कार…सम्मतः ।

* Cf. Ku. Ā., śl 73a.

यथा—

व्यासाद्याः[1] कलितप्रमाणपटलोरूपैः[2] प्रदीपैरिदं
बाह्याद्यागमसम्भृतं[3] तनुभृतां धीराः[4] क्षिपध्वं[5] तमः ।
यद्वा श्रीशठवैरिभास्करसमुद्भूता[6] वचोवैभवा-
कारा मानव एव दिक्षु परितः क्षेमंकरा जाग्रति ॥२३०॥

अत्र पूर्वं प्रार्थितानां बाह्यादिसमयसम्भृततमः क्षेपणं प्रति साधनतया प्रतिपन्नानां व्यासाद्युक्तप्रमाणरूपप्रदीपानां ततोऽप्युत्कृष्टव[7]कुलभूषणभास्करवचनकिरणसत्त्वेन वैयर्थ्यं[8] विचार्य यद्वेति तत्प्रतिषेधस्य सूचितत्वाद्ध्रुवत्याक्षेपः ।

द्वितीयस्येदं लक्षणम् ।

+निषेधमाभासरूपमपि केचन सूरयः ।
आक्षेपमङ्गीकुर्वन्ति विशेषान्तरदर्शनात् ॥२३१॥

---

१. M_1, M_3, My_1—व्यासाद्यैः
२. M_2—कलिरूपैः
३. M_2—°सम्भूतं
४. M_1, M_2, M_3, My_2—धाराः
५. M_2—क्षिपन्तं
६. M_2—°शठकोप°
७. M_1, My_1, My_2—°उत्कृष्टा
८. M_2—°किरणविलसनवैयर्थ्यं
\+ Cf. Ibid., śl. 74a.

अत्रायमाशयः। न[*][1] निषेधमात्रमाक्षेपः चमत्काराभावात्। यो निषेधः बाधितत्वेनाभासरूपस्सन्नर्थान्तरे[2] पर्यवस्यन्[3] किञ्चिद्विशेषमाक्षिपति स आक्षेप इति। यथा—

नाहं कविश्शठद्वेषिन्! किं वाच्यं[4] सर्वशेषिणः।
तव रक्षणधुर्यस्य नोपेक्ष्यः कोऽपि[5] लक्ष्यते ॥२३२॥

अत्र स्वोक्तावेव नाहं[6] कविरिति निषेधो बाधितस्सन्[+] "कविः क्रान्तदर्शी"ति[7] न्यायात्स्वोत्प्रेक्षितार्थस्थापककैतववचनपरिहारेण यथाभूतार्थवादित्वे पर्यवस्यन्[8] तव सर्वशेषित्वेन सर्वरक्षकत्वात्सर्वोऽपि[9] चेतनो नोपेक्षाविषयः; किन्तु निरुपाधिकवात्सल्येनैव विषयीकरणीयः[10] तथा च तवैव गुणलाभ इति विशेषमाक्षिपतीति भवति निषेधाभासरूप आक्षेपः।

---

१. M_1, M_2 & My_2 omit न
२. M_2—ग्र···न्तरे
३. M_1, My_1, My_2 —पर्यवसन्
४. M_2—वाच्यः
५. M_1—कपि
६. My_1—कव्युक्तावेनाहं
७. °दर्शीति is the emended reading all mss. read °दर्शितन्यायात्
८. M^1, M^1, My_2—पर्यवसन्
९. M_1, My_2—सर्वेऽपि
१०. M_2 विषयं करणीयम्
* Cf. Op. cit. p. 96.
\+ Cf. Bhaṭṭa Yota q. by Hemacandra in his *Kāvyānuśāsana*,, p. 316.
नानृषिः कविरित्युक्तमृषिश्च किल दर्शनात्।
विचित्रभावधर्मांशतत्त्वप्रख्या च दर्शनम् ॥

तृतीयो[1] निरूप्यते[2]। यत्राभिमतनिषेधानुद्घाटनपूर्वकमनभिमत[3]विधिं प्रकटीकृत्य भङ्ग्यन्तरेणाभिमत[4]प्रतिषेधो गर्भीकृत[5]: स्यत्तत्रतिरोहितनिषेधकविधिव्यक्त[6]रूपोऽयमाक्षेप: । अत्रेदं लक्षणम् ।

***व्यक्तिनिष्ठविधाविष्टनिषेधे च तिरोहिते ।**
तत्रायमन्य आक्षेप इति काव्यविदो विदुः ॥२३३॥

यथा—

किं तया चिन्तया देव गतिरद्यैव कल्प्यताम् ।
किन्तु पञ्जरगर्भस्थां शारिकामुपलालय ॥२३४॥

अत्रानभिमतगमनविधिर्व्यक्त[7]: । शारिकामुपलालयेति स्वमरणसूचकवचनेन "मज्जीवि[8]तमिच्छसि चेन्मा गा" इति विषेधो गर्भीकृत: । अत[9]: गमननिषेधं तिरोधाय विधेरेव स्फुटीकरणादाक्षेपोऽयं तृतीय: ।

अथ **विरोधाभासो** निरूप्यते । यत्राभासतस्स्फुरतो[10] विरोधस्य

---

१. M_1, M_3, My_1 My_2—तृतीया
२. My_1 —यथा for निरूप्यते
३. M_2—अभिमत°
४. M_2—अनभिमत°
५. M_2—गर्भित:
६. M_2—°व्यक्ति°
७. M_2—व्यक्ति:
८. M_2 omits मत्
९. M_2—अथ
१०. M_1, M_3—आभासतरस्फुरत:
* Cf. Ku. Ā., śl. 75a.

पर्यवसाने परिहारः क्रियते तत्र विरोधाभास इति निष्कर्षः/अत्रेदं[1] लक्षणम् ।

> **आभासतः प्रतीतस्सन्यत्रान्ते[2] परिहीयते ।**
> **विरोधस्तत्र विद्वद्भिर्विरोधाभास उच्यते ॥२३५॥**

यथा[3]—

> **त्वं पङ्कजाताक्षतया निरीक्ष्योऽप्यपङ्कजाताक्षतयातिशेषे ।**
> **चित्रं शठारे बहुधाङ्गरम्योऽ[4]प्यनङ्गरम्यस्तनुषे प्रमोदम् ॥२३६॥**

अत्र पङ्कजाताक्षतया लक्ष्मीनाथभावेन कमलसदृशनयनत्वेन वा[5] निरीक्ष्योऽपि पङ्कजाताक्षता[6]विरहेणातिशेष इत्यापाततः प्रतीतस्य विरोधस्य, अङ्गरम्योऽप्यनङ्गरम्यो[7] भवतीत्यापाततः विरोधस्य च[8] दोषजातरहितेन्द्रियतयेति मन्मथ इव रम्य इति च श्लेषभङ्ग्यार्थान्तरस्वीकारेण परिहृतत्वाद्विरोधाभासः ।

अथ **विभावना** निरूप्यते । सा च षट्प्रकारा । कारणं विना

---

१. M_1, M_2, & M_3 omits अत्रेदम्

२. M_2—प्रतीतस्य for प्रतीतस्सन्

३. M_2 & My_2 omit यथा

४. M_1, M_3—अम्भरम्यः

५. M_1, M_3, & My_1 omits वा

६. M_1—पङ्कजाक्षताक्षता°

७. M_1, M_2, M_3, & My_2 omit अप्यनङ्गरम्यो

८. M_1, My_1, & My_2 omit च

कार्योत्पत्तिरूपा, हेतुवैकल्येऽपि[1] कार्योत्पत्तिरूपा, प्रतिबन्धके सत्यपि कार्योत्पत्तिरूपा, अकारणात्कार्योत्पत्तिरूपा, विरुद्धात्कार्योत्पत्तिरूपा, कार्यात्कारणोत्पत्तिरूपा[2] च । तत्र कारणं विना कार्योत्पत्तिरूपा यथा[*] । अत्रेदं लक्षणम् ।

कारणं[+] तु विना यत्र[++] कार्योत्पत्तिर्भवेद्यदि ।
विभावनेत्यलङ्कारो कथ्यते काव्यकोविदैः ॥२३७॥

यथा—

इन्द्रियार्थसमुदायवासनासन्निधानरहिता विभावना ।
भासते वकुलमाल्यधारिणो[3] रागयोग[4]गरिमानुरञ्जिता ॥२३८॥

अत्र शब्दादिविषयसन्निधानरूपकारणं विना शठवैरिभावनायां रागबाहुल्यरूपकार्योत्पत्तेर्वर्णनाद्विभावना । तस्याः निरतिशयसहज-भक्तिरूपत्वादिति[5] विरोधपरिहारः । हेतुवैकल्येऽपि[6] कार्योत्पत्तिपाया इदं लक्षणम् ।

---

१. M_1, My_2 —°वैकल्योऽपि

२. My_1—कार्यात्कार्योत्पत्तिरूपा

३. M_1, M_3, My_1, My_2—°धारिणा

४. M_1 omits ग

५. M_1, M_2, M_3, My_1—निरतिशयोक्तिरूपत्वात्

६. M_1, M_3, My_1, My_2—°वैकल्यकार्य

* 'यथा' इति निरूप्यते इत्यर्थे प्रयोगः ।

\+ Cf. Op. cit., śl. 77a.

++ The term यत्र is redundant.

विकलत्वेऽपि[1] हेतूनां यत्र कार्यसमुद्भवः ।
विभावनालङ्कृतिस्स्यात्सापि पण्डितसम्मता ॥२३९॥

यथा—

गुणसङ्घैश्शठारति[2]रकर्णतल[3]वेष्टितैः ।
अपि नानादिशा लोकान्विकर्षति निरन्तरम् ॥२४०॥

अत्रा[4]कर्षणहेतूनां गुणानां[5] कर्ण[6]तलवेष्टनक्रियावैकल्येऽपि कार्योत्पत्तिवर्णनाद्विभावना । प्रतिबन्धके सत्यपि कार्योत्पत्तिरूपाया इदं लक्षणम् ।

***प्रतिबन्धकसत्त्वेऽपि कार्योत्पत्तिश्च सा मता ॥**

यथा—

अहःस्वपि शठारातेर्विमला कीर्तिचन्द्रिका ।
चित्रं वितनुते लक्ष्मीं हरिदन्तरमण्डले ॥२४१॥

अत्र चन्द्रिकाप्रकाश[7]प्रतिबन्धकेऽहनि सत्यपि तत्प्रकाशरूपकार्योत्पत्त्या तृतीया विभावना । अकारणा[8]त्कार्योत्पत्तिरूपाया इदं लक्षणम् ।

---

१. M_1—विकलित्वे
२. शठारातिः is suggested. all mss read शठाराते :
३. M_2, M_3, My_1, My_2—ग्रकण्ठतल°
४. M_1, M_2, M_3, My_2—तत्र
५. **M_1, & My_2** omits the *anusvāra*
६. M_2, M_3, My_1, **My_2**—कण्ठतल°
७. M_2—ग्राह्लाद instead of प्रकाश
८. My_1—ग्रकारेण
* Cf. Op. cit., *śl.* 79a.

विभावनापि सा यत्र कार्योत्पत्तिरकारणात् ॥

यथा—

सखे चित्रं निरीक्षस्व चिञ्चाकोटरमण्डले ।
उज्जृम्भते सुधाम्भोधिवीचिकाचन्द्रमण्डलात् ॥२४२॥

अत्र शठवैरिणो वदनं चन्द्रमण्डलत्वेन तदीयदिव्यसूक्तिं[1] सुधासागर-वीचिकात्वेनाध्यवस्य वर्णनादकारणात्कार्योत्पत्तिरूपा विभावना । विरुद्ध-कार्योत्पत्तिरूपाया इदं लक्षणम् ।

कार्योत्पत्तिर्विरुद्धादप्यसावन्या विभावना ॥

यत्र कार्यविरुद्धात्कारणात्कार्योत्पत्तिर्वर्ण्यते तत्रापि विभावनेति तदर्थः । *यथा—

अमृतरसशीतलापि प्रदहति विमतप्रसिद्धसिद्धान्तान् ।
मधुरकविनायकस्य म्रदिमवती[2] भारती जगति ॥२४३॥

अत्र शैत्यमार्दवविशिष्टतया दाहनिवर्तकत्वेन दाहरूपकार्यविरुद्धया भारत्या दाहोत्पत्तिकथनात् पञ्चमी विभावना ।

यथा वा—

उल्लासानलभन्त[3] हंसनिकरा शोभासमृद्धिस्सतां
जातेष्वाविरभूच्च विष्णुपद[4]मप्यासीत्प्रकाशाश्रयः[5] ।

---

१. M_1, M_3 & My_1 omits the *anusvāra.*

२. M_1—मृदमवती; M_2—हृदि मुदमवचेति

३. M_2— उल्लासेनलभन्त

४. M_2 omits पद Space left.

५. My_2—°आश्रयम्

* After this, My_1 has the verse 245. The portion in between is omitted there.

विद्यापद्मवनं बभूव विकचं[1] श्रीकारिपुत्राम्बुदे

विश्वव्यापिनि विद्विषत्तिलताग्लानिश्च[2] जाता भुवि ॥२४४॥

अत्र वार्षिकमेघव्यापनरूपे विरुद्धहेतौ सति हंसोल्लासादिकार्यमुत्पन्नमिति विरुद्धात्कार्योत्पत्तिः ।

अथ कार्यात्कारणोत्पत्तिरूपा निरूप्यते । अत्रेद[3] लक्षणम् ।

अन्या विभावना सापि कार्यात्कारणसम्भवः ॥

कारणात्कार्योत्पत्तिरिति मर्यादां विहाय कार्यादेव कारणोत्पत्तिर्यत्र वर्ण्यते सापि विभावनेति लक्षणार्थः । यथा—

पीत्वा संसृतितापतप्तसुमनस्सन्दोहबाष्पोदकं

ग्रासैरन्यमताङ्कुरोत्करमयैस्तृप्ता च दोग्ध्री पुनः ।

सद्वाणीपयसाच्युतामृतपयस्तोषा प्रदोषाकुला[4]

सूते श्रीशठवैरिकामसुरभिस्सत्कीर्तिदुग्धार्णवम् ॥२४५॥

*अत्र कार्यभूतकामधेनोरेव कारणभूतसमुद्रोत्पत्तिवर्णनाद्विभावना ।

अथ **विशेषोक्तिर्**निरूप्यते । अत्रेदं लक्षणम् ।

कारणे सति सम्पूर्णे कार्यं नोदयते पुनः ।

विशेषोक्तिरलङ्कारस्तत्र सूरिभिरीर्यते ॥२४६॥

---

१. M_1, & M_3, omit the *anusvāra*.

२. M_1—°लताशनाग्नानिः

३. My_2 omits अत्रेदं

४. This is the suggested reading. M_1, M_3—अच्युतामरपरत्तोषप्रदोष° M_2 —अच्युतात्मनपरत्तोषप्रदोष°; My_1—अच्युतामरत्तोषप्रपोष°; My_2—अच्युतापरपरन्तोषप्रदोष

* My_1 omits the portion from this to °डम्बरः (śl. 247)

यथा—

वकुलभूषणभास्करमण्डले ज्वलति विष्णुपदान्तरचुम्बिनि ।

जगति कस्यचिदात्मनि नाभवद्धृदयतापविनिर्भरडम्बरः ॥२४७॥

अत्र वकुलभूषणभास्करज्वलनरूपसम्पूर्णकारणसद्भावेऽपि तापरूपकार्यानुत्पत्तिवर्णनाद्विशेषोक्तिः ।

अथासम्भवालङ्कारो निरूप्यते । यस्य कस्यचिद्दुर्घटकार्यस्य निष्पत्तौ विषये इयं सम्भवितुमेव न शक्यत इति यत्र वर्ण्यते तत्रासम्भव इति निष्कर्षः । अत्रेदं लक्षणम् ।

***असम्भाव्यत्वमर्थस्य निष्पत्तेर्यत्र वर्ण्यते ।**

भवेदसम्भवो नामालङ्कारः कविसम्मतः ॥२४८॥

यथा—

आद्यन्तस्थितिदूरभाविनि विनिष्क्रान्त्यागति[1]प्रक्रिया-

योग्ये सम्भृतपुष्पपल्लवफला[2]भोगे भवारण्यके ।

संविष्टास्सुसुखं वयं चिरमिदं को वेद कार्यात्मजः

किञ्चिद्भ्रान्तदृगन्तकान्त्यसिलताधाराग्रतः छेत्स्यति ॥२४९॥

अत्र संसारगहनच्छेदस्यासम्भाव्यत्ववर्णनादसम्भवः[3] ।

अथासङ्गतिर्निरूप्यते । सा च त्रिविधा । कार्यहेत्वोर्विरुद्धभिन्नदेशत्वरूपा, एकक्ष कर्तव्यस्यान्यत्र कृतिरूपा, अन्यच्चिकीर्षोस्तद्विरुद्धकृतिरूपा चेति । तत्राद्या निरूप्यते । ययोः कार्यकारणयोर्भिन्नदेशावस्थानं विरुद्धं

१. M_1—विनिस्क्राम्यागती°

२. M_1, M_2, M_3, My_2—°भराभोगे

३. M_1, M_2, M_3, My_2—असम्भवालङ्कारः ।

* Cf., Ku. Ā., śl. 84a.

तयोस्तद्वर्ण्यते चेत्[1] सोऽसङ्गत्या[2]लङ्कार इति निष्कर्षः। अत्रेदं लक्षणम्।

+कार्यकारणयोर्यत्र विरुद्धा भिन्नदेशता।
तयोस्तद्वर्णनं[3] यत्स्यात्[4]त्रासङ्गतिरुच्यते ॥२५०॥

यथा—

लक्ष्मीनाथविशालशीतलकृपासन्दोहधाराजला-
सेकैरार्द्रसमस्तनिर्मलतनुः श्रीकारिपुत्रो भवेत्।
किं चित्रं प्रकृतिर्दुरन्तविविधप्राक्कर्मपूर्णेन्द्रिय-
ग्रामैश्वर्यनिरूढवैभववती द्राच्छामिका(?) कम्पते ॥२५१॥

लोके यस्य शीतलजलाभिषेकः तस्यैव कम्प इति तयोस्समानदेशत्वमुचितम्। भिन्नदेशत्वं तु विरुद्धम्। इह तु शठारेरभिषेकः प्रकृतेः कम्प इति तयोर्विरुद्धस्यैव भिन्नदेशत्वस्य वर्णनादसङ्गतिः। यथा वा—

अत्युच्छ्रय[5]पदारूढं[6] शठारेर्वाक्कदम्बकम्।
अहो स्खलति वाग्देव्याः कर्णपूर[7]कदम्बकम् ॥२५२॥

---

१. M_1, My_1 & My_2 omit चेत्

२. M_1, M_3, My_1—सा

३. M_1, M_3—°वर्णना

४. M_1, M_3, My_2—स्याच्चेत् for यत्स्यात्

५. अत्युच्छ्रय is the emended reading; all mss. read अत्युच्छ्रया.

६. M_1, M_3, My_1, My_2—पदारूढः

७. M_1, M_2, M_3—कर्णपूर°

\+ Cf. Ibid., śl. 85a.

लोके यस्यैवात्युच्छ्रयपदारोहस्तस्यैव स्खलनमित्यौचित्यपरिहारेण तयोर्विरुद्धं भिन्नदेशावस्थानं वर्णितमिति भवत्यसङ्गतिः । द्वितीयाया इदं लक्षणम् ।

***अन्यत्र करणीयं यत्तदन्यत्र स्थलान्तरे ।**
क्रियते यत्र तत्रापि सासङ्गतिरुदीर्यते ।।२५३।।

यथा—

हृदयेष्वसतां तापं कर्तुं वृत्तश्शठाहितः ।
सतामेव तदा **तापमकरोद्भुजयोर्द्वयोः ।।२५४।।

अत्र श्लेषमूलाभेदाध्यवसायेनान्यत्र करणीयस्य तापस्य तदन्यत्रकरणवर्णनादसङ्गतिः । क्वचिदसाङ्गत्यसमाधाननिबन्धनेनापि चारुतातिशयो दृश्यते । यथा—

वाणी शठारेर्मधुसारधारां गृह्णाति चेतः प्रतिवादिनां यत् ।
विश्रान्तिमङ्गीकुरुते तदेतत्तदीयलीलाभ्रमिपातयोगात् ।।२५५।।

लोके यस्य मधुसारग्रहणं तस्यैव विश्रान्तिः इह तु वाण्याः मधु-

---

१. M_1, M_3, My_2—यस्यैवाच्छ्रिय°

२. M_1, M_3, My_2—अस्खलनं

३. My_1 omits भवति

४. M_1—लोकस्य

* Cf. Op. cit., śl. 86a.

** *Tāpakaraṇa* or *Tāpa* is the first among the *Pañcasamskāras* enjoined upon all *Śrivaiṣṇavas.*

Vide *Viṣṇutilakasaṃhitā*, IV. 189 :

तापः पुण्ड्रस्तथा नाम मन्त्रो यागश्च पञ्चमः ।
पञ्चसंस्कारदीक्षैषा देवदेवप्रियावहा ।।

It consists of branding the left and right shoulders with *Śaṅkha* and *Cakra* emblems.

सारग्रहणं[1] विमतचेतसो विभ्रान्त्यङ्गीकरणमिति भवत्यसङ्गतिः । तच्च तल्लीलाभ्रमिपतन[2]सम्भवा[3]द्भवतीति परिहृतमिति चमत्कारविशेषः ।

अथ तृतीयाया इदं लक्षणम् ।

***कर्तुमन्यत्र[4] वृत्तस्य तद्विरुद्धक्रिया भवेत् ।**
साप्यसङ्गतिरेव स्यात्तत्रालङ्कृतिविन्मता[5] ॥२५६॥

यथा—

जगति रागमपोहितुमुद्यतः कमपि रागमसौ तनुते नृणाम् ।
शठरिपुर्भुवि दुःखनिराकृतौ कृतपदो +भवि[6]दुःखमदाद्भुवि ॥२५७॥

अत्र[7] रागापोहनाय प्रवृत्तेन रागस्यैव कृतिरित्येकासङ्गतिः । भुवि[8] दुःखं निराकर्तुमुद्यतस्य तद्विरुद्धस्यैव व्यसन(स्य) करणवर्णनादेकासङ्गतिः ।

---

१. M_1—°ग्रहणः
२. My_1—°भ्रम°
३. M_1—°पतासम्भवात्
४. My_2—शत्रुं instead of कर्तुं
५. M_1, M_3, My_2—अलङ्कृतिरीरिता
M_2,—अलङ्कृतिरुच्यते
६. My_1—भुवि
७. M_1, M_2, M_3, My_2—तत्र
८. M_1, M_2, M_3, My_2—भवि°
* Cf. Ku. Ā., śl. 86b.
\+ The word Bhair is used in Telugu literature to mean the non-devotees of Śiva, Pālkurukki Somanātha (1190-1270 A. D.) uses the word in this sense in his work *Śrī Paṇḍitārādhya-caritra.* See Intro. to this work, p. 21. Here, however, it is used in the sense of devotees of Bhava or Śiva.

अथ **विषमं** निरूप्यते । तच्च त्रिविधम् । अननुरूपघटनारूपं विरूपकार्योत्पत्तिरूपं, अनिष्टावाप्तिरूपञ्चेति । तत्राद्यस्येदं लक्षणम् ।

अर्थयोर्घटना[1] यत्र वर्ण्यते[2]ऽननुरूपयोः ।
विषमं तत्र विज्ञेयमाद्यं विद्यावतां मतम् ॥२५८॥

यथा—

रे रे क्षुद्रवदावदाः प्रभवतां वाणीगणः कत्तृण[*][4]-
श्रेणी[3]कल्पविकल्पनायुतयुतो निस्सारताधूर्वहः ।
क्वेयं श्रीशठवैरिणो घुम[5]घुमन्निष्यन्दि[6]मन्दाकिनी-
रङ्गत्तुङ्गतरङ्ग[7]सङ्गलहरीलक्ष्मीवती भारती ॥२५९॥

अत्रात्यन्तनिस्सारत्वेनात्यन्तसारत्वेनाननुरूपयोः क्षुद्रवदावद[8]शठ-वैरिभारत्योर्घटनाद्विषमम् । यथा वा—

---

१. My_1—अनर्थघटना
२. M_1 omits ते
३. कत्तृण is suggested. All mss read कत्तृण°
४. M_1, M_2, M_3, My_2—°श्रोणी°
५. M_1—धुमधुमत्°; M_2—घमघमत्°
६. M_1, M_2, M_3 My_2—°निस्पन्दि°
७. M_1, M_3, My_1 My_2—°सङ्गि°
८. क्षुद्रवदावद is suggested.
M_1, M_2, M_3, & My_2 omit this reading.
My_1, has क्षुद्रीवदावदी°
Cf. Ku. Ā., śl. 88a.

* अत्र "कोः कत्तत्पुरुषेऽचि" (VI. 3.101), "तृणे च जातौ" (VI. 3.103) इति सूत्राभ्यां कुत्सितं तृणमित्यर्थे जातौ विवक्षायां सत्यां कत्तृमिति रूपम् ।

अन्तश्छिद्रवर्ति बहिश्च मधुपव्रातेन[1] सम्मर्दनं
प्रायः पल्लवसङ्गति विकलितं भावञ्च हित्वा परम् ।
विज्ञानादिफलानि चेद्वितरसि त्वं कल्प किञ्चित्तुला-
लीलामेष्यसि तेन नाथगुरुणा नो चेत्क्व स त्वं[2] क्व वा ॥२६०॥

अत्रासदृशयोः कल्पशठकोपयोर्घटना । सा च कविकल्पितेति[3] पूर्वस्माद्[4]भेदः ।

द्वितीयस्येदं लक्षणम् ।

यत्र हेतुविरूपस्य कार्यस्योत्पत्तिरिष्यते ।
अपरं विषमं तत्र प्रवदन्ति विपश्चितः ॥२६१॥

यथा—

नीलतोयदतमालमालिकाबालशैवलकलापकालिमा ।
कारिसूनुचिकुरावलीभरः कल्पते सपदि रागवन्मनः ॥२६२॥

कारणं यद्गुणकं तद्गुणकमेव कार्यमिति लोकप्रसिद्धिः अत्र तु[5] कालिमगुणशठवैरिकचभररूप[6]कारणं तद्विरुद्धरागगुणकमनोजनकमिति वर्णनाद्द्वितीयं विषमम् ।

---

१. M_1, M_2, M_3—मधुपद्यातेन

२. My_1,—सर्वं

३. M_1, M_2—कविकल्पलतेति

४. M_1, M_2, M_3—पूर्वसमात्

५. M_1, M_2, M_3 & My_2 omit तु

६. M_1, M_2—°कचिभररूप°; My_1—°कबरीरूप°

तृतीयस्येदं लक्षणम् ।

यत्रेष्टार्थसमुद्योगादनिष्टस्यापि[1] लम्भनम्[2] ।
तत्रान्यद्विषमं प्राहुरालङ्कारिकशेखराः ॥२६३॥

यथा—

विमतवाग्भुजगो[3] स्वमतागमस्थलबिलादुदिता[4] ग्रसनेच्छया ।
सविधमेत्य शठारिवचःखगेश्वरमुखाद्दलिता गलिताभवत् ॥२६४॥

अत्र विमतवाग्भुजङ्ग्याः परोक्तिग्रसनार्थं प्रवृत्तौ न केवलं तद्ग्रहण-रूपेष्टानवाप्तिः, प्रत्युत[5] स्वरूपनाशरूपानर्थावाप्तिरपि[6] जातेति तृतीयं विषमम् । यथा वा—

चित्रं चरित्रं तव कारिसूनो गुणाकरं त्वां गुणलाभलोभात् ।
नमत्ययं यत्त्वममुष्य किञ्चित्प्राञ्चं[7] गुणं वा सहसे न कामम् ॥२६५॥

अत्रार्थावाप्तिरूपेष्टार्थसमुद्यमादिष्टानवाप्तेरनिष्टावाप्तेश्च वर्णना-द्विषमम् । अनर्थपरिहाररूपेष्टार्थसमुद्यमात् । तदुभयं यथा—

---

१. M_1—अत्र

२. M_1, M_2, M_3—अविलम्भनः
My_1—अविलम्भनम्; My_2—लम्भनः
अपि लम्भनम् is the emended reading.

३. M_1, My_1—°भुजङ्गी

४. M_1—स्वमतागमिस्थलबलादुदिता
My_1—सुकृतागमस्थलबिलादुदितौ

५. M_1, M_2, M_3—प्रस्तुत°

६. My_1—°रूपासद्भावाप्तिः

७. M_2, My_1, My_2—प्राचां

पद्मं सरोजलनिमज्जनकातरं स-
न्नेत्राकृतिं शठरिपोरभजत्कथञ्चित् ।
तत्राप्यभूच्छ्रवणकूपनिपातभीति-
स्तस्मात एव तरलां गतिमेतदेति ॥२६६॥

अत्र पद्मस्य न केवलं स्वानर्थपरिहाररूपेष्टानवाप्तिः किन्तु पूर्वतोऽपि गभीरकूपनिपातरूपानर्थावाप्तिरिति भवति विषमम् । परानिष्टप्रापणरूपेष्टार्थसमुद्यमात् । तदुभयं यथा—

***निर्दोषे शठवैरिवाक्यनिकरे दोषव्रजारोपणं**
कृत्वा जर्भरयुक्तिपुञ्जघटितैर्वादैर्पुनर्वादिनः[1] ।
तद्दोषाभिनिपातभाजनतया नोचत्वमाप्ताः स्वयं[2]
पङ्कैर्व्योमविलेपनेन[3] पतितैर्दिग्धाः प्रमुग्धा[4] इव ॥२६७॥

अत्र निर्दोष इति विशेषणं व्योमदृष्टान्तेन तदुक्तिदोषव्यासञ्जनरूपपरानिष्टप्रापणाभावो निर्दशितः । **अनिष्टस्यापि लम्भनमिति लक्षण-

---

१. M_2—कृत्वार्थान्तरयुक्ति°

२. M_2—आप्तस्वयं

३. M_1—°विलोहनेन; M_2, My_1—°विलोपनेन
M_3—°विलेह्नेन

४. M_1, M_1, My_2—दिग्धाढ्मुग्धाः
M_2—पतितैः······मुग्धाः

* Cf. *Yatirājasaptati*, 55 :
श्रुतिश्रेणीचूडापदबहुमते लक्ष्मणमते
स्वपक्षस्थान्दोषान् वितथमतिरारोपयति यः ।
स्वहस्तेनोक्षिप्तैस्स खलु निजगात्रुषु बहुलं
गलद्भिर्जम्बालैर्गगनतलमालिम्पति जडः ॥

** Cf. Ku. Ā., p. 106.

श्लोकेऽनिष्टावाप्तेरपिशब्दसङ्गृहीते[१]ष्टानवाप्ते[२]श्च प्रत्येकं विषयपदेन समन्वयात्केवलानिष्टावाप्तिः केवलेष्टानवाप्तिश्चेत्यपरमपि विषमद्वयं भवति । तत्र केवलानिष्टावाप्तिर्यथा—

शृङ्गारैककलानिधावनिशमप्यन्तस्तमोमोचनं
कुर्वत्युर्वि[३]जनस्य तु स्मरणतो वक्त्रेऽनवद्यान्तरे[४] ।
उद्दीपैश्शठविद्विषः किमधुना चन्द्र त्वमुज्जृम्भसे
पूर्वक्षोणिधरान्तरे क्वचिदपि स्वाकारमाच्छादय ॥२६८॥

अत्र चन्द्रस्य स्वाकारगोपनरूपकेवलानिष्टावाप्तिरिति विषमम् । केवलेष्टानवाप्तिर्यथा—

शठद्विषो निर्मलकीर्तिपूरे[५] तरङ्गिते गाङ्गजलभ्रमेण ।
स्नात्वाप्यनार्द्रं वपुरीक्षमाणो चित्राकृतिं गच्छति सिद्धसङ्घः ॥२६९॥

अत्र क्रियानिर्वर्तनार्थमिष्टस्य स्नानस्या[६]नवाप्तेर्वर्णितत्वाद्विषमम् । यथा वा—

शङ्खो निधिः श्रीदमपास्य चार्थव्ययात्तवोक्तित्वमगाच्छठारे ।
तत्त्वं त्वमर्थोत्करमाश्रितेभ्यः प्रयच्छसि स्वेच्छमतुच्छयोगम् ॥२७०॥

---

१. M_1,—°संश्रित° for °सङ्गृहीत°

२. M_2—°इष्टपत्तेः

३. M_1, M_3, My_1, My_2—कुर्वित्युर्वि°

४. M_1, My_2—वक्त्रे न विद्यान्तरे
M_2—वक्त्रण पद्यान्तरे

५. My_1—°सूरे

६. M_1, M_2, M_3 & My_2 add एव

अत्रानर्थपरिहारार्थं शङ्खनिधेश्[1]शठारिवचनरूपत्वेऽप्यनर्थस्यैव तदवस्थत्वादनर्थपरिहाररूपेष्टानवाप्तिरिति विषमम् ।

यथा वा[2]—

***बहुमुखमनन्तभोगं कुटिलम्[3]नुग्रहनिरङ्कुशालोकम् ।**

हृन्मम शठरिपुरक्ष्यं वीक्षितुमघभुजगमण्डलं[4] नालम् ॥२७१॥

अत्र परानिष्टप्रापणरूपेष्टानवाप्तिरूपो विषमभेदः । यथा वा—

क्लीबस्य[5] मनसो नाथ चरणश्शरणं तव ।
हित्वेममन्यतो गच्छेदनङ्गेनापि ताडयते ॥२७२॥

अत्रापि केवलेष्टानवाप्तिः+ । किञ्चिदिष्टा[6]वाप्तिपूर्वकतदनवाप्तिर्यथा—

बहुशरधारापातादपि च महति बिलतलान्[7]तरे वासात् ।

तत्कालसदृश[8]भावो जलदस्य हि शठजिदलकभारेण ॥२७३॥

---

१. M_1, M_3, My_2—शङ्खनिधिः

२. M_1, M_2, M_3 & My_1 omit यथा वा

३. M_2 omits कुटिल Space left.

४. M_2—वीक्षितुमघे भुजमण्डलं

५. M_2—omits क्लीबस्य

६. M_1, M_2, M_3, My_2—किञ्चिदनिष्टावाप्ति°

७. M_1, M_3, My_2—बलतलान्तरे; M_2—बिलतलान्तरा

८. M_1, My_1,—°भवः

* बहुमुखादिकं आलोकपर्यन्तं 'हृत्' इत्यस्य कर्मभूतस्य विशेषणम् । अघभुजगमण्डलं कर्तृपदम् ।

\+ मनसः इष्टं यत् विशृङ्खलभ्रमणं तस्यानवाप्तिरित्यर्थः ।

अत्र श्लेषभङ्ग्या शराग्रसंवेशमनूद्य बिलान्तर[1]संवासरूपबहुतपः[2]-प्रयत्नेनापि जलदस्य शठरिपुचिकुरसाम्यं तात्कालिकमेव[3] न सार्वकालिकमिति कल्प्यते[4]। अतो[5]ऽत्र किञ्चिदिष्टावाप्तिपूर्वकेष्टानवाप्तिरूपमिदं विषमम्। क्वचिदनिष्टानवाप्तौ तदवाप्तिभ्रमनिबन्धनेन चारुत्वातिशयो दृश्यते। यथा—

सद्यस्ताडितभूरिभेरिनिनदं श्रुत्वा शठद्वेषिणो
मेघध्वानधिया प्रियाभिसरणोद्युक्ता पुरस्वैरिणी।
तत्सौधागरुधूपधूमगणतद्गर्भभ्रमद्दीपिका-
रेखास्वर्पितनीलतोयदतटिद्बुद्धि[6]र्मुदं विन्दति ॥२७४॥

अत्र प्रियाभिसरणोपकार[7]कमेघदर्शनरूपेष्टानवाप्तावपि तदवाप्तिभ्रमो भेरीरवधूप[8]धूमदीपरेखाविषयकस्तनितवर्ष[9]कबलाहकविद्युल्लताभ्रमोपन्यासमुखेन दर्शित इति विषमभेदः।

अथ **समं** निरूप्यते। तच्च त्रिविधम्। आनुरूप्यवर्णनरूपं, कारणसारूप्यवर्णनरूपं, अक्लेशेन कार्यवर्णनरूपञ्चेति। तत्राद्यस्येदं लक्षणम्।

---

१. बिलान्तर is suggested
   M_1, M_3, My_1, My_2—भङ्ग्य तर°
   M_2—भङ्ग्यन्तरक°
२. M_2—°बहुतरतपः°
३. M_1, M_2, M_3, & My_2 add कल्प्यते
४. M_1, M_2, M_3 & My_2 omit कल्प्यते
५. M_2 adds न
६. M_1, M_2, M_3, My_1 —°विद्धिः
७. M_1; & My_1, omit क
८. M_2, omits धूप
९. M_3—°वर्षुक°

***घटना वर्ण्यते यत्र द्वयोरप्यनुरूपयोः ।**
समाख्यस्स्यादलङ्कारस्तत्रालङ्कृतिविन्मतः ॥२७५॥

यथा—

वाणीम पद्मोदरमिन्दिरेव गोविन्दमिन्दीवरपं सुधेव ।
विद्या शठद्वेषिणमाश्रयन्ती सर्वप्रकाशं सदृशं विभाति ॥२७६॥

अत्रानुरूपयोर्घटनावर्णनात्समम् । यथा वा—

शाखाच्युतानां छदनावलीनां[१]मिवानुरूपं[२] खल[३]मण्डलीनाम् ।
अधःस्थ[४]लोद्वर्तनमाशुनाशप्रकारकं[५] किं घटितं शठारे ॥२७७॥

पूर्वं स्तुतिपर्यवसायी । इदं निन्दापर्यवसायीति भेदः । द्वितीयं निरूप्यते[६] । अत्रेदं लक्षणम् ।

+कारणेनापि कार्यस्य सारूप्यं यत्र वर्ण्यते ।
तत्रापरं समाख्यातमलङ्कारं विदुर्बुधाः ॥२७८॥

सारूप्यमानुरूप्यमित्यर्थः । यथा—

तवचरणकमलशोभा भ्रमरहितत्वं करोति यज्जगताम्[७] ।
तदुचितमेतत्तदपि भ्रमरहितत्वं तनोति[८] शठवैरिन् ॥२७९॥

---

१. M_3, My_2—च्छिद्दनावलीनां
२. M_1, M_2, M_3, My_2—इह
३. My_1,—खलु
४. M_1, M_3—अयस्थलं
५. M_1, M_2, M_3 My_2—आशुनाशकं······किं
६. M_1, M_2 M_3 —यथा instead of निरूप्यते
७. M_1 M_2, My_3 My_2—यज्जगति
८. M_1, M_2—करोति
* Cf. Ku. Ā., śl. 91a.
\+ Cf. Ibid., śl. 92a.

अत्र रूपित[१]पदकमलस्य द्विरेफ(स)हितत्वं, तज्जन्यशोभायास्तु भ्रान्तिरहितत्वविधानम् । तयोःश्लेषमूलाभेदाध्यवसायेन शोभाया जनक-कमलानुरूप्यवर्णनाद्द्वितीयं समम् । यथा वा[२]—

लक्ष्मीकान्तोज्ज्वलगुणगणोदारधाराकदम्बं
वर्षत्याशाप्रसरसुभगे लोकशुक्त्यन्तराले ।
चक्षुर्लक्ष्ये शठरिपुघने स्वातियोगानुकूल्या-
न्मुक्तावाप्तिर्भवति यदिदं दृश्यते युक्तमेव ॥२८०॥

तृतीयस्येदं[3] लक्षणम् ।

***यत्कार्यसिद्धये कर्तुः प्रयत्नोऽनिष्टमन्तरा ।**
तत्कार्यस्य भवेत्सिद्धिरपि तत्र समं मतम् ॥२८१॥

यत्कार्यसिद्ध्यर्थं कर्ता प्रयतते[४] तत्कार्यमनिष्टं[५] विना सिद्ध्यति चेदपि सममिति तदर्थः । यथा—

युक्तमेव तव मत्तवारणारोहमर्थितवतो महीपते ।
कारिनन्दनबर्हिर्वितर्दिकामत्तवारणविहारलम्भनम् ॥२८२॥

[६]अत्र शठवैरिसेवार्थं त्वरमाणं[७] जनसम्मर्दनपरिजिहीर्षया द्वारि दौवारिकैर्वार्यमाणं[८] गोपुरबहिर्वेदिकाया निर्व्यूहोपरिभागे[**] वहन्तं किञ्चद्रा-

१. M_1, M_2, M_3, My_2 —निरूपित°
२. My_2—omits वा
३. M_1, M_2, M_3 My_1,—अत्रेदं
४. M_2—प्रयते
५. M_1, M_2—अरिष्टं
६. My_1 omits अत्र
७. M_1, M_3, My_2—त्वरमाणा
८. My_1—निर्वार्यमाणं
* M_1 omits this verse.
** Cf. *Vaijayantā*, IV. 3.31 b.
कूटागारं तु वलभी निर्व्यूहो मत्तवारणम् ॥

जानं दृष्ट्वा कस्यचिद्राज्ञो नर्मवचनमिदम् । अत्र श्लेषमूलाभेदाध्यवसायेन लब्धस्यैवेप्सितमत्तवारणरूपत्वादनिष्टं विना तल्लाभाच्च भवति समम्[४] । न च सेवार्थिनस्तद्बहिर्वेदिकानिर्व्यूहावस्थानस्या[५]निष्टत्वाद्विना लाभं कथमिति वाच्यम् । देवसदनद्वारे सर्वस्यापि तदवस्थानस्यावश्यकत्वेनानिष्टत्वाभावात् । किञ्च तदवस्थानस्य वस्तुतोऽ[६]निष्टत्वेऽपि श्लेषमहिम्ना इष्टाभेदानिष्टत्वमिति न काप्यनुपपत्तिरिति संक्षेपः । +अपि च यत्रोत्कटा[६]निष्टसत्त्वे[७]ऽपि श्लेषमहिम्ना इष्टार्[८]थत्वप्रतीतिस्तत्राप्ययमलङ्कारोऽप्रतिहत एव । यथा—

वादेषु नः परा भूतिरिति वादमभीत्सताम् ।
विमतानां पराभूतिरपि दत्ता शठद्विषा ॥२८३॥

अत्र श्लेषवशेन पराभूतिरूपस्यार्थस्याभीप्सानुरूपत्ववर्णनात्समम्[१] ।

*एवं यत्रेष्टावाप्तिसत्त्वेऽपि श्लेषवशादसतोऽनिष्टार्थस्य प्रतीतिस्तत्रापि समालङ्कार एव । यथा—

औन्नत्यहेतुस्तव इत्यमीषां मृषा न भाषा विदुषां शठारे ।
प्राश्यानिलं त्वद्भुजतां प्रपन्नश्शेषो गतः[२]श्रौतसमुन्नतत्वम् ॥२८४॥

---

१. M₁, M₂, M₃, My₂—समः

२. From अनिष्टत्वात् to वस्तुतः, the portion (Two lines) is omitted in M₁.

३. M₂ —वस्तुनः

४. M₁, M₃, My₁, My₂—°अनिष्टत्वे

५. M₁, M₂, M₃, & My₂ omit त्व

६. M₁, M₂, M₃, My₂—तत्रापि समालङ्कारः

७. M₁, M₂, M₃, My₂ —यत्रेष्टानवाप्तिसत्येऽपि

८. शेषो गतः is the emended reading; all mss read शेषागतः

\+ Cf. Ku. Ā., p. 111

* Cf. Op. cit., pp. 111-12.

अत्रानिलप्राशनरूपतपसः औन्नत्यमनुरूपं फलमिति वर्णनात्सम-भेदः ।

अथ विचित्रा[1]लङ्कारो निरूप्यते । यस्मिन्कर्मणि प्रयत्नः क्रियते, तत्प्रयत्नः[2] तत्कर्मविपरीतफलं प्राप्तमिति यत्र वर्ण्यते तत्र विचित्रालङ्कार इति निष्कर्षः । अत्रेदं लक्षणम् ।

यस्मिन्प्रयत्नः क्रियते स[3] तस्मात्कर्मणः फलम् ।
विपरीतमवाप्तं चेद्विचित्रं तत्र सम्मतम् ॥२८५॥

यथा—

त्वद्दिव्यवचनरचना सरसं सुरभीकरोति भुवनानि ।
वकुलाभरण ! सगन्धं निर्गन्धयितुं विपक्षिणां पक्षम् ॥२८६॥

अत्र सकलभुवनसुरभीकरणस्य विपक्षिपक्षनिर्गन्धीकरणं विपरीत-फलमिति भवति विचित्रम् ।

अथाधिकालङ्कारो निरूप्यते । स च द्विविधः । आधाराधे-याधिक्यवर्णनरूपः,[4] आधेयाधाराधिक्यवर्णनरूपश्चेति । तत्राद्यस्येदं लक्षणम् ।

आधाराद्विपुलाद्यत्राधेयाधिक्यवचोऽधिकम् ।

---

१. My_2 omits वि

२. M_1, M_2, M_3 & My_2 omit तत्प्रयत्नः

३. M_1, M_2, M_3,My_2—न instead of स

४. My_1 omits आधेय

यथा—

यत्र पूर्वं बलिध्वंसी ववृधे वैभवोचितम् ।

तत्र कीर्तिश्शठारातेरमान्ती[1] परिवर्तते[2] ॥२८७॥

अत्राधारस्य जगतस्त्रिविक्रमवृद्ध्युचितत्वेन वैपुल्यं प्रदर्श्य तत्रामान्तीति[3] शठवैरिकीर्तिरूपस्याधेयस्या[4]धिक्यवर्णनाधिकं प्रथमम् ।

द्वितीयस्येदं लक्षणम् ।

आधेयाद्विपुलाद्यत्राधाराधिक्यं तदुच्यते ।

यथा —

विभूतियुगलीसीम्नः कियतीयं विशालता ।

पराङ्कुश तवानन्तगुणास्तत्र चकासते ।२८८॥

अत्र कियन्तीयं विशालतेत्याधारप्रशंसाया[5]मपि तथाविधविशालशठरिपुगुणाधारत्वेन प्रशंसने सति[6] तत्प्रशंसनात्[7]प्रकृतगुणप्रशंसायामेव पर्यवस्यतीत्यवगन्तव्यम् ।

अथाल्पालङ्कारो निरूप्यते ।

स्यादल्पमाधारसौक्ष्म्यं सूक्ष्माधेयात्तदुच्यते ।

---

१. M_1,—अमान्ति; M_2—अमान्ते; M_3—अमान्ति

२. My_2—परिवर्धते

३. M_2—अमान्तेति

४. M_1, M_2 & My_1 omit आधेयस्य

५. M_2—°प्रशंसानां

६. M_1, M_3, My_1, My_3—प्रशंसेति

७. M_1, M_3, My_1, My_2—°प्रशंसात्

यथा—

> इयं बाला लीलातरलवकुलामोदलहरी-
>
> वलद्भृङ्गीभङ्गीमसकृदपि मत्वा गणयति ।
>
> शठारातौ क्रान्ते *तदुपरि धृतं रत्नकटकं[1]
>
> वधूः काचित्काञ्चीं कलयति कटीसीमनि पुनः[2] ॥२८९॥

अत्र करपरिच्छिन्नतया सूक्ष्मादाधेयभूताद्रत्नकटकादपि[3] तदाधारस्य कटीतटस्यातिसूक्ष्मतावर्णनादयमल्पालङ्कारः[4][5] ।

अथान्योन्यालङ्कारो निरूप्यते । अत्रेदं लक्षणम् ।

> अन्योन्यमुपकारस्य विधानं यत्र वर्ण्यते ।
>
> तत्रान्योन्यमिति प्राहुरलङ्कारं विपश्चितः ॥२९०॥

यथा—

> परिषदपरिमेयं वैभवं व्यादधाना
>
> विलसति विबुधानां कारिपुत्रेण शश्वत् ।
>
> अयमपि च जगन्ति व्याप्नुवानं समाख्या-
>
> भरमनुपममुच्चैरञ्चति द्राक् तयैव[6] ॥२९१॥

---

१. This is the emended reading. All mss. read शठारातेः कान्ते तदुपरि कृपारत्नकटकं.

२. This is the emended reading while all mss. have कटीं सीमनिपुणः.

३. M_1, M_2—रत्नमकुटादपि

४. My_1—कट°; My_2—कटि°

५. M_1, M_2, M_3, My_2—°तटस्य चेति सूक्ष्मता°

६. My_1—एवम्

* तदनन्तरम्

अत्र परिषत्पराङ्कुशयोः परस्परोपकारवर्णनादन्योन्यम् ।

अथ **विशेषालङ्कारो** निरूप्यते । स त्रिविधः । आधारं विना आधेय-स्थितिवर्णनरूपः, एकस्यानेकस्थितिवर्णनरूपः, किञ्चिदारम्भतोऽशक्यान्य-वर्णनरूपश्चेति[1] । तत्राद्यस्येदं लक्षणम् ।

[*]विना विख्यातमाधारमाधेयं[2] यत्र वर्ण्यते ।
विशेषनामालङ्कारस्तत्र स्यात्कविसम्मतः ॥२६२॥

प्रसिद्धमाधारं विना तदाधेयस्य यत्र कुत्रचित्स्थितिवर्णनं विशेष इति[3] तदर्थः । यथा—

अनाकाशे निशानाथस्तत्र पङ्केरुहद्वयम् ।
एतत्कल्पतरौ सर्वमितोक्षन्ते शठद्विषम् ॥२६३॥

अत्र मुखनयनविग्रहाणां चन्द्रकमलकल्पकशाखित्वेनाध्यवस्योक्त[4]-त्वात्प्रसिद्धमाधारं विनान्यत्र तदाधेयस्थितिवर्णनाद्भवति विशेषः । [+]क्वचित्प्रसिद्धाधाररहितानामाधारान्तरनिर्देशं[5] विनैव स्थितिवर्णनं दृश्यते । यथा—

---

१. M$_1$, M$_2$, M$_3$, My$_2$—अशक्यस्य करणवर्णन°

२. आधेयं is suggested while all mss read आधिक्यं

३. M$_1$, M$_2$, M$_3$, & My$_2$ add निष्कर्ष:

४. M$_1$, M$_3$ My$_2$—°शाखात्वेन

५. M$_1$ & M$_3$ omit र.

* Cf. Ku., Ā., śl. 99a.

\+ Cf. Ibid., p. 115.

सन्तः कारिसुताङ्घ्रिपङ्कजसुधानिष्यन्दसंसेवना-
च्छान्तानन्तभवज्वरा अपि तमःपारे परं जाग्रति ।
तेषां दिव्यगुणोत्करा जगदिदं सर्वं ह्यलङ्कुर्वते[1]
नित्यं स्वाभिनवप्रकाशकलया सम्मोदभात्रोदयम् ॥२६४॥

अत्र सत्पुरुषाभावेऽपि तद्दिव्यगुणानामाधारान्तरनिर्देशं विनैव यावत्कालभाव्यस्थितिरुक्तेति चमत्कारवानयं विशेषः ।

द्वितीयस्येदं लक्षणम् ।

यत्रानेकत्र वस्त्वेकं वर्ण्यते[2] सोऽपि सम्मतः ।

यथा—

पुरः पार्श्वे पश्चादुपरि परितः प्राङ्मुखदिशां
विशेषेष्वप्येषा तनुरिह शठद्वेषण[3] तव ।
परीतोषोन्मेषं प्रकटयति नेत्राम्बुरुहयोः
परीरम्भारम्भप्रणयिनि करे मे न लगते ॥२६५॥

अत्रैकस्यैव शठवैरिदिव्यदेहस्य पुरःपार्श्वादिष्ववस्थितिवर्णनाद्-द्वितीयोऽयं विशेषः ।

तृतीयस्येदं लक्षणम् ।

***किञ्चित्क्रियामारम्भतोऽशक्यवस्त्वन्तरं यदि ।**
निष्पद्यते तत्र च स्याद्विशेषः कविसम्मतः ॥२६६॥

---

१. ह्यलङ्कुर्वते is suggested. All mss. have फलं कुर्वते

२. M_2—वचस्त्वेकं

३. शठद्वेषण is suggested. शठद्वेषिणि is the reading in all mss.

* Cf. Op. cit. ślo. 101a.

यथा—

> **राजद्रावणहारिणं *दशरथस्यानन्दसन्धायकं**
> **रक्षादीक्षितलक्ष्मणैकसुभगं +साक्षादयोध्यासदम् ।**
> **जानक्यावृतवैभवं मधुरकव्याढ्यं सनाथं गुणैः**
> **कान्तं कारिसुतं निरीक्षितुमयन् द्रष्टास्म्यहं राघवम् ॥१९७॥**

अत्र कारिसुतनिरीक्षणोद्देशेन प्रवृत्तस्य यदृच्छया दुर्लभसीतावल्लभ-दर्शनं निष्पन्नमिति कथनाद्विशेषस्तृतीयः ।

अथ **व्याघातो** निरूप्यते । स द्विविधः । तथाकारिणोऽतथाकारित्वक्रियारूपः, सौकर्यनिबद्धकार्यविरोधक्रियारूपश्चेति । तत्राद्यस्येदं लक्षणम् ।

> **भवेत्तथाकारिणश्चेदतथाकारिता क्रिया ।**
> **व्याघातस्स्यादलङ्कारस्स तत्र बुधसम्मतः ॥२९८॥**

तथाभूतकार्यसाधनस्यातथाभूतकार्यसाधनत्वकरणं वर्ण्यते यदि स व्याघात इति तदर्थः । अत्रापि प्रकारद्वयमस्ति । यद्यत्कार्यसाधनत्वेन[१] लोक-प्रसिद्धं तदेव[२] तद्विरुद्धकार्यसाधनत्वेन केनचित्क्रियते[३] चेत् व्याघातस्स्यादि-

---

१. M_1, M_2, M_3, My_2—कार्यत्वेन साधनत्वेन.

२. M_2 omits the letter व.

३. M_2, M_3—क्रियेत.

* Cf. The com. *Bhūṣaṇa* of Govindarāja on *Rāmāyaṇa* II. 40.9 : रामं दशरथं विद्धि etc.···दशति मत्स्यकच्छपोरगान् दंष्ट्रव्यापारविषयान् करोतीति दशः पक्षी·········स गरुडः रथो यस्य तम्, विष्णुं विद्धीत्यर्थः ।

\+ Cf. A. V. 10.2.31b : देवानां पूरयोध्या ।

त्येकः[१]। यद्यत्साधनतया केनचि[२]दुपात्तं तदेव तद्विरोधिना तद्विरुद्धसाधनं क्रियते चेत्सोऽपि व्याघात इत्येक इति ।

तत्राद्यो यथा—

सहृदयजनामन्दानन्दप्रवाहविधायक-
स्सरसवचनव्रातश्चित्रो भवत्यमृतप्लुतः ।
धवलवकुलस्रग्वी वाग्वीरभूषणभाषणो[३]
रचयति मनस्तापं तेनैव दुर्मतसन्ततेः ॥२९९॥

अत्र सहृदयानन्दसाधनभूतो वचनव्रा[४]तश्शठरिपुणा तद्विरुद्धविमत-मनस्तापसाधनभूतः कृत इति व्याघातः ।

द्वितीयप्रका[५]रो यथा—

वाचा विमोहितमिदं जगदन्धभूतं
वाचैव जीवयति बोधविधानपूर्वम् ।
तं दुर्मतप्रतिभटं वकुलावनम्र-
स्रग्धोरणीपरिमलैर्मदयन्तमीडे ॥३००॥

अत्र दुर्मतैर्जगद्विमोहनसाधनत्वेन कृता[६] वाक् सैव तद्विरोधिना शठवैरिणा तद्विरुद्धबो[७]धपूर्वकजीवनसाधनत्वेन कृतेति व्याघातभेदः ।

---

१. My_2—एकम्
२. My_2—केचित्
३. M_1, M_3, My_1 My_2—°भूषणो
४. M_1, M_2 & M_3 omit वचन
५. M_1, M_2, M_3, My_2—द्वितीयो यथा
६. कृता is suggested.
M_1, M_3 My_1, My_2—कृतो; M_2—कृतवान्
७. M_3 omits बोध

सौकर्यनिबद्धकार्यविरोधक्रियारूपो निरूप्यते । येन साधनेन यत्कार्यक्रिया केनचिद् दृढीकृता तेनैव साधनेन तदन्येन तत्कार्यविरोधिनी[1] एव सुकरत्वेन समर्थिता चेत्सोऽपि[2] व्याघातविशेष इति निष्कर्षः । अत्रेदं लक्षणम् ।

क्रियाकार्यविरुद्धस्य सौकर्येण समर्थ्यते ।
सोऽपि[3] व्याघातनामा स्यादलङ्कारः कविप्रियः ॥३०१॥

यथा—

दोषाकरोऽयमिति चेतसि ते यदि स्या-
न्मय्याश्रिते परमनङ्कुशवैभवस्य ।
साक्षात्त्वयैष विषयीकरणीय एव
नाथान्तरङ्गनटनोत्कट कारिसूनो ॥३०२॥

अत्र कारिपुत्रेण दोषाकरत्वरूपसाधनेनासज्जनस्य[4] परित्यागे दृढीकृते सति तेनैव साधनेन तद्विरोधिन एव विषयीकरणस्य क्रिया सौकर्येण समर्थितेति भवति व्याघातभेदः । कार्यविरुद्धक्रियायां सौकार्यं सुतरां कारणस्य तदानुगुण्यम् ।

अथ **कारणमाला** निरूप्यते । उत्तरोत्तरकारणभूतैः पूर्वपूर्ववस्तुभिः, पूर्वपूर्वकारणभूतैरुत्तरोत्तरवस्तुभिर्व्याकृतो यस्सन्दर्भस्स कारणमालालङ्कार इति निष्कर्षः । तथा चोत्तरोत्तरकारणभूतपूर्वपूर्वसन्दर्भः, पूर्वपूर्व-

१. विरोधिनी is the emendation for विरोधिनः

२. My_1—सापि

३. M_1, M_2, M_3—सापि

४. My_1—°साधनेनास्य

कारणभूतोत्तरोत्तरसन्दर्भश्चेति[1] तद्द्विधा पर्यवसीयते। अत्रेदं[2] लक्षणम् ।

यथापूर्वोत्तरं यत्र सन्दर्भो यदि कारणैः ।
तत्र कारणमाला स्यादलङ्कारस्सतां मतः ॥३०३॥

तत्राद्यो यथा—

श्रीशाहेतुकवीक्षणेन[3] विगमो द्वेषस्य तेनोन्मुखी-
भावस्तेन सतां समीपगमनं तेनार्यसंसेवनम् ।
तेन ज्ञानमनेन कारितनयश्रीपादपङ्केरुहा-[4]
द्वैतावाप्तिरथानया विजयते कैङ्कर्यलक्ष्मीः पुनः ॥३०४॥

श्रीधरनिरुपाधिककटाक्षस्योत्तरा[5]द्वेषहेतुत्वात्,[6] तदद्वेषस्यो[7]त्तरा[8]भिमुख्य[9]हेतुत्वात्, आभिमुख्यस्य[10] सत्स[11]न्निधानगमनहेतुत्वात्, सत्स[12]न्निधानगमनस्याचार्याश्रयणहेतुत्वात्,[13] आचार्याश्रयणस्य ज्ञानहेतुत्वात्, ज्ञानस्य

---

१. My_2—पर्यवहीयते ।
२. My_2 omits अत्रेदं
३. M_1, M_3 — °वीक्षणो न
४. M_2—°पङ्केरुह°
५. M_2, My_2 —सोत्तर°
६. After this, M_1 has ज्ञानस्य शठवैरि° etc. of the fourth line of this paragraph. The portion in between is omitted there.
७. M_1, M_2 & My_1 omit तद् My_2—तदद्वेषस्य
८. M_2, M_3, My_2—सोत्तर°
९. My_1 —°अभिमुख°
१०. My_2—अमुख्यस्य
११. M_3, My_1, My_2—तत् for सत्
१२. M_3, My_1—तत् for सत्
१३. My_1 omits आचार्याश्रयणहेतुत्वात्

शठवैरिचरणकमलयुगलप्राप्तिहेतुत्वात्तच्चरणकमलप्राप्तेश्च सर्वोत्कृष्ट-निरवधिककैङ्कर्यसम्पत्तिहेतुत्वादुत्तरोत्तरकारणभूतपूर्वपूर्वसन्दर्भः कारण-मालाभेदः ।

द्वितीयो यथा—

संसारो भवति जगत्यविद्ययैषा
प्राचीनादघनिकरादयं प्रकृत्या ।
सा साक्षाद्वकुलधराङ्घ्रिभक्त्यभावा-
त्तस्मात्तत्पदयुगलं नृणां शरण्यम् ॥३०५॥

अत्र संसारं प्रत्यविद्या हेतुरित्यादिक्रमेण पूर्वपूर्वकारणभूतो[१]त्तरोत्तर-सन्दर्भरूपः कारणमालाभेदः ।

अथै**कावली** निरूप्यते । अत्रे[२]दं लक्षणम् ।

एकावली स्याद्गृहीतमुक्तरीत्यनतिक्रमात् ।
पदार्थपङ्क्तिर्यत्रैव वर्ण्यते कविशेखरैः ॥३०६॥

उत्तरोत्तरस्य पूर्वपूर्वविशेषणभावः पूर्वपूर्वस्योत्तरोत्तरविशेषण[३]भावो वा गृहीतमुक्तरीतिः । तथा चैकावली द्विविधा । तत्राद्या यथा—

गुणाश्चारित्रविश्रान्ताश्चारित्रं विग्रहाश्रयम् ।
विग्रहश्शठकोपस्य स्वरूपमवलम्बते ॥३०७॥

अत्र पूर्वगुणं प्रति उत्तरचरित्रस्य विशेषणत्वमित्येवमुत्तरोत्तरस्य पूर्वपूर्वविशेषणत्वादेकावलीभेदः ।

द्वितीयो यथा[४]—

---

१. M_1, M_3 & My_2 omit भूत

२. My_2 omits अत्रेदं

३. M_1, M_2 & M_3 omit विशेषण

४. My_1 omits द्वितीयो यथा

मुखप्रकाशके नेत्रे नेत्राकृतिमती श्रुती[1] ।

श्रुतिप्रणयिनौ बाहू बाहुभ्यां भाति कारिभूः ॥३०८॥

अत्र पूर्वपूर्वमुखादेरुत्तरोत्तरनेत्रादिविशेषणत्वादेकावलीभेदः ।

अथ **मालादीपकं** निरूप्यते । अत्रेदं लक्षणम् ।

दीपकैकावलीयुक्तलक्षणद्वयसम्भवः ।

***यत्र स्याद्यदि तत्रैतन्मालादीपकमुच्यते ॥३०९॥**

यथा—

वादाहवाध्वसु रिरंसुतया शठारा-

बुद्धेलमुल्लसितभावमुपादधाने ।

व्याप्तोक्तिभि[2]श्शठततिस्त्वनया[3] दिगन्ता-

स्तं तद्यशोविसरपुष्कलतानुकूल्यम् ॥३१०॥

अत्रैकमेव व्याप्तेति पदं शठतत्यादिषु यथायथं लिङ्गवचनपरिणामेणान्वेतीति दीपकम् । शठतत्यादीनामुत्तरोत्तरविशेषणभावादेकावली चेति मालादीपकम्[4] ।

अथ **सारालङ्कारो** निरूप्यते । अत्रेदं लक्षणम् ।

उत्कर्षो वर्ण्यते यत्र सारस्स्यादुत्तरोत्तरम् ।

यथा—

अम्भोधिर्विपुलस्ततस्सुरपथस्तस्मादजाण्डं पुन-

स्तस्मादेवमनन्तकोटिगणितान्येतानि सर्वाणि तु ।

---

१. M_1, M_2, M_3, My_1—श्रुतिः

२. M_1—°यक्त°; M_3, My_1—व्यात्त°

३. M_2—शठततिस्त्वधुना; My_1—शठततिस्तनया

४. M_1 omits this sentence.

* The construction of this line seems to be defective.

यस्यैकाङ्क[1]करोमकूपविवरे भ्राम्यन्त्यसङ्कर्षणं
सोऽयं श्रीदयितः क्वचिच्च रमते श्रीकारिभूत्यन्तरे ॥३११॥

अत्र पूर्वपूर्वापेक्षया उत्तरोत्तरोत्कर्षात्सारालङ्कारः । अयं श्लाघ्यगुणोत्कर्षः । अश्लाघ्यगुणोत्कर्षो यथा—

हीनतरश्चाण्डालश्चण्डालादपि च केवलं[2] पिशुनः ।
पिशुनादपि शठजित्पद[3]निरतजनाश्रितसमाश्रयणदूरः ॥३१२॥

अत्रोत्तरोत्तराश्लाघ्य[4]गुणोत्कर्षः[5] । उभयरूपो यथा—

अतीव कठिनश्शैलश्शैलादपि सुरायुधम् ।
तस्मात्सुदर्शनं तस्माच्छठजिद्दूरमानसः ॥३१३॥

अत्र सुदर्शनपर्यन्तेषु श्लाघ्यगुणोत्कर्षः । प्रकृतार्थशठरिपुदूरमानसे त्वश्लाघ्यगुणोत्कर्षः[6] ।

अथ **यथासंख्यं** निरूप्यते । अत्रेदं लक्षणम् ।

क्रमिकाणां क्रमेणैव क्रियते यत्र वर्णनम् ।
यथासंख्यमलङ्कारस्स्यात्क्रमापरसंज्ञिकः ॥३१४॥

---

१. My_2 — °अङ्गत°

२. M_1, M_3, My_1, My_2—केवलनं

३. M_2—वर for पद

४. M_1, M_3, My_1, My_2—°श्लाघ्य°

५. After this, My_1 has शठरिपुदूरमानसे etc.
The portion in between (3 lines) is omitted there.

६. M_1, M_3, My_1, My_2—अश्लाघ्यगुण ।

यथा—

विज्ञानधारामखिलार्थ[1]तृष्णाराहित्यम[2]ङ्घ्रिद्वितयानुरागम् ।
प्रबर्षति द्योतयति प्रबध्नात्यात्माश्रितानामनघश्शठारिः ॥३१५॥

अत्र यथाक्रमेणान्वयाद्यथासंख्यम् ।

अथ **पर्यायो** निरूप्यते[3] । स द्विविधः । एकस्यानेकाश्रयणरूपः, अनेकस्यैकसंश्रयणरूपश्चेति । तत्राद्यस्येदं लक्षणम् ।

अनेकसंश्रयो यत्र यद्येकस्यैव वस्तुनः ।
पर्यायस्स्यादलङ्कारस्तत्र काव्यविदां मतः ॥३१६॥

यथा—

कौटिल्यं विजहाति[4] शैशवगतिं तत्कुन्तलश्रेणिकां
सङ्गृह्णाति, वलग्नतः परिहृतं[5] स्थौल्यं कटीमञ्चति ।
मौग्ध्यं[6] सूचितविमुक्तमाकलयते यानं विनोदायनं
श्रीमत्कारितनूभवे नववयोभङ्गीं[7] समालिङ्गति ॥३१७॥

अत्र प्रथमं कौटिल्यं बाल्यगतिमाश्रितमनन्तरं कुन्तलश्रेणिकामाश्रतमित्यादिना एकस्यानेकसंश्रयणवर्णनात्[8]पर्यायः । यद्यपि शैशवगतेः[9]

---

१. M_1—अखिलस्य
२. M_1—°रङ्गित्वं; M_2, M_3, My_2—°रागित्वं
३. M_1, M_3 & M_3 omits निरूप्यते
४. M_1, M_2, M_3 & My_3—विदधाति
५. My_1—परिहृतः
६. M_2—मध्यं
७. This is the emended reading; all mss. read न पदयोर्भङ्गी
८. M_1, M_3, My_2—°वर्जनात्
९. M_2, My_2—शैशवगत°

कौटिल्याश्रयणं कण्ठतो नोक्तं तथापि कोटिल्यं विजहातीत्युक्त्या हानस्य[१] प्राप्तिपूर्वकत्वात्तत्प्राप्तिरुन्नीयत इति नानुपपत्तिः । अयमर्थपर्यायः । शाब्दपर्यायो[२] यथा—

क्षयाशङ्कायोगादसकृदनुचिन्त्यामृतरसः[३]
पुरः पारावारे वसतिमतनोत्तद्विमथनात् ।
ततश्शीतद्योतेऽविशदमरहृत्याथशठजि-[४][५]
द्वचोगर्भागारे वसति पुनरक्षय्यविभवः ॥३१८॥

अत्र कण्ठतो एकस्यामृतरसस्यानेकसंश्रयणवर्णनाद्भवति शाब्दपर्यायः । सर्वोऽप्ययमाधारपर्यायः । सङ्कोचपर्यायो यथा—

कृत्वा जगन्मण्डलताण्डवानि श्रमेण विश्राम्य कुदृङ्मनस्सु ।[६]
शठद्विषद्भास्वति भासमाने भूयस्तमः क्वापि विलीनमासीत् ॥३१९॥

अत्राज्ञानतमसः उत्तरोत्तराधारसङ्कोचात्सङ्कोचपर्यायः । विकासपर्यायो यथा—

---

१ M1 M2, M3, My2—दानस्य

२ M2 - शब्द°

३. क्षयाशङ्का° is the emended reading;
all mss. read क्षयो शङ्का°

४. M1, M3, My2 - °द्योतोऽविसत्
My1—श्रवसत्

५. My1—°हृत्वा

६. M1, M2, M3, My2 कुदृग्जनस्य

प्रसादमहिमा भवन्नयनकोणलीलावल-

त्कटाक्षसु[1]निरीक्षणान्यधिगतः पुरावर्तत ।

पुनस्स परिकल्पते विहरणं[2] शठद्वेषण[3]

त्वदीयजनशेमुषीविलसितान्तरे सम्प्रति ॥३२०॥

अत्र प्रसादमहिम्नः पूर्वाधारपरित्यागेनैवाधारान्तरसङ्क्रमण[4]-वर्णनाद्विकासपर्यायः[5] ।

द्वितीयो यथा । अत्रेदं लक्षणम् ।

स्यादेकस्मिन्ननेकञ्चेत्पर्यायस्सोऽपि कथ्यते ।

यथा—

आदौ बाल्यं नवकिसलयव्रातविद्योतमानं[6]

कौमारश्रीस्तदनु कलिकाकालपाकानुकूला[7] ।

पश्चात्फुल्लोल्लसनसुभगो[8] यौवनाटोपलीला-

श्रृङ्गारोऽङ्गे वकुलमुकुलस्रग्विणश्चाकसीति[9] ॥३२१॥

---

१. The letter सु. though not found in any mss. is added to suit the metre.

२. M_1, My_1, My_2—परिकल्पिते विहरणः

३. °द्वेषण is suggested. All mss. have °द्वेषिणा

४. M_1, M_3—पूर्वाधारान्तरसङ्क्रमवर्णनात्

५. My_1 adds सर्वोऽप्ययमाधेयपर्यायः ।

६. M_1, My_2—°विद्यातमानं

७. M_2—°पाकानुकूल्या

८. M_1, M_3, My_2—पृष्टोल्लसन°
M_2—प्रेस्टोल्लसन°

९. M_1, M_2, M_3, My_2—चाकलीति

अत्रैकस्मिन्नेवाङ्गरूपाधारे[1] क्रमेण बाल्यादेर्वृत्तिवर्णनाद्भवत्याधेय-पर्यायः[2]।

अथ **परिवृत्तिर्**निरूप्यते। यत्र स्वल्पव्ययेनाधिकस्वीकरणं वर्ण्यते तत्र परिवृत्तिरिति निष्कर्षः। अत्रेदं लक्षणम्।

परस्परं विनिमयस्स्वल्पाभ्यधिकवस्तुनोः।
वर्ण्यते यत्र तत्र स्यात्परिवृत्तिरलङ्क्रिया ॥३२२॥

यथा—

एकमञ्जलिपुटं[3] प्रयुज्य ते पादयोर्वकुलभूष मानुषाः।
प्राप्नुवन्ति सनकादिभावनादूरभूरिपुरुषार्थवैभवम् ॥३२३॥

अत्राल्पाञ्जलिमात्रप्रयोगेणाधिकभगवदनुभवरूपपुरुषार्थस्वीकार-वर्णनाद्भवति परिवृत्तिः।

अथ **परिसंख्या** निरूप्यते। यत्रैकमेव वस्त्वेकत्र प्रतिषिध्यान्यत्र नियम्यते तत्र परिसंख्यालङ्कार इति निष्कर्षः। अत्रेदं लक्षणम्।

प्रतिषिध्यैकमेकत्र वस्त्वन्यत्र नियुज्यते।
परिसंख्यासमाख्यावांस्तत्रालङ्कार इष्यते ॥३२४॥

यथा—

वासनानुसरणं मधुव्रतेष्वेव[4], नैव हृदयेषु जायते।
दर्शनीयतर*नाथनायिकासूनुदिव्यपदबान्धवात्मनाम् ॥३२५॥

---

१. M_1, M_2, M[illegible], My_2—भूत instead of रूप

२. M_2—प्राधेयतापर्यायः

३. M_1 M_2—°युगं for °पुटं

४. M_1, M_2, My_2—मधुवृत्तेषु

* Nāthanāyikā is the name of Nammāḷvār's mother

अत्र श्लेषमूलाभेदाध्यवसायेन वासनानुसरणस्य शठवैरिदासजनहृदयेषु निषेधात्तस्यैव मधुव्रतेषु नियमनाद्भवति परिसंख्या। अयं प्रतिषेधश्शाब्दः। आर्थो[1] यथा[2]—

जगद्रक्षादीक्षावति वकुलमालाधरमुनौ
गतो मिथ्यावादः प्रबलकलिभारं, विधिकथा।
श्रिता[3] विष्णोर्दास्यं, स्मरदमनपक्षो विमतिषु[4]
स्थितः पूर्वाटोपः[5], स्थिरतरपरानन्दविभवे ॥३२६॥

अत्र प्रबलकलिभार एव मिथ्यावादः। नान्यत्रेत्याद्येवं कण्ठतोऽनुक्तत्वेऽप्यर्थात्प्रतिषेधस्य प्रतीतेर्भवति परिसंख्या।

अथ **विकल्पो** निरूप्यते। यत्र तुल्यप्रमाणयोः पदार्थयोर्युगपत्प्राप्तौ सत्यां तयोर्विरोधेन युगपत्कर्तुमशक्यत्वात्तयोरन्यतर एवार्थः कर्तव्यतया निश्चीयते, तत्र विकल्पालङ्कार इति निष्कर्षः। अत्रेदं लक्षणम्।

पदार्थयोस्तुल्यबलयोर्विरोधे सति कथ्यते।
विकल्पसंज्ञोऽलङ्कारः काव्य[6]तात्पर्यकोविदैः ॥३२७॥

यथा—

पुरुषार्थप्रदानैकधूर्वहे शठवैरिणि।
स्वातन्त्र्यं पारतन्त्र्यं वा[7] जनोऽयमवलम्बताम् ॥३२८॥

---

१. My_1, My_2—अर्थः
२. M_1 omits यथा
३. M_1, M_3,—श्रता
४. M_1 & My_1 omit वि; विमतिषु is the emendation for विरतिषु
५. M_1, M_2, M_3, My_1—पूर्वाटोप°
६. My_1—कार्य°
७. M_1, M_2, M_3, My_1 –च

अत्र संसारमोक्षप्राप्त्योस्स्वातन्त्र्यपारतन्त्र्यावलम्बनयोर्युगपदवस्थितयोर्विरोधाद्युगपत्कर्तुमशक्ययोरन्यतर एव कर्तव्यतया निर्णीयत इति भवति विकल्पः।

अथ **समुच्चयो** निरूप्यते। स द्विविधः। अविरुद्धानां सन्दर्भरूपः, अहंपूर्विकावतामन्वयरूपश्चेति। अत्राद्यस्येदं लक्षणम्।

यौगपद्याविरुद्धानां पदार्थानामनेकशः।
सन्दर्भो वर्ण्यते यत्र मतस्तत्र समुच्चयः ॥३२९॥

यत्र विरोधाभावेन युगपदुपसंहर्तुं शक्यानां बहूनां पदार्थानामेकदा प्राप्तिर्वर्ण्यते तत्र समुच्चयालङ्कार इति लक्षणार्थः। यथा—

श्रीमत्कारिसुत त्वदद्भुतपरीरम्भामृतारम्भणे[3]
विस्रम्भेण निरर्गलस्वहृदया राकाशशाङ्कानना।
जल्पत्यर्थयते भ्रमत्यभिलुठत्युत्पश्यति भ्रश्यति
त्रस्यत्युद्वलतेऽपि मूर्च्छति नमत्युद्गायति ध्यायति ॥३३०॥

अत्र कासाञ्चित्क्रियाणां किञ्चित्कालभेदेऽपि शतपत्रपत्रशतभेदन्यायेन* यौगपद्यं विश्लेषदशातिशयद्योतनाय विवक्षितमिति लक्षणानुगतिः।

---

१. M¹ & My₁ omit पारतन्त्र्य
२. M₂ omits पदार्थानां
३. M₁, M₂, M₃, My₂—°ग्रारम्भरणी
४. M₂—निसर्गभूस्व°
५. M₂—क्रिया instead of किञ्चित्
६. M₂, My₂—विशेष°
* See *Laukikanyāyāñjali* (Lau. Nyā.), Part II, p. 77.

कारणानामनेकेषामहंप्रथमिकाजुषाम् ।

एककार्यान्वयो यत्र स्यात्तत्रापि समुच्चयः ॥३३१॥

यत्र[१] एकस्मिन्नेव[२] कारणे कार्यसिद्धिहेतुत्वेनोपक्रान्ते सत्यन्येऽपि हेतवो यद्यहमहमिकया[*] खलेकपोतन्यायेन[3] कार्यं साधयन्तीति वर्ण्यते तत्रापि समुच्चयस्स्यादिति लक्षणार्थः ।

यथा[+] (वा) —

वात्सल्यं करुणा क्षमा सुलभता शीलं धृतिर्दक्षता

सार्वज्ञ्यं सकलार्थपूर्त्तिरखिलस्यापन्निरासादरः[४] ।

सौन्दर्यं सुकुमारता नववयोलीला सुवाग्वैभव-

श्शान्तिर्दानभरश्शठद्विषममुं व्याख्याति मुख्यं भुवि ॥३३२॥

अत्र प्रत्येकमेव सर्वलोकमुख्यताप्रकाशनसमर्थानां वात्सल्यादीनां खलेकपोतन्यायेन कार्यसाधकत्वनिबन्धनाद्भवति समुच्चयः ।

अथ **कारकदीपकं** निरूप्यते । यत्रैकं कारकमनेकक्रियासु क्रमेणान्वेति तत्र कारकदीपकमिति निष्कर्षः । तथा च[५] यौगपद्येन बहूनामेकत्रान्वयस्समुच्चय इति तस्मादस्य वैलक्षण्यम् ।

---

१. My_1—अत्र

२. M_1, M_2, M_3 & My_2 omit एव

३. After °कपोत, My_1 has कुमारता नववयो etc. of the third quarter of śl. 332. The portion in between is omitted there.

४. My_2—अखिलव्याप्तन्°

५. M_1 & My_2 omit च

* See Op. cit. p. 23.

\+ 'वा' does not seem to be necessary here

अत्रेदं लक्षणम्[1] ।

क्रियाणां क्रमसिद्धानामेकान्वयजुषां पुनः ।
सन्दर्भो वर्ण्यते यत्र तत्र कारकदीपकम् ॥३३३॥

यथा—

पुरो धावत्युच्चैः प्रणमति मुहुः पश्यति भृशं
प्रशंसत्याशस्ते सविधविविधार्थेषु वलते ।
परानन्दं विन्दत्यपि सकललोकप्रियकृत-
श्शठारातेर्वीथीविहरणविधानेषु मनुजः ॥३३४॥

अत्र मनुजस्य कर्तृकारकस्यैकस्य क्रमेण धावनादिष्वन्वय इत्येकस्यानेकवाक्यार्थान्वयसाधर्म्येण दीपकच्छायानुकारित्वात्कारकदीपकम् । प्रथमसमुच्चयनतिद्वन्द्वीदम् ।

अथ **समाधि**र्निरूप्यते । यत्र केनचित्कारणेन कार्ये आरब्धे[2] सति सन्निहितकारणान्तरेण कार्यस्य सुकरता वर्ण्यते तत्र समाधिरिति निष्कर्षः । कार्यसौकर्यस्य सम्यगाधानात्समाधिरित्यन्वर्थसंज्ञा । द्वितीय[3]समुच्चये प्रत्येकसमर्थानां खलेकपोतन्यायेनाहंपूर्विकाभाजामेककार्यान्वयः । अत्र तु स्वकारणेनैव प्रकृतकार्यारम्भे सति *काकतालन्यायादायातस्य कारणान्तरस्य कार्यसौकर्याधायकत्व[4]मात्रमिति भेदः । अत्रेदं लक्षणम् ।

---

१. M_2 & My_2 omit अत्रेदं लक्षणम्

२. M_1, M_2, M_3—प्रारब्धे

३. M_2—तृतीय°

४. M_1, My_1, My_2—°सौकर्यधायकत्व°
M_2—°सौकर्याधायकत्वं

* See Lau. Nyā., Part I, p. 17. For 'Kākatālīya' see *Citramīmāṃsā*, p. 26.

यत्रारब्धस्य कार्यस्य कारणान्तरसन्निधेः ।
सौकर्यं वर्ण्यते तत्र समाधिस्स्यादलङ्कृतिः ॥३३५॥

यथा—

श्रीकारिसूनोश्चरणारविन्दद्वन्द्वैकसेवोत्सुकमानसानाम् ।
तनूभृतां तत्सदनादुदेति भेरीरवो वारिदगर्जिताभः ॥३३६॥

अत्र जनानां शठवैरिच[1]रणसेवायामौत्सुक्यमेव सम्पूर्णं कारणं न तु भेरीरवश्रवणमपेक्ष्यते । दैवादा[2]पतता तु भेरीरवरूपकारणान्तरेण तत्सेवारूपसौ[3]कर्यमात्रं कृतमिति भवति समाधिः । अयं द्वितीयसमुच्चय-प्रतिद्वन्द्वी ।

अथ **प्रयत्नी**कालङ्कारो निरूप्यते । यत्र कश्चित्साक्षात्स्व[4]शत्रौ परा-क्रमितुमशक्तस्सन् तदनुजीविनं बाधत इति वर्ण्यते तत्र प्रत्यनीकमिति निष्कर्षः । अत्रेदं लक्षणम् ।

शत्रोर्बलवतः प[5]क्षे विक्रमो यत्र वर्ण्यते ।
प्रत्यनीकमलङ्कारस्तत्र स्यात्कविसम्मतः ॥३३७॥

---

१. M_1, M_2, M_3 & My_2 omit चरण

२. M_1,—आप्तता; My_2—आपातता

३. M_1, M_2, M_3 & My_2 omit सौ

४. M_1, M_2—साम्यात्स्वशत्रौ
My_1—साक्षात्स एव शत्रौ

५. My_1 omits पक्षे

यथा—

प्रकृतिरियमविद्यावागुराभिः प्रकृष्य

प्रबलविषयगर्ताभ्यन्तरे पातयन्ती ।

भवदनुचरमेनं बाधते तापभेदं-[१]

स्त्वयि भवति शठारे रक्षके मे न भीतिः ॥३३८॥

अत्र बलवति शठरिपौ पराक्रमितुमसमर्थायाः प्रकृतेस्तदीयबाधन-* मुक्तमिति भवति प्रत्यनीकम् । एवं बलवति शत्रौ प्रतिकर्तुमशक्तस्य तत्सम्बन्धिनि विक्रमः प्रत्यनीकमिति सिद्धान्ते साक्षात्प्रतिपक्षे पराक्रमः प्रत्यनीकमिति कैमुत्यन्यायेन लभ्यते । यथा—

शठारिरात्मीयजनान्तरङ्गे क्रान्तेऽरिभिस्स्वैरविहारसिद्ध्यै ।

निष्कण्टकं तत्सहसा विधत्ते पदद्वयो[२]पल्लवमार्दवार्हम्[३] ॥३३९॥

अत्र निष्कण्टकमित्यनेन साक्षात्प्रति[४]पक्षप्रतिक्षेपणमुक्तमिति प्रत्यनीकभेदः ।

अथ **काव्यार्थापत्तिर्निरूप्यते** । अत्रेदं लक्षणम् ।

कैमुत्यन्यायतोऽर्थस्य संसिद्धिर्यत्र वर्ण्यते ।

काव्यार्थापत्त्यलङ्कारस्तत्र धीरैरुदीर्यते ॥३४०॥

यत्र दुस्साध्यार्थ[५]निष्पादने वर्णिते सत्यन्यस्य सुकरवस्तुनस्सिद्धिः

---

१. M_2—°भेदः

२. M_2—°द्वयं

३. M_1—°अर्हः

४. M_2 omits प्रति

५. My_1—दुस्साधार्थं°

* तदीयानां शठरिपुसम्बन्धिनां बाधनमित्यर्थः ।

दण्यापूपन्यायेन[+][1] वर्णिता चेत्तत्र[2] नाव्यार्थापत्तिरिति तदर्थः । तान्त्रिकाभि-[++]मतार्थापत्तिव्यावृत्त्यर्थं काव्यविशेषणम् । यथा—

श्रुतिविलङ्घन[3]जाङ्घिकता दृशोरसदृशी भवतः परिदृश्यते ।
किमुत कारिकिशोरवचोहरिस्मृतिगतिव्यतिलङ्घनभङ्गिका[4] ।३४१।

अत्रानतिलङ्घनीयश्रुतिविलङ्घने वर्णिते सति स्मृतिव्यतिक्रमणस्य कैमुतिकन्यायलब्धत्वा[5]दर्थापत्तिः ।

अथ **काव्यलिङ्गं** निरूप्यते । किञ्चिद्दुष्करमर्थमुपपाद्य तस्या-सम्भाव्यत्वेन समर्थनापेक्षायां सत्यां, वाक्यार्थं पदार्थं वा हेतुं प्रदर्श्य सोऽर्थ-स्समर्थ्यस्समर्थ्यते[6] चेत्तत्काव्यलिङ्गमिति निर्णयः । अत्रेदं लक्षणम् ।

अर्थो वाक्यपदार्थाभ्यां हेतुभ्यां चेत्समर्थ्यते ।
तत्काव्यलिङ्गमित्याहुरलङ्कारकलाविदः ॥३४२॥

*व्याप्तिविशिष्टपक्षधर्मत्वादिसापेक्षनैयायिकाभिमतलिङ्गव्यवच्छे-दाय काव्यविशेषणम् । तच्च[7] द्विविधम् । वाक्यार्थहेतुकं पदार्थहेतुकं चेति । तत्र वाक्यार्थहेतुकं यथा—

---

१. My_1—दण्डापूपि°; My_2— दण्डापूपित°

२. M_1, M_2 & M_3, omit चेत्

३. M_1—°विलङ्घिक°; M_2, M_3, My_2—°विलम्बिक°

४. M_1, My_2—°व्यतिलङ्घनतङ्गिका

५. M_1, My_1—°न्यायस्थत्वात्

६. My_1—प्रदर्श्यते

७. My_1—इदं च

\+ See Lau. Nyā., Part I, p. 29.

++ Cf. *Vedāntaparibhāṣā*, p. 9f.
तानि च प्रमाणानि षट् प्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपलब्धिभेदात् ।

* Cf. *Tarkasaṅgraha*, p. 22 :
व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः ।

हे चित्त कौटिल्यमलङ्घनीयं त्वदीयमेतद्विनिवर्तयामि ।
अव्याज[1]बन्धुर्भुवि संश्रितानां हठाच्छठानिर्मयि सन्निधत्ते ॥३४३॥

[2]अत्र चित्तकौटिल्यनिवर्तनरूपार्थो दुष्करत्वात्समर्थनसापेक्षः तस्या[3]-व्याजबन्धुरित्या[4]दिवाक्यार्थभूतशठवैरिसन्निधानप्रदर्शनेन समर्थनाद्भवति काव्यलिङ्गमलङ्कारः । पदार्थहेतुकं यथा—

तरङ्गघोषाभिहत[5]स्वनिद्रामुद्रं समुद्रं समुपेक्षमाणः[6] ।
शेते सुखं कारिसुतस्य चेतःप्रासादगर्भे रमया मुरारिः ॥३४४॥

अत्र समुद्रस्योपेक्षण[7]मप्रसिद्धमिति तत्समर्थनाय तरङ्गघोषेति विशेषणं हेतुतयोपात्तमिति भवति पदार्थहेतुकं काव्यलिङ्गम् । क्वचित्पदार्थवाक्यार्थौ परस्परसापेक्ष[8]त्वेन हेतुभावं भजतः । यथा—

वन्दे नित्यं चरणयुगलं केसरस्रग्विणस्त-
द्यत्सम्पर्काद्गलितरजसस्सन्ति सर्वेऽपि मर्त्याः ।
तत्सादृश्यं कथमनुभवेदद्य रक्तारविन्दं
दोषोन्मेषप्रकटिततमस्सङ्कुचद्रोमकूपम्[9] ॥३४५॥

---

१. My_2—निर्व्याज°
२. M_1, M_2, M_3 & My_1 omit अत्र
३. M_1, M_3, My_2—अत्र; M_2—तत्र
४. M_1, M_2, M_3 & My_1 omit आदि
५. M_2—°अभिहतस्य
६. M_2—°समवेक्षमाणः
७. M_2, My_1—उपक्षेपणं
८. M_1, M_2—°साक्षेपक्षत्वेन
९. My_1—°रूपरूपगम्; My_2—°रोगरूपम्

अत्र रक्तारविन्दस्य शठवैरिचरणयुगलसादृश्याभावे यत्सम्पर्कादिति वाक्यार्थो दोषोन्मेषेति पदार्थश्चोभयमपि मिलित्वा हेतुः । अत इदं वाक्यार्थपदार्थोभयहेतुकं काव्यलिङ्गमिति पूर्वस्माद्विशेषः क्वचित्समर्थनीयार्थसमर्थके वाक्यार्थे पदार्थो[1] हेतुर्भवति । यथा—

आस्येनेन्दुर्नहि शठरिपोरस्य सादृश्यमेति
प्रादुर्भूतं दुरितममितं प्राक्कलङ्कापदेशात् ।
अग्रेऽप्येतद्बहुलगतिमत्कान्तिदारिद्र्यकृत्स्या-
त्तत्प्रत्यग्रं स्फुरितरुचिरं भावये तस्य वक्त्रम् ॥३४६॥

अत्र समर्थनीये चन्द्रस्य शठवैरिवदन[2]साम्याभावे प्रादुर्भूतमिति प्रथमवाक्यार्थभूतः प्राक्तनकलङ्कापदेशदोषाविर्भावः[3] उत्तरवाक्यार्थभूतं तद्दोषकर्तृककालान्तरकान्तिदारिद्र्यकरणं च हेतुः । प्राक्तनदुरित[4]कर्मणः यत्किञ्चित्कालभोगेन नाशावश्यंभावादुत्तरत्रोद्भूतसुकृतांशोन्मेषोऽपि स्यादित्याशङ्कावकाशे द्वितीय[5]वाक्यार्थसमर्थनसापेक्षस्तत्र बहुलगतिमदित्येकपदार्थो हेतुः । अनेन चन्द्रस्य पूर्वदोषसत्त्वेऽपि महत्साम्यबुद्धिरूपमहद्दोष[6]सम्भवात्कालविशेषेऽपि सुकृत[7]गन्धो नास्तीति गम्यते । अतस्समर्थनीयसमर्थको हेतुः वाक्यार्थस्तत्समर्थनायान्यः पदार्थो हेतुरिति भवति काव्य-

---

१. M_2 adds न
२. M_1, M_2, M_3 & My_2 add दुरित
३. M_1, My_1, My_2—°आविर्भावं
४. M_1, M_2, M_3 & My_2 omit दुरित
५. My_1—द्वितीयं
६. My_1—°महादोष°
७. M_1, My_1—सकृत°

लिङ्गविशेषः[१] ।

क्वचित्परस्परविरुद्धयोस्समर्थनीययोरुभयोः क्रमादुभौ हेतुभावं भजतः । यथा—

श्रीशस्याग्रगतस्य[२] सुन्दरतनुलक्ष्मीविशेशं गृणन्[३]
दृग्दोषोदयशङ्कितोऽक्षियुगलीमाच्छादितुं वाञ्छति ।
सत्तार्थी च बहुत्वमिच्छति दृशां भूयश्शुभाशासना-
संप्राप्त्योर्युगपन्निविस्टहृदयो जीयाच्छठारिस्सदा ॥३४७॥

अत्र प्रसन्नभगवद्दिव्यविग्रहविषययोर्मङ्गलाशासन*स्वानुभवयोः[४] परस्परविरुद्धयोर्युगपदसम्भवात्समर्थनापेक्षायां[५] प्रथमे मङ्गलाशासनरूपेऽर्थे दृष्टिदोषोदयसम्भावनापूर्वकलोचराच्छादनवाञ्छारूपः[६] दृग्दोषेत्यादि[७]प्रथम-वाक्यार्थो[८] हेतुः । द्वितीये स्वानुभवरूते[९]ऽर्थे सत्ताप्रार्थनापूर्वकनयनानन्त्य-

---

१. M_1, M_2, M_3, My_2—काव्यलिङ्गम् ।
२. M_1, M_3—°गतस्स
३. M_1, M_3, My_1—°विशेषग्रणा
४. M_1, M_2, M_3, My_2—मङ्गलाशासनानुभवयोः
५. My_1—समर्थनासापेक्षायां
६. M_2, M_3—°ग्राच्छादनतारूपः
My_2—°ग्राच्छादनता वा रूपः
७. M_1, M_2, M_3—दृग्दोषादि°
८. M_2—°वाक्यार्थे
९. M_2—द्वितीयस्यानुभव°
* The term "Maṅgalāśāsanā" which literally means "wishing for the welfare" is known in *Śrīvaiṣṇavasampradāya* as the name for a Tamil hymn of Periyāḷvār which begins with—Pallāṇḍu Pallāndu etc., invoking auspiciousness and safety for the Lord's lotus-feet. By a transference of meaning it also means "blessings."

कामनारूपो द्वितीयवाक्यार्थो हेतुरिति द्वाभ्यां क्रमेण विरुद्धार्थयोस्समर्थित-त्वादिदं पूर्वस्मादतिचमत्कारशालि ।

क्वचित्परस्परविरुद्धयोस्समर्थनापेक्षायामेक एव तत्समर्थको हेतु-र्दृश्यते । यथा—

कारिनन्दनमनःस्थितौ सुखं भावयन्बहुतरं[१] परः[२] पुमान् ।
***दिव्यदेशविनिवेशमात्मनो व्यर्थमर्थसहितं च मन्यते ।।३४८।।**

अत्र दिव्यदेशवासवैयर्थ्यसार्थक्यमनयोः परस्परविरुद्धतया समर्थना-पेक्षायां तत्र द्वयोरपि शठरिपुमनोवासविषयकसुखभावनमेकमेव हेतुः । तथाहि[३] तन्मानसवासलाभे सति[४] लब्धव्यवस्त्वन्तरापेक्षाभावात्तदर्थं[५] दिव्य-देशवासो निष्प्रयोजन एवेति ज्ञानं, तन्मनोवासस्य दिव्यदेशावस्थानेनैव लब्धत्वाद्दिव्यदेशवासस्य प्रयोजनमित्यनुसन्धानम् । अतः दिव्यदेश-वासवैयर्थ्यसार्थक्ययोरेक एव मनोऽवस्थितिर्हेतुरिति भवति चमत्कारा-तिशयः ।

---

१. M_1, M_2, M_3, My_2—बहुपरं

२. M^1—परं

३. M_1, M_2, M_3, My_2—अपि instead of हि

४. M_1, M_2, M_3—तन्मानसलाभे सति;
My_2—तन्माडसलाभेति

५. M_1, M_2, M_3—°अपेक्षायां मदर्थं;
My_2—°अपेक्षायाः मदर्थं

* According to the *Śrivaiṣṇava* tradition, there are 108 *divya-deśas* or holy shrines where the presence of God is said to be felt. For details see L. V. Gopalan, *Sri Vaishnava Divya Desams*, Pub. Visishtadvaita Pracharini Sabha, Madras, 1972. For details of Nammāḷvār's association with the deities of these see *Prapannāmṛta*, ch. 104

अथार्थान्तरन्यासो निरूप्यते । अस्यालङ्कारस्य भेदद्वयमस्ति । यत्र विशेषे प्रस्तुते सति[1] तेन सहाप्रस्तुतसामान्यस्य न्यसनं तत्रैको भेदः । यत्र सामान्ये प्रस्तुते सति तेन सहाप्रस्तुतविशेषस्य न्यसनं तत्रैको भेद इति । अत्रेदं लक्षणम् ।

उच्यते यत्र सामान्यमिशेषौ स परस्परम् ।
भवेदर्थान्तरन्यासोऽलङ्कारः काव्यविन्मतः[2] ॥३४९॥

तत्राद्यो[3] यथा—

अनाद्यविद्यामरुभूविहारदुश्शोषणानामिव[4] देहभाजाम् ।
तापं शठारिः कुरुते निवृत्तं महात्मनां किं भुवि दुर्निवारम् ॥३५०॥

अत्र तापनिवर्तनरूपप्रस्तुतविशेषेण[5] सहाप्रस्तुतं महात्मनामिति सामान्यं[6] न्यस्य तेन[7] शठरिपोरुल्लोकशक्तित्वात्तापनिवर्तनं तस्य कियदिति समर्थ्यत इति प्रथमोऽर्थान्तरन्यासः ।

द्वितीयो यथा—

तुच्छो हि सर्वैरनपेक्षणीयो व्यपेक्ष्यतेश्लाघ्यतरानुबन्धात् ।
श्रीकारिसूनोः पदपद्मलग्नस्संप्रार्थ्यते रेणुकणोऽपि सर्वैः ॥३५१॥

१. M_1 omits सति
२. My_2—तत्र सम्मतः
३. M_1, M_2, M_3, My_1—अत्र
४. M_1, M_2, M_3, My_2—अशोषणानां
५. M_1, M_2, M_3 – °प्रकृत°
६. My_1—सहात्मेनातिसामान्यं
७. M_2 adds तु

यथा—

अत्र तुच्छो हीत्यादिना पूर्वार्धेन प्रस्तुतसामान्यं निर्दिश्य तत्समर्थकत्वेन[1] तेन सह श्रीकारिसूनोरित्युत्तरार्धेनाप्रस्तुत[2]विशेषस्य न्यसनमिति भवति द्वितीयोऽर्थान्तरन्यासः । एवमप्रकृतेन[3] प्रकृतसमर्थनमुदाहृतम् । प्रकृतेनाप्रकृतसमर्थनं यथा—

स्थानप्रतिष्ठा सकलार्थसिद्धौ निदानमित्युक्तिरकैतवेयम् ।
तथा हि चिञ्चातरुमूलपीठीभाजं शठारिं भजते स्म शौरिः ।।३५२।।

अत्र स्थानप्रतिष्ठा सर्वार्थसिद्धिहेतुरिति सामान्यस्याप्रकृतस्य तथा हीत्यादिनोक्तेन प्रकृतशठकोपलब्धभगवत्प्राप्तिरूपार्थेन समर्थनात् प्रकृतेनाप्रकृतसमर्थनरूपोऽर्थान्तरन्यासः ।

अथ **विकस्वरो** निरूप्यते । यत्र कञ्चि[4]द्विशेषं विन्यस्य त[5]स्याप्रसिद्धौ । तत्समर्थनाय सा[6]मान्यं विन्यस्य तस्याप्रसिद्धिश[7]ङ्कया तत्समर्थकत्वेनोपमारीत्यार्थान्तरन्यासरी[8]त्या वा पुनर्विशेषान्तरं विन्यस्यते, तत्र विकस्वराख्योऽलङ्कार इति निष्कर्षः । अत्रेदं लक्षणम् ।

---

१. M_2 omits तत्समर्थकत्वेन
२. M_1,My_1, My_2—प्रस्तुत°
३. M_1, M_3—एवमत्र प्रकृतेन
४. M_1, My_1, My_2—किञ्चित्
५. M_2 omits तस्य
६. M_2 omits सामान्यं
७. My_2—प्रसिद्ध°
८. M_1 omits अर्थान्तरन्यासरीत्या.
M_2 has अर्थान्तररीत्या.

न्यासो विशेषसामान्यविशेषाणां यदीष्यते ।

विकस्वराख्योऽलङ्कारस्तत्र स्याद्विदुषां मतः ।।३५३।।

यथा—

कारिभूरपि च केन हेतुना चाल्यते जगति संश्रितावनात् ।

अप्रकम्पगतयो दृढ[६]व्रता ह्यद्भुतं कुलधराधरा इव ।।३५४।।

अत्र प्रकृतं शठकोपस्याश्रिररक्ष[७]णाविचाल्यत्वं विशेषं निर्दिश्य तत्समर्थनाय दृढव्रतानामप्रकम्प्यगतित्वरूपं सामान्यमुपन्यस्य तस्यापि कुलपर्वतौपम्येन विशेषणसमर्थनाद्विकस्वरः । यथा वा—

चेतः पातकजातकातरतमं दूयस्व नैव स्वयं

श्रेयः कारितनूभवः कलयते भूयो दयोदञ्चितः ।

[१]दक्षा रक्षणदीक्षणा न हि धुरं स्वीयां निराकुर्वते

भानुः किं न धुनोति दुर्दुमतमस्सङ्कोचमम्भो[२]रुहाम् ।।३५५।।

अत्र चेत इत्या[३]द्यभिहितविशेषसमर्थनाय दक्षा[४] इत्यादिसामान्यमुपन्यस्तम् । तत्समर्थनाय भानुरित्या[५]दिना विशेषविन्यसनाद्विकस्वरः ।

---

१. M_1, M_2, M_3, My_2—धृतव्रता

२. M_2—आश्रितस्यापि रक्षण°

३. My_1—दीक्षा

४. M_2—धुनोति······रुहम् ।।

५. M_2 has a gap for अत्र चेत इत्यादि.

६. My_1—दीक्षा

७. M_2 omits ना

पूर्वं विशेषसमर्थकसामान्यस्योपमया समर्थनमत्र त्वर्थान्तरन्यासेनेति भेदः ।

अथ **प्रौढोक्ति**र्निरूप्यते । यत्र कार्यातिशयाहेतुना तदुत्पादनं[१] वर्ण्यते तत्र प्रौढोक्तिरिति निर्णयः । अत्रेदं लक्षणम् ।

***स्यात्कार्यातिशयाहेतोस्तद्धेतुत्वप्रकल्पनम् ।**
प्रौढोक्तिस्तत्र विख्याता प्रौढानां हृदयङ्गमा ॥३५६॥

यथा—

हिमवन्नगमेदिनीभवललवलीपाकवलक्षलक्षणा[२] ।
शठकोपमुनेर्मुखाम्बुजे दरहासाङ्कुरधोरणी विभा[३] ॥३५७॥

अत्र केवललवलीनामत्यन्तधवलिमसिद्ध्यर्थं हिववन्नगमेदिनीत्वविशेषणमुपात्तम् । अन्यथा तद्विशेषणस्यानर्थक्यं स्यात् । धवलिमातिशये तु[४] तद्भूमीजायमानत्वं न हेतुः । तथापि तद्धेतुत्वप्रकल्पनात्प्रौढोक्तिः ।

अथ **सम्भावना**लङ्कारो निरूप्यते** । अत्रेदं लक्षणम् ।+

---

१. M₂—उपादानं
२. M₂—°लवलीला तु वलक्ष°
३. M₂, M₃, My₁, My₂—विभाति
४. M₂—°अतिशयहेतु
* Cf. Ku. Ā., śl. 125a.
** After this, My₁ has तत्त्रिविधम् । यत्नं विना इष्टार्थसिद्धिरूपं etc. (passage before śl. 364), which is the division of *Praharṣaṇālaṅkāra* and not *Sambhāvana.*
\+ After this, My₁ gives the verse अर्थस्य कस्यचित् etc. of the next page which is the definition of *Mithyādhyavasiti* and not *Sambhāvana*, omitting the passages in between.

विवक्षितार्थनिष्पत्त्यै स्यादित्थमिति तर्कणम् ।

तत्सम्भावनमित्याहुरलङ्कारविचक्षणाः ॥३५८॥

यथा—

अहं यदि स्यां पुरुषः प्रधानः परं करिष्यामि विशालमण्डम्[१] ।

शठद्विषः कीर्तिकुरङ्गनेत्र्या विलासविक्रीडितविक्रमार्हम् ॥३५९॥

अत्र कीर्तेरपरिमितत्वसिद्धये यद्यहं प्रधानपुरुषस्स्यां परं पृथुला-ण्डनिर्माता[२] तदा स्यामिति वर्णनात्सम्भावनम् ।

अथ **मिथ्याध्यवसितिर्निरूप्यते** । अत्रेदं लक्षणम् ।

अर्थस्य कस्यचिद्यत्र[३] मिथ्याभूतत्व[४]सिद्धये ।

मिथ्यार्थान्तरमुच्येत मिथ्याध्यवसितिर्मता ॥

यथा—

श्रीमत्कारिकुमारपादकमलद्वन्द्वामृतास्वादिनां

पुंसामुज्ज्वलवैभवस्य गणनां कुर्याद्यथेच्छं सदा[५] ।

सर्वो जन्तुरचिद्गुणानभिहतज्ञानप्रभाभासुरं[६]

शब्दब्रह्म सकृन्मुखाद्बहुमुखं[७] सार्थं पुनर्व्याहरन्[८] ॥३६१॥

---

१. M_1—अण्जम्, M_2—विशालमण्डलम्

२. M_1, My_2—अमलपृथुलाब्ज°
M_3—अपरं पृथुलाण्ड°

३ M_1, M_2, M_3, My_2—तत्र स्यात्कस्यचित्

४. M_1, M_2—मिथ्याकृतत्व°

५. M_1, M_2—यथेच्छसदा; My_2, यथेच्छन्दसा ।

६. M_1, M_3, My_1 My_2—°भासुरः

७. My_1—सदृङ्मुखात्

८. M_2—साध्यं पुनर्व्याहरेत् ॥

अत्र शठवैरिसमाश्रितजनवैभवगणनामिथ्यात्वसिद्धये[1] चराचरात्मकस्य जन्तोः[2] प्राकृत[3]गुणाभिहतिरहितज्ञानप्रभाभासुरत्वादिमिथ्याभूतार्थप्रकल्पनान्मिथ्याध्यवसितिः । नात्रासम्बन्धे सम्बन्ध[4]रूपातिशयोक्तिशङ्का कार्या । कस्यचिदर्थस्य मिथ्या[6]त्वसिद्ध्यर्थं मिथ्याभूतार्थान्तरकल्पनात्मना वि[5]च्छित्तिविशेषसद्भावात् (अतः) ततोऽस्याः भेदः ।

अथ **ललिता**लङ्कारो निरूप्यते । *प्रस्तुते धर्मिणि यो वणनीयो वाक्यार्थस्तत्प्रतिबिम्बभूतस्य[7] तत्सदृशवर्णनीयवाक्यार्थस्य वर्णनं ललितमिति निष्कर्षः । अत्रेदं लक्षणम् ।

सदृशावर्ण्यवाक्यार्थवर्णनं प्रस्तुते यदि ।
ललितं तत्र काव्यज्ञकल्पनाललितं मतम् ॥३६२॥

यथा—

चिञ्चातरोर्मूलवितर्दिकायां वसन्नसौ कारिकुमारवर्यः ।
विशालरूपी जगदन्तराले त्रिविक्रमस्य क्रममन्वयासीत् ॥३६३॥

अत्र कीर्त्या जगदाक्रमणमकरोदिति प्रस्तुतमर्थमनुपन्यस्य तत्प्रतिबिम्बभूतत्रिविक्रमव्यापारोपन्यासाल्ललितालङ्कारः ।

---

१. M_1, M_2, M_3, My_2—°सिद्ध्यै
२. M_1, M_2, M_3 & My_2 omit जन्तोः
३. M_2—प्रकृत°
४. M_1, M_2—सम्बन्धा
५. M_2 omits त्व
६. M_1, M_3, My_1, My_2—°अर्थान्तरकल्पनात् नाविच्छित्ति°
७. M_1, M_2 & M_3 omit स्य
* Cf. Op. cit., p. 137.

अथ प्रहर्षणं निरूप्यते । तत्त्रिविधम् । यत्नं विना इष्टार्थसिद्धिरूपं, वाञ्छितादधिकार्थसिद्धिरूपं[1], उपायार्थयत्नात्फलप्राप्तिरूपञ्चेति । तत्राद्यस्येदं लक्षणम् ।

+सिद्धिरुत्कण्ठितार्थस्य जायते यत्नमन्तरा ।

तत्र[2] प्रहर्षणं नाम कथ्यते काव्यकोविदैः ॥३६४॥

अत्रोत्कण्ठा इच्छाविशेषः ।

"*सर्वेन्द्रियसुखास्वादो यत्रास्तीत्यभिमन्यते[3] ।

तत्प्राप्तीच्छां ससङ्कल्पामुत्कण्ठां कवयो विदुः ॥" इत्युक्तत्वात्[4] ।

तद्विषयस्यार्थस्य यत्नं विना लाभः प्रहर्षणमिति तदर्थः[5] । यथा—

आशादेशिनि मानसे सति सतामुत्कूलरीतिस्पृशा-

मुल्लासैर्हसिताङ्कुरस्य कलयन्निस्तन्द्रचन्द्रातपम् ।

वक्षस्सद्वकुल[6]स्रजां परिमलैर्दिङ्मण्डलं[7] वासय[8]-

न्नग्रेऽनुग्रहजाग्रवीक्षणरसो[9] नाथ प्रियो दृश्यते ॥३६५॥

---

१. M_2 omits वाञ्छितादधिकार्थसिद्धिरूपं

२. M_2—एतत् for तत्र

३. M_1, M_2, M_3, My_2—अभिधीयते ।

४. My_1—उक्तलक्षणम् ।

५. M_1, M_2, M_3, My_3—प्रहर्षमित्यर्थः ।

६. M_1, M_2, M_3, My_2—वक्षस्यद्वकुल°

७. M_1, M_2—भूमण्डलं

८. My_1—व्यापयन्

९. M_1, M_2, M_3, My_2—°रसा

* **Cf. Ku. Ā., p. 139**

\+ **Cf. Ibid., śl. 129a.**

अत्र कदा वा तत्समागमसम्भव इत्युत्कण्ठावतां[1] महतां पुरस्तदानीमेव यत्नमन्तरेणाभिलषितशठवैरिदर्शनं महापुरुषार्थसिद्धिरिति भवति प्रथमं[2] प्रहर्षणम् । द्वितीयस्येदं लक्षणम् ।

+यत्र संसिद्धिरर्थस्य वाञ्छितादपि कस्यचित् ।

प्रहर्षणं द्वितीयं स्यादलङ्कारज्ञसम्मतम्[3] ॥३६६॥

केनचित्कञ्चिदर्थमपेक्ष्य[4] यत्ने कृते तस्य तस्मादप्यधिकार्थलाभश्चेत्तच्च प्रहर्षणमिति तदर्थः । यथा—

दुष्पूरोदरपूरणाय वसुधाचक्रं परिक्रामतो[5]

जन्तोरस्य कदाचिदन्तिकजुषः श्रीमच्छठद्वेषणः[6] ।

स्वाङ्गीकारसुपावनै रसभरश्लाघ्यैः पुनर्वस्तुभिः

कृत्वा तर्पणमर्पयत्यसदृशानन्दं मुकुन्दाप्तिजम्[7] ॥३६७॥

अत्र स्वल्पतरस्वोदरभरणयत्नाच्चरतो दैवात्परिसरगतस्य[8] जनस्य

---

१. M_1, M_2, M_3—उक्तवतां

२. M_2 omits प्रथमं

३. M_2—अलङ्कारस्सतां मतः

४. M_2—किञ्चिदन्तरं

५. My_1—परिक्राम्यतो

६. °द्वेषणः is suggested; all mss. have° द्वेषिणः

७. M_1, M_2, M_3 My_2—°आप्तजम् ॥

८. M_2—परिवार°

\+ Cf. Ibid., śl. 130a.

शठरिपुः पावनभोग्यतरस्व[1]प्रसादप्र*दानपूर्वकं भगवल्लाभजनितनिख-
धिकानन्दमर्पयतीत्यधिकार्थलाभकथनात्प्रहर्षणम् । तृतीयस्येदं लक्षणम् ।

उपायनिष्कृतिहेतौ कृते यत्नेऽपि तत्र चेत् ।
साक्षात्फलस्य संसिद्धिस्तदपि स्यात्प्रहर्षणम् ।।३६८।।

यथा—

साक्षादमृतावाप्त्यै शठरिपुचरणाम्बुजद्वयीं भजता[2] ।
तत्रैव लब्धममृतं निख[3]धिकं सर्वथापि दुरधिगमम् ।।३६९।।

अत्र प्राप्त्युपायभूताद्वकुलभूषणचरणाम्बुजभजनात्तत्रैव सर्वप्रकार-
दुर्लभनिरवधिकसाक्षादमृतलाभ इति भवति तृतीयं प्रहर्षणम् ।

अथ **विषादना**लङ्कारो निरूप्यते । य[4]त्र स्वाभिमतार्थसिद्धयर्थं यत्ने

---

१. My_1—पावनतरभोग्यस्व°

२. My_1—भजतः

३. M_2—omits निरवधिकं

४. My_1—अत्र

* The word 'Prasāda' here is used in the popular sense of food etc., sanctified after offering to the Lord.
Traditionally Nammāḻvār is said to be the incarnation of Viṣvaksena. However, food etc., once offered to Viṣvaksena should not be used by the devotees. Cf. *Sāttvaṭasamithā*, X. 57.

द्विजातेः दत्तशिष्टस्य पुष्पपत्रादिकस्य च ।
विहितश्चाम्भसि त्यागो विष्वक्सेनार्चने कृते ।।

Vide also *Āgamaprāmāṇya*, p. 164 :

यतो भगवदर्थेन त्यक्तं स्रक्चन्दनादिकम् ।
पश्चादभोग्यतां याति विष्वक्सेननिवेदनात् ।।
अत एव निवेद्यादि ततोऽर्वागेव सात्त्वतैः ।
सेव्यते तेन तत्तेषामुत्कर्षस्यैव कारणम् ।।

कृते सति दैवात्तद्विरुद्धानभिमतार्थप्राप्तिर्भवति तत्र विषादनमिति निष्कर्षः। अत्रेदं लक्षणम् ।

यत्राभिमतसिद्ध्यर्थं कृते यत्ने यदृच्छया ।
अनिष्टार्थोपलब्धिश्चेद्भवेत्तत्र विषादनम् ॥३७०॥

यथा—

श्रीमन्तमुत्कटकृपाविलसत्कटाक्षं
दक्षं[१] शठद्विषमुपेक्ष्य गृहेषु सक्ताः ।
स्वेष्टानुकूलविषयानुभवैकयत्ना-[२]
स्सद्यः कृतान्तसदनान्तगता[३] भवन्ति ॥३७१॥

अत्र स्वाभिमतविषयानुभवसिद्ध्यै यत्ने सत्येव तद्विरुद्धदेहविगम-[४]रूपार्थस्यापतनाद्विषादनम् ।

अथो**ल्लासो** निरूप्यते । स च चतुर्विधः[५] । अन्यस्य गुणेन तदन्यस्य गुणोत्पत्तिवर्णनेन,[६] अन्यस्य दोषेण तदन्यस्य दोषोत्पत्तिवर्णनेन, अन्यस्य[८] गुणेन तदन्यस्य[७] दोषोत्पत्तिवर्णनेन, अन्यस्य[९] दोषेण तद-

---

१. M_2—omits दक्षं; My_1—दीक्षं

२. °यत्नाः is suggested. All mss. have °यत्नं

३. M_1, M_2, M_3, My_2—°रता

४. M_1, M_2, M_3, My_2—°देहाभिगम°

५. M_1, M_3, My_2—द्विविधः

६. M_2—गुणोत्पत्तिभेदात् । अत्रेदं लक्षणम् ।

७. My_1—अन्येन; My_2 omits स्य

८. M_1, M_2, & M_3, omit स्य

९. My_1 omits स्य

न्यस्य गुणोत्पत्तिवर्णनेन चेति[१] भेदात् । अत्रेदं लक्षणम् ।

अन्यस्य[*] गुणदोषाभ्यां तदन्यस्यापि[२] तौ यदि ।

उल्लासस्स्यादलङ्कारश्चतुर्धा विदुषां मतः ॥३७२॥

तत्राद्यो[३] यथा—

श्रीकारिसूनुप्रवणाङ्घ्रिपाथोरुहावगाहावसरप्रसङ्गः ।

साक्षादपस्यादिति कामयन्ते गङ्गापगामुख्यमहातटिन्यः ॥३७३॥

अत्र तदीय[४]महनीयतागुणेन तत्पादावगाहात्स्वतो जगत्पावनी-नामपि गङ्गादिनदीनां पावनत्वगुणो वर्णित इति भवत्युल्लासः प्रथमः[५] ।

द्वितीयो यथा—

सन्तस्सन्ततमन्तरायतिमिरप्रद्योतन[**]द्योतन-

श्रीभाजश्शठवैरिणः परिसरे तिष्ठध्व[+]मत्यव्यथाः[६] ।

सर्वेऽप्यत्र भवन्त्यहङ्कृतिशिखि[७]ज्वालाकलापस्स्वयं

दग्धा एव निजान्तरस्थितिमतामप्यात्मसाम्यप्रदाः ॥३७४॥

---

१. M_1, M_2 & M_3 omit चेति

२. M_1, M_3, My_1, My_2—च instead of अपि

३. M_1, M_2, M_3, My_1—अत्र

४. M_4 omits तदीयं

५. M_2—भवति प्रथमोल्लासः ।

६. अत्यव्यथाः is the emendation for इत्यव्यथाः;
M_2 has gap for व्य;
M_3—अवथाः

७. M_1—सर्वेऽप्यहङ्कृति°; M_3—भवन्त्वहङ्कृति°

* Cf., Ku. Ā., śl. 133a.

** Here प्रद्योतन is used in the sense of cutting or dispelling. "दो" अवखण्डने is the root.

\+ The *Ātmanepada* form is according to Pāṇini I. 3.23 : प्रकाशस्थेयाख्ययोश्च ।

अत्र सर्वेषामप्यहङ्कार[1]दहनदग्धदोषेण तदभ्यन्तरवर्त्तिसाधूनां स्व[2]स्वरूपनाशरूपो दोषो वर्णित इति भवति द्वितीयोल्लासः ।

तृतीयो यथा—

जगदुज्जिजीवयिषया[3] दयानिधि-
श्शठाजित्परं विजयते निरर्गलः[4] ।
यदि नायमाश्रयति तं भवाविल-
स्तदमुष्य[5] दोषभर एव भवलम् ॥३७५॥

अत्र शठजिन्महिमगुणेन तदनाश्रयणं चेतनस्य[6] दोषत्वेन वर्णित्तमिति भवत्यन्यगुणेनान्यदोषोत्पत्तिवर्णनरूप उल्लासः ।

चतुर्थो यथा—

शठद्विषोऽनुग्रहतोऽस्य केवलं तदेव ते मानस दुर्लभं[7] फलम् ।
विनिर्गतं यद्वनितासुदृक्कलाकरालहालाहलपावकान्तरात् ॥३७६॥

अत्र विषयक्रौर्यरूप[8]दोषेण विनाशं विना स्वस्वरूपेण विनिर्गमनं गुणत्वेन वर्णितमिति भवति दोषेण गुणवर्णनरूप उल्लासः ।

---

१. My_1 omits अप्यहङ्कार
२. M_1, M_3, My_1 & My_2—omit स्व
३. M_1, My_1 My_2—°उज्जीवयिषया
४. M_1, My_1, My_2—निरर्गणः ।
५. M_1, M_2, M_3—आश्रयति विलस्तत्
६. M_2—चेत् अस्य
७. M_2 omits दुर्लभं; M_1,My_1—दुर्बलं
८. M_1 M_2, M_3 & My_2 omit रूप

अथावज्ञालङ्कारो निरूप्यते । स च द्विविधः । अन्यगुणेनान्यगुणाभाववर्णनरूपः, अन्यदोषेणान्यदोषाभाववर्णनरूपश्चेति ।

अत्रेदं लक्षणम् ।

अन्यस्य गुणदोषाभ्यां न तदन्यस्य तौ यदि ।

भवेदवज्ञालङ्कारस्तत्र संख्यावतां[१] मतः[२] ॥३७७॥

तत्र प्रथमा यथा—

मरन्दधारामधुरा[३] शठारेरुदारगम्भीरतराशयोक्तिः[४] ।

विद्वज्जनानन्दविधायिनी चेत्का हानिरस्याः[५] कुजनापराधात् ॥३७८॥

यथा वा—

सर्वेऽपि विज्ञानबलावलिप्ताश्[६]शठद्विषो वैभवराशिलेशम् ।

न शक्नुवन्त्याक्रमितुं समुद्रे द्रोणोऽपि च स्वोचितमम्बुमाली[*] ॥३७९॥

पूर्वत्र दिव्यसूक्तेस्सहृदयहृदयाह्लादकत्वेन दुर्विदग्धजनमानसोल्लासगुणाभावो वर्णितः । अत्र दिव्यवैभवस्यापरिच्छेद्यस्य वृद्ध्या[८] तद्ग्रहीतॄणां[७] यावद्ग्रहणशक्तिवृद्ध्यभावो वर्णित इत्यन्यगुणेनान्यगुणाभाववर्णनारूपेयमवज्ञा ।

---

१. My_1—सम्भावतां
२. M_1, M_3, My_1, My_2—मतम्
३. M_1 omits मधुरा
४. M_1, M_3,—°उक्तिम्
५. M_1—अस्यां
६. M_1, M_2, My_1—बलाविलप्ताः
७. M_2—वृत्त्या
८. M_2—तदग्रहीतॄणां
* अम्बु मलते इति अम्बुमाली । "मल" धारणे is the root.

द्वितीया यथा—

दृढागाढ[*]प्रज्ञा[1]रसभरपरीवाहरभसः
पुमानेको लोके त्ववतरति नास्मिन्[2] यदि पुनः ।
क्षतिस्[3]तावत्का वा वकुलधरसिद्धान्तसरणेः
किमर्कच्छायायाः[+] कुमुदमुदयं नैव तनुते ॥३८०॥

अत्र कुजनकुमुदयोर[4]स्वीकरणणानुल्लासनदोषाभ्यां विश्ववैशद्य-हेतुभूतयोश्शठवैरिसिद्धान्तरविप्रभयोर्हानिरूपदोषाभा[5]ववर्णनादन्यदोषेणान्य-दोषाभावरूपावज्ञा द्वितीया ।

अथानुज्ञा निरूप्यते । अत्रेदं लक्षणम् ।

गुणसम्भवतो यत्र दोषस्याभ्यर्थना यदि ।
तत्रानुज्ञा परिज्ञातृ[6]मानसोल्लासिनी भवेत् ॥३८१॥

---

१. M_1, M_2, M_3, My_1—°आगाढा°

२. नास्मिन् is the emendation for नास्यां

३. M_2—क्षितिः

४. My_1—कुमुदकुजनयोः

५. M_2—°दोषभाव°

६. M_1, M_2, M_3—परिज्ञात्र

* आगाढ°—आ समन्तात् गाढा इति विग्रहोऽनुसन्धेयः ।

\+ यदि कुमुदमुदयं नैव तनुते अर्कच्चायायाः किं इत्यन्वयोऽवगन्तव्यः ।

यथा—

काङ्क्षे साक्षादहमिह न[१] हि श्रीपरव्योमसीमा-

भोगभोगं शठहर सदा सन्निधौ सन्निधौ ते ।

वक्षोदेशस्फुरितवकुलव्रात[२]सौरभ्यलाभा-

द्वापांध्यब्जन्यसनघटनात्स्यामलिर्देहली वा ॥३८२॥

अत्र दोषहेतुत्वेन निषिद्धयोरलिदेह[३]लीरूपतिर्यक्स्थावरजन्मनो-रङ्गीकार[४]रूपदोषस्य शठवैरिसन्निधौ सर्वदुर्लभतदीयवकुलमालिका-परिमलसमास्वादमहापुरुष[५]चरणसम्पर्करूपगुणसम्भवेन प्रार्थ्यमानत्वादनु-ज्ञालङ्कारः ।

अथ लेशालङ्कारो निरूप्यते । अत्रेदं लक्षणम् ।

***क्रमेण दोषगुणयोर्गुणदोषत्ववर्णनम् ।**

यदि स्यात्तत्र लेशाख्योऽलङ्कारः कविभिस्स्मृतः ॥३८३॥

यत्रानुकूलत्वाद्दोषस्य गुणत्वं, प्रतिकूलत्वाद्गुणस्य दोषत्वं[६] च वर्ण्यते

---

१. My_1—स instead of न

२. M_2—gap for व्रात

३. M_1, My_1, My_2—अली°

४. M_2 & My_2 omit रूप

५. M_1—°परिमलास्वादिदं महापुरुष°
M_2, M_3, My_2—°परिमलास्वादमहापुरुष°

६. M_1, My_2—प्रतिकूलत्वाद्दोषस्य गुणत्वं
My_1—गुणस्यापि दोषत्वं

* Cf. Ku. Ā., śl. 138a.

चेत् द्विविधो लेश इति तदर्थः ।+

अत्राद्यो यथा—

अशेषदेशाटनतोऽप्यभुग्ना[१]प्यवाच्यवाद्याभिहतेरभग्ना[२] ।

अनेक[३]कामानुभवेऽप्यजीर्णा तृष्णे तपः किं चरितं त्वयाधुना ।।३८४।।

अत्र तृष्णा[४]दोषः "तपः किं चरि"मिति गुणत्वेन वर्णित इति भवति प्रथमो लेशः ।

द्वितीयो यथा—

पादौ नूतनचूतपल्लवकथामात्रातिमात्रासमौ

गात्रं सादरवीक्षणेष्वपि भृशं शङ्काङ्कुरं मादृशाम् ।

सूते चेतसि सौकुमार्यमपि ते सूक्तिक्षमश्लाघने[५]

ग्लानिं कारिकुमार कालकलिते[६] लोके किमत्रागतः ।।३८५।।

अत्र शठवैरिणो दिव्यावतारकरणं गुणभूतमपि तदीयसौकुमार्याद्यनुसन्धानादतिमात्रप्रेमवतामतिशङ्काजनकत्वाद्दोषत्वेन वर्णितमिति द्वितीयो लेशः । न चात्र व्याजस्तुतिशङ्का कार्या । निन्दाव्याजेन स्तुतौ

---

१. M_1 has a gap for ग्ना.

२. My_1—°हृतेन

३. M_2—अनेन

४. M_1, M_3, My_2—अतृष्णादोषः

५. M_1—सूक्तक्षमश्लाघने;
M_2—सूक्तिक्षमा श्लाघते;
My_1—सूक्तिक्षणश्लाघने;
My_2—सूक्तिः क्षणं श्लाघने.

६. M_1, My_1—कालकलिके; M_2—पादकलिते

\+ In M_1, M_2, M_3 & My_2 the second variety of *Leśa* is given first upto द्वितीयो लेशः), followed by the first variety (ending with भवति प्रथमो लेशः).

स्तुतिव्याजेन निन्दायां वा वक्तुस्तात्पर्ये तदवतारात् । अत्र त्वलङ्कारे तष्णाया स्तुतिव्याजेन निन्दायां भगवतश्शठरिपोरवताररहस्यनिन्दा-व्याजेन स्तुतौ वा न तावत्तात्पर्यम् । किन्तु स्वतृष्णां निराकर्तुमुद्युञ्जानस्य[1] तद्विषये मङ्गलान्यनवरतं[2] प्रयुञ्जानस्य[3] च दोषगुणयोर्गुणदोषत्वाभिमान-मात्रमभिप्रेतम(तोऽ)नाघ्रातव्याजस्तुतिवासनालेशोऽयं लेशः । ननु[4] तर्हि लेशस्याप्रस्तुतप्रशंसायामेवान्तर्भावस्स्यादिति चेन्न । लेशासङ्कीर्णाया अपि तस्याः परिदृश्यतानत्वात् । तथा हि—

आदित्यस्य मयूखपङ्क्तिरुदधेरौर्वानलस्याकृति-
श्चण्डीमण्डनफलदेशनयनं हालाहलोज्जृम्भणम् ।
अद्याप्युद्धुर[5]तापदीपन[6]भराण्येतानि सिद्धचन्त्यहो
किं वा शीतलितं शठप्रमथन त्वत्सूक्तिधारामृतैः ॥३८६॥

अस्मिन्नुदाहरणे लेशासङ्कीर्णेयमप्रस्तुतप्रशंसा । अत्र हि आदित्य-मयूखादीनां शीतलीकरणाभावरूपदोषस्य गुणत्वकल्पनेऽपि न तस्य तन्मात्रे पर्यवसानं किन्तु परिसंख्यामुखेन तदितरत्सर्वं शीतलीकृतमित्यन्यो गुणः प्रतीयते । एवं व्याजस्तुतावपि गुणदोषीकरणसद्भावेऽपि स्तुतेर्विषयान्तर-मपि दृश्यते । यथा—

---

१. M_1, M_3—निन्दा कर्तु॰; M_2—निन्दां कर्तु॰

२. M_1, M_2 & My_1 omit the *anusvāra*.

३. M_1, M_2, My_1—प्रयुजानस्य; My_2—प्रयुञ्जमानस्य

४. My_1—न हि; My_2—न

५. उद्धुर is the emended reading; all mss. read उद्धर

६. M_1, M_1, M_3, My_2—उद्धरतादर्दीपन

दोषभोग्यत्वगुणवा[*]निति त्वं भाषसे मृषा ।
शठारे परसिद्धान्ताः किमेतद्दूरतः कृताः ॥३८७॥

अत्र गुणस्य दोषकरणरूप[1]निन्दया वाच्य[2]भूतया परिसंख्यामुखेन ततोऽन्यत्सर्वमाश्रित[3]गतदोषजातं भोग्यत्वेनाङ्गीकृतमिति स्तुत्यन्तरमपि प्रतीयते । अतोऽयं व्याजस्तुत्यप्रस्तुतप्रशंसाविलक्षणः ।

अथ **मुद्रालङ्कारो** निरूप्यते । यत्र प्रकृतार्थप्रतिपादकैरेव पदैरप्रकृतस्य सूच्यस्य सूचनं वर्ण्यते तत्र मुद्राख्योऽलङ्कारः । अत्रेदं लक्षणम् ।

अर्थस्य सूचनीयस्य प्रकृतार्थोपपादकैः ।
पदैस्सूचनमुच्येत तत्र मुद्रा भवेन्मता ॥३८८॥

यथा—

निरर्गलज्ञानकलाविजृम्भणैरमेयसाराचरणानुरञ्जितैः ।
शठारिरेनन्त्व[4]भिमानदुर्गतं करोति वंशस्थमुदारदर्शनः ॥३८९॥

अत्र प्रकृतशठवैरिविषयीकृतजनतदीयविद्यावंशस्थत्वप्रतिपादनपरेण "वंशस्थ"मिति पदेनास्य वृत्तस्य[5] वंशस्थनामकत्वरूपसूचनीयार्थसूचना-

---

१. M₁, M₂, M₃, My₂—गुणदोषीकरण°

२. My₁—°निन्दायाः

३. M₂ omits गत

४. अभिमान° is the emended reading.
All mss. have अभिमान्य°

५. M₂ omits वंशस्थमिति पदेनास्य वृत्तस्य

* 'भगवान्' इति शेषः *Doṣabhogyatva* is one of the qualities of the Lord according to the Teṅgalai sect of Vaiṣṇavism.

द्भवति मुद्रा । यथा वा[१] —

पद्मरागौ परं पादौ प्रवालः करमण्डलः ।

नीलश्चिकुरसङ्घातश्शठारिश्चित्रमीक्ष्यते ॥३६०॥

अत्रा[२]र्थान्तरविधायकरत्ननामनिर्देशनेन शठवैरिणो लोकोत्तरपुरुष-जातवैलक्षण्यसूचनान्मुद्रा ।

यथा वा[३]—

विराजमानशाखावतारभासुरवैभवः ।

शठारातिर्विकारातिगती रा[४]ति तनूभृताम् ॥३६१॥

अत्र प्रकृतविराजमानशाखेत्यादिपदविन्यासविशेषेण शठवैरिणो *विशाखाख्यतारायां दिव्यावतारसूचनान्मुद्रालङ्कारः । +एवमेव नाटके वक्ष्यमाणार्थसूचकेष्वप्ययमेवालङ्कारो द्रष्टव्यः ।

अथ **रत्नावली** निरूप्यते । यत्र प्रकृतस्य प्रसिद्धाप्रकृतवस्तु-तादात्म्यप्रत्यायनाय प्रकृतार्थप्रतिपा[५]दनसमर्थैः पदैः प्रसिद्धक्रममन-

---

१. My_2 omits वा

२. M_1 & My_1 omit अत्र

३. M_1, M_2 & M_3, omit वा

४. M_1, My_2—°गतिराति

५. M_1, My_2—प्रकृतस्य प्रत्यायन°
M_2, M_3 —प्रकृतार्थप्रत्यायन°

* Cf. *Divyasūricarita*, IV. 30 :
राधे कलिदिने लाभे वैशाखे काव्यकासरे ।
लग्ने कर्कटकेऽसूत तनयं नाथनायिका ॥

\+ Cf. Ku. Ā., p. 147. Cf. also the *Alaṅkāracandrikā* thereon.

पह्यैव प्रकृतार्थो निर्दिश्यते तत्र रत्नावलीनामालङ्कार इति निश्चयः। अत्रेदं लक्षणम् ।

क्रमिकाप्रस्तुते वस्तुविन्यासो यत्र दृश्यते ।
तत्र रत्नावली नाम कवीष्टा स्यादलङ्कृतिः ॥३९२॥

यथा—

प्रभाकरः कलराशिर्मङ्गलश्च बुधो गुरुः ।
कवी ख्यात्मजातोऽतितमः[1] केतुश्शठान्तकः ॥३९३॥

अत्र प्रसिद्धसहपाठानां रविचन्द्रादीनां वाचकैः पदैः प्रसिद्धपाठ-क्रमेणैव प्रस्तुतस्य शठकोपस्य[2] प्रतिपादनाद्भवति रत्नावली। प्रसिद्ध[3]सह[4]पाठानां प्रसिद्धक्रमाननुरोधेऽप्ययमेवालङ्कारः। यथा—

प्राग्वल्लभश्शुचिः श्रीदो यवः पुण्यजनश्शिवः ।
अमृतेशो जगत्प्राणो वर्धते शठमर्दनः[5] ॥३९४॥

अत्र दिक्पालानां पाठक्रममुत्सृज्य निवेशनम्। प्रकृतान्वयं विना क्रमिकतत्तन्नाम्नां श्लेषरीत्या निवेशनेऽप्ययमेवालङ्कारः।

---

१. कवी ख्यात्मजातः is the emended reading.
M$_1$—कविरख्यात्मजातः; M$_2$—कविरस्यात्मजातः;
M$_3$—कविख्याजजातः;
My$_1$, My$_2$—कविरव्यात्मजातः

२. M$_2$ omits शठकोपस्य

३. M$_2$ adds अत्र before प्रसिद्ध°

४. M$_2$ omits सह

५. M$_2$—शठवैरिणः

यथा—

पद्मोदरपदुन्यासमाधवोदारवैभवैः[1][2][3] ।

सर्वज्ञमानसोद्यानं शठजिद्भञ्जयत्ययम्[4][5] ॥३९५॥

अत्र प्रसिद्धपाठानां ब्रह्मादीनां तत्तद्वाचकपद्मोदरमाधवसर्वज्ञपदैर्निवेशनाद्रत्नावल्यलङ्कारः ।

अथ **तद्गुणो** निरूप्यते । अत्रेदं लक्षणम् ।

*स्वीकारस्स्वगुणत्यागादन्यदीयगुणस्य चेत् ।

तद्गुणस्स्यादलङ्कारस्तत्र चेतोहरस्सताम् ॥३९६॥

यथा

भ्रान्तारोप्यरजस्तमोव्यतिकराशङ्काकुले स्वारुण-

श्यामाकारविकारभावविहितिं[6] द्राक्काङ्क्षमाणे पुनः ।

नाथाचार्य सरस्वतीरविसुते[+] त्वत्कीर्तिशुभ्राकृती[7]

कल्पेते निजमार्गमार्गणपरं[8] चेष्टासु लोकं[9] सदा ॥३९७॥

---

१. M_2—°दरन्यास° for °पदन्यास°

२. उदार is suggested; all mss. read उदर

३. M_2 – °वैभव:

४. M_1 & M_3 omit the *anusvāra.*

५. M_1, M_2, M_3—योजयति

६. M_1—°भावविहित; M_2—°भाव…तं
My_1—°भारविहितं

७. M_1—°मुक्तात्वती; M_2, My_1,My_2—°शुभ्राकृति:

८. M_1 omits मार्ग

९. M_1, M_3, My_2 –निष्ठासु लोकं; M_2—निष्ठानुलोकं

* Cf. Ku., Ā., śl. 141a.

\+ Cf. *Amarakośa*, I. 9.32b ;
कालिन्दी सूर्यतनया यमुना शमनस्वसा ॥

अत्र सरस्वतीयमुनयोस्स्वगतारुणिमकालिमगुणत्यागेनान्यशठकोप-कीर्तिधावल्य[1]गुणस्वीकरणवर्णनाद्[2]भवति तद्गुणः ।

अथ **पूर्वरूपं** निरूप्यते । तच्च द्विविधम् । पुनस्स्वगुणप्राप्ति[3]रूपं, विकारेऽपि पूर्वावस्थानुवृत्तिरूपञ्चेति । तत्राद्यस्येदं लक्षणम् ।

स्यात्पूर्वंरूपं स्वीकारस्स्वगुणस्य पुनर्यदि ।

स्वगुणत्यागेनान्यगुणस्वीकारे सति कुतश्चिद्धेतोः पुनस्स्वकीयमेव गुणं यदि स्वीकुर्यात्तदा पूर्वरूपालङ्कार इति लक्षणार्थः ।

यथा—

राजद्राजकिरीटकोटिघटितस्तारोरुहीरोत्करः
श्रीमत्कारितनूभवस्य वि[4]लसत्सौवर्णपीठश्रिया ।
हारिद्रद्युतिमाश्रितः पु[5]नरपि स्वामेव कान्तिं भज-
त्युन्मर्यादतदीयकान्तिनखरज्योत्स्नावलीमेलनात् ॥३९८॥

अत्र किरीटहीरोत्करस्य स्वधावल्यत्यागपूर्वकं स्वर्णसिंहासनका-न्तिसंक्रान्त्या पीत[6]भावस्वीकारे सति नखचन्द्रिकया पु[7]नः स्वकीयरुचिकार-वर्णनात्पूर्वरूपमाद्यम् ।

१. M_1, M_2, My_2 – वर्त्ति for कीर्त्ति
२. M_1, M_2, M_3,—°स्वीकरणनात्
३ M_2 omits प्राप्ति
४ M_1 —वलसत्°
५. M_2—आश्रिते
६. M_1, M_3 My_2 - पीति°; M_2—संक्रान्तस्य पीति°
७. M_1 & M_3 omit पुनः

द्वितीयस्येदं लक्षणम् ।

***तदेव प्रागवस्थानुवृत्तिश्चेद्विकृते सति ।**[1]

वस्तुनि विकृते सत्यपि[2] पूर्वावस्थाया अनुस्यूतिस्सा च पूर्वरूपमेवेति तदर्थः । यथा—

उत्कम्पोष्ठपुटी[3] विचारविधया प्राप्तार्थदृग्विभ्रमा[4]
जातोत्कण्ठतया दलत्स्वहृदया[5] स्खालित्यदूरीकृता ।
दुर्दर्शा कुदृशां मुखेषु दुदृशे वाणी शठद्वेषण[6]
त्वद्धुंकारपराभवेन[7] गलिता शून्येष्वपि प्राक्तना ॥३६६॥

अत्र शठजिद्विनिर्जितत्वाद्[8]गलिताया अपि वाण्याश्शून्येष्वपि प्रतिवादिवदनेषु पूर्वावस्थादर्शनवर्णनात्पूर्वरूपं द्वितीयम् ।

अथा**तद्गुणा**लङ्कारो निरूप्यते । स्वसङ्गतवस्तुगतगुणस्य स्वस्मिन्सङ्क्रमणयोग्यस्यापि यत्रासङ्क्रमणं वर्ण्यते तत्रातद्गुणाख्योऽलङ्कारः । अत्रेदं लक्षणम् ।

---

१. M_2 adds fullstop after तदेव. It gives the definitions as
प्रागवस्थानुवृत्तिश्चेद्विकृते सति वस्तुनि ।
adding the word वस्तुनि of the following sentence.

२. M_2 omits अपि

३. M_1—उत्कणोष्ठपदी

४. My_1, My_2—प्राप्तोऽर्थ°

५. M_1, M_3—विशत्स्व°; M_2—विशस्व°, My_1—वशत्स्व°

६. M_2, My_1, My_2—°द्वेषिण:

७. M_1, M_3,—°परातवेन, My_1—°पराभवेक

८. M_2—°विनिर्गतत्वात्

यत्रेतरार्थनिष्ठस्य गुणस्यास्वीकृतिर्भवेत् ।
तत्रातद्गुणसंज्ञस्स्यादलङ्कारस्सतां मतः ॥४००॥

यथा—

राका[1]चन्द्रमस[2]: कलङ्क[3]मलिनं बिम्बं पुनश्शुम्बति
क्षीरोदे मुखैरि[4]विग्रहरुचिश्यामोदरे क्रीडति ।
वाणीवेणिकया[5] विमर्दमयते कीर्तिस्तवा[6]थाप्यसौ
सूते कारिकुमार सुन्दरसुधाकर्पूरसारश्रियम् ॥४०१॥

अत्र कलङ्कादिसंयोगे सत्यपि नैल्यानङ्गीकरणवर्णनादतद्गुणः ।

*नन्वेकस्य गेणेनान्यत्र गुणोदयरूपादुल्लासालङ्कारात्तद्गुणस्य, एकस्य गुणेनान्यत्र गुणानुदयरूपावज्ञालङ्कारादतद्गुणस्य च को भेद इति चेदुच्यते । उल्लासावज्ञालक्षणयार्गुणशब्दो दोषप्रतिपक्षपरः । अन्य[7]गुणेनान्यत्र गुणोदयगुणानुदयौ न तस्यैव गुणस्य सङ्क्रमणासङ्क्रमणे[8] । किन्तु

---

१. M₂ — राजा
२. चन्द्रमसः is the suggested reading.
M₁, M₃, My₁, My₂ — चन्द्रमसः
M₂ — चन्द्रमनः
३. °मलिनं is the emended reading; all mss. have °मलिनीं
४. M₁, M₃ — क्षीरोदेशरवैरि°
M₂ — धीरो मे मुखैरि°
My₂ — धीरोदे मुखैरि°
५. M₂ — °वेणितया
६. M₁ M₃, My₁ My₃ — कीर्तिस्तु वाथापि
७. My₂ — ग्रस्य
८. My₁ adds ग्रपि
* Cf. Op. cit. p. 150

तत्सरूपगुणसङ्क्रमणासङ्क्रमणे[1]। तद्गुणातद्गुणयोस्तु गुणशब्दो रूपरसगन्धादिगुणवाची। तत्रान्यदीय[2]गुणाङ्गीकरणानङ्गीकरणे[3] च रक्तस्फटिकादिन्यायेन तस्यैवान्यगुणस्यान्यत्र सङ्क्रमणासङ्क्रमणे[4] विवक्षिते इति भवति ताभ्यामस्य भेद इति संक्षेपः।

अथा**नुगुणा**लङ्कारो निरूप्यते। अत्रेदं लक्षणम्।

गुणस्य पूर्वसिद्धस्य स्वीयस्यातिशयो भवेत्।
गुणवद्वस्तुसान्निध्यात्कथ्यतेऽनुगुणो बुधैः ॥४०२॥

यथा—

ये वा शरण्यौ चरणौ[5] शठारेस्स्थलारविन्दोदरसारचोरौ।
ध्यायन्ति तेषां हृदयानि रक्तान्यत्यन्तरक्तानि भवन्ति ताभ्याम् ॥४०३॥

अत्र स्वतो रक्तानामपि ध्यानपरमानसानां षठवैरिचरणयुगलसन्निधानादतिशयितरक्ततावर्णनादनुगुणालङ्कारः। तद्गुणेऽन्यगुणे[6]नान्यगुणस्य तिरोधानमत्र त्वन्यगुणेनान्यगुणस्योत्कर्षमात्रमिति विशेषः।

अथ **मीलिता**लङ्कारो निरूप्यते। अत्रेदं लक्षणम्।

उभयोरेव सादृश्याद्वैलक्षण्यं न लक्ष्यते[7]।
तत्र मीलितमित्याहुरलङ्कारं विचक्षणाः ॥४०४॥

---

१. M_2 omits this sentence.

२. M_3—तदीय for अन्यदीय

३. M_1—°गुणाङ्गीकरणे

४. M_2 omits असङ्क्रमणे

५. M_1 omits चरणौ

६. तद्गुणेऽन्यगुणेन is suggested all mss have तद्गुणेनान्यगुणेन

७. My_1—दृश्यते।

यथा—

नैसर्गिकोज्ज्वलहिरण्यवरेण्यलक्ष्मी-[1]
संवीक्षणीयविभवे वपुषि प्रकीर्णा ।
***दार्वीपराग[2]पटलो न पुनश्शठारे-**
रालक्षिते[3]यमभिषेकमहोत्सवेषु ॥४०५॥

अत्र शठरिपुदिव्याङ्गहरिद्रारजःपुञ्जयोर्गौरत्वगुणसादृश्येन भेदानध्यवसायान्मीलितम् ।

अथ सामान्यालङ्कारो निरूप्यते । अत्रेदं लक्षणम् ।

लक्ष्यते यदि सादृश्याद्भेद एव न चोभयोः ।
सामान्यं नाम काव्यज्ञैरलङ्कारस्स उच्यते ॥४०६॥

यथा—

चा[4]रुस्मेरमुखाम्बुजद्युतिसुधापूरान्तरालक्रम-
स्पर्धावर्धितवल्गुवल्गनवलत्पुंमीनतुल्येक्षणम्[5] ।
कारुण्यामृतवर्षणं शठरिपुं दृष्ट्वोदयद्विस्मया
लक्ष्यन्ते न तदीयम[6]न्दिरमहाचित्रेऽतिमात्रं जनाः ॥४०७॥

---

१. M_1 —नैसर्गिकी ज्वलहिरण्यलक्ष्मीः
M_2—नैसर्गिकोज्ज्वलभरस्य वरेण्यलक्ष्मी°
M_3, My_1 & My_2 have °लक्ष्मीः

२. My_1 दौर्वी

३. आलक्षितेयं is suggested. All mss. read आलक्षि तैलं

४. My_1 —दारु°

५. M_2—°वलन्मीनेन तुल्येक्षणः ।

६. मन्दिर is suggested. All mss. read वन्दित

* Cf. *Vaijayantā*, III. 3.212b. : दार्व्यां दारुहरिद्रा स्यात् ।

अत्रापूर्व[1]सौन्दर्यादिगुणक[2]शठकोपदर्शनजनितविस्मयविशिष्टनिश्चेष्टानां सादृश्यात्तद्गृहचित्रप्रतिमास्वरूपाद्भेदो न गृहीत इति भवति सामान्यम् । मीलितालङ्कारे एकेनान्यस्य स्वरूपभेदतिरोधानरूपं[3] मीलनं क्रियते । सामान्यालङ्कारे तु स्वरूपभेदावभासेऽपि *साम्येन व्यावर्तकविशेषो रोपलक्ष्यत इति भेदः ।

अथोन्मीलितविशेषालङ्कारौ निरूप्येते । अत्र द्वयोरेवं लक्षण-श्लोकः ।

कुतोऽपि[4]हेतोर्भेदस्य स्फूर्तावुन्मीलितं मतम् ।
तथैव च विशेषस्य स्फुरणे स्याद्विशेषकः ॥४०८॥

तत्रोन्मीलितं यथा—

चञ्चत्पार्विकशर्वरीशविशदज्योत्स्नावलीसोदरै-
स्सत्कीर्तिप्रकरैश्शठान्तक जगत्येकाकृतिं[5] प्रापिते ।
आशाकुञ्जरशेखरान् करतला[6]धूत्कारदूरोत्पत
त्पाथश्शीकरधोरणीपरिचयाद्भेमाकिा जानते ॥४०९॥

अत्र मीलितन्यायेन कीर्तिदिक्करिणां सादृश्याद्भेदानध्यवसाये

---

१. M₁, My₁, My₂—पूर्व°
२. My₁ omits क
३. My₁—स्वरूपप्रभेदविरोधानरूपं
४. M₁, M₂ My₂—अतोऽपि
५. This is the suggested reading.
All mss. have जगत्सेकाकृतिं
६. M₂, M₃—करलता°
* साम्येन is the suggested reading; M₁, M₃, My₁ read सामान्ये. M₂ & My₂ have सामान्येन. Cf. Ku. Ā., p. 152 : अत एव भेदतिरोधानान्मीलितं तदतिरोधानेऽपि साम्येन व्यावर्तकानवभासे सामान्यं etc.

प्राप्ते[1] धूत्कारशीकरपरिचयाद्धेतोस्तदितरभेदस्फुरणान्मीलितप्रति-द्वन्द्वीदमुन्मीलितम् । एतदुन्मीलितं तद्गुणरीत्यापि भेदानध्यवसायेऽपि दृश्यते । यथा—

वक्षोदेशस्थितमरकतोदारहारोरुशोभा-
पूरैरेवं पिहितवपुषः केसरस्रग्विशेषाः[2] ।
नाविष्कुर्युर्यदि च परितस्सौरभस्यानुभावं
तद्विज्ञानं न भवति पुनर्देहिनां[3] कारिसूनोः ।।४१०।।

अत्र मरकतमणिकान्तिसङ्क्रान्तानां[4] वकुलस्रजां भेदस्यानवभास-मानतया परिमलवैभवेन तदवगमन[5]मिति भवत्युन्मीलितभेदः ।

विशेषको यथा—

विज्ञानभ[6]क्त्यन्यविरक्तिवैषै[7]र्न भेद एवास्ति गुणैर्गुरूणाम् ।
शठ[8]द्विषस्सर्वविलक्षणत्वं तदे[9]कभोग्यत्वमिदं व्यनक्ति ।।४११।।

अत्र सामान्यालङ्कारवद्विशेषानवभासे प्राप्ते तदेकभोग्यत्वरूपेण शठवैरिणस्सर्वगुर्वपेक्षया विशेषस्फुरणाद्विशेषकोऽयं सामान्यप्रतिभटः ।

---

१. M_1, M_2, M_3, My_2—प्राप्ति
२. M_1, M_3, My_1, My_2—°विशेषः ।
३. M_1 M_2 & M_3 omit the *anusvāra*
४. M_2—°असङ्क्रान्तानां
५. M_2—तद्द्वयावगमनं
६. M_2—°भक्त्यान्य°
७. M_2, has a gap for न
८. M_2 has a gap for शठद्विषः
९. M_1 has a gap for तदे

यथा वा—

समागतानां शठवैरिसेवालाभाय मर्त्यामरसुन्दरीणाम् ।
तुल्ये निमेषापगमेऽपि पादन्यासः प्रतीतिं[1] तनुते सुरीणाम् ॥४१२॥

अत्र मर्त्यामर्त्यस्त्रीणां शठवैरिसेवासमये निमेषविरामसाधारण्येन भेदास्फुरणे सुरस्त्रीविशेषावगमनहेतुर्भूतल[2]संसर्ग[+]स्तदीयचरणविन्यास इति भवति[3] विशेषकः ।

अथ **गूढोत्तरं** निरूप्यते । अत्रेदं लक्षणम् ।

***यत्र स्यादुत्तरं किञ्चिदाकूतसहितं यदि ।**
तत्र गूढोत्तरं प्राहुरलङ्कारं मनीषिणः ॥४१३॥

यथा—

श्रीनगर्यां धनं पान्थ तिन्त्रिणीकोटरान्तरे ।
पूर्वपूरुषनिक्षिप्तमस्तीच्छसि यदि व्रज[4] ॥४१४॥

अत्र धनलाभोपायं पृच्छन्तं[5] तदीययाचनायासदर्शनजनितखेदस्य कस्यचिदिदमुत्तरम् । तिन्त्रिणीकोटरान्तरनिषण्णशठरिपुसमाश्रयणेन परमार्थलाभ इत्याकूतसाहित्याद्भवति गूढोत्तरम् । अत्रेदमुन्नेयप्रश्नोत्तरम् । निबद्धप्रश्नोत्तरं[6] यथा—

---

१. M_1—प्रतीतां; M_3, My_1—प्रतीतं
२. M_1, M_3, My_1, My_2—°हेतुरननुभूतल°
३. M_2 omits भवति
४. M_1, My_2—व्रजा; M_2—व्रजम्
५. My_2—omits प्रति
६. M_1, M_3, My_1—निबद्धमुन्नेयप्रश्नोत्तरं

* Cf. Op. cit., śl. 149a.

\+ मर्त्यस्त्रीणामित्यध्याहार्यम् ।

दूति त्वं किमिहागता वयमितः प्राप्तुं पुनस्सन्निधिं
तस्या एव यतामहे शठरिपो वक्ष्यामि किं स्वामिनः ।
किं ब्रूहि प्रणतास्मि ते किमधुना वाच्यं किमेतद्विभो
स्वात्मानं मुकुरे निरीक्ष्य रुचिरे तस्यास्[1]सुखं तर्कय ।।४१५।।

अत्र स्वानुरक्तनायिकासकाशादागतां दूतीं प्रति "दूति[2] त्व"मित्यादिना नायकस्य प्रश्नः । "शठरिपो वक्ष्यामि किं स्वामिनः" इति दूत्या उत्तरम् । भवतो विलम्बने न तस्या एव जीवनहानिः । किन्तु तवैवेत्यभिप्रायः । स्वामिनस्सन्निधौ[3] कथं कथनीयमिति दूत्यास्सङ्कोचमभिप्रेत्य नायकस्य पुनः "किं ब्रूही"ति प्रश्नः । पृष्टस्यैवोत्तरमुक्तमित्यभिप्रायेण "किमधुना वाच्य"मिति दूत्याः वचनम्[4] । दूतीवचनाभिप्रायोद्घाटनार्थं "किमेत"दिति नायकस्याक्षेपः । "विभोस्वात्मान"मित्यादिना दूत्या स्वाभिप्रायः उद्घाटितः । भवदीयदिव्यसौन्दर्याकृष्टचित्तायास्त्वदनागमने कुतो जीवनस्थितिः । तव सौन्दर्यं[5] त्वया दृष्टं चे"देतद्वनितायाः[6] मद्विरहे जीवतसन्देह" इति ज्ञायते । अतश्शीघ्रमागत्य तामाश्वास्यैवागन्तुं प्रयतामह इति वक्तव्यमित्यभिप्रायः ।

अथ **चित्रोत्तरं** निरूप्यते । अत्रेदं लक्षणम् ।

***अभिन्नमुत्तरं प्रश्नोत्तरयोर्यत्र वर्ण्यते ।**
तत्र[7] चित्रोत्तरं प्राहुरलङ्कारनिरूपकाः ।।४१६।।

---

१. My_1—रुचिवेशस्याः
२. M_1, M_3, & My_2 omit दूति
३. My_2—सन्निधि
४. M_1—दूत्यवचनः; My_2—दूत्यवचनम्
५. M_2 – त्वत्सौन्दर्यं
६. वनितायाः is suggested. All mss. read पतितानां
७. M_1, M_2, M_3, My_2—अत्र
* Cf. Ku. Ā., śl. 150a.

यथा—

को विदानन्दरसिकः का गतिः को रसोऽमृतम् ।
इति नाथगुरोरग्रे जायन्ते विदुषां कथाः ॥४१७॥

को विदानन्दरसिकः ज्ञानानन्दाभिलाषी कः इति प्रश्नः कोविद-सन्तोषाभिलाषीति[1](वत्)[2] अभिन्नमुत्तरम् । का गतिः को रस इति प्रश्न-द्वयस्यामृतमित्युत्तरम्[3] ।

अथ **सूक्ष्मा**लङ्कारो निरूप्यते । अत्रेदं लक्षणम् ।

पराभिप्रायविज्ञातुस्साकूतं यदि चेष्टितम्[4] ।
तत्सूक्ष्मनामकं धीरैरलङ्कारणमुच्यते ॥४१८॥

यथा—

शठद्विषं सेवितुमुत्सुकैका कस्याश्चिदास्यं मुहुरालुलोके ।
सापि स्ववक्षोरुहवीक्षणेन सङ्केतमेतं सरसं वितेने ॥४१९॥

अत्र शठवैरिसेवायै सहागमनमभिलषन्त्याः कस्याश्चित्प्रश्नाभिप्रायं ज्ञात्वा कापि[5] स्वगमनासहमानजनाक्रान्तायाः मम नायमवसरः परं नक्त-मुचितमिति पद्म[6]मुकुलनाभिज्ञापकनिजकुचवीक्षणरूपचेष्टितेन साकूतनि-वेदनात्सूक्ष्मालङ्कारः ।

---

१. M_1, M_3—कोविदानन्तोष°

२. 'वत्' does not seem to be necessary. All mss., however, have it.

३. M_1, M_2, M_3, My_2—इत्युक्तम्

४. My_1—यद्विचेष्टितम् ।

५. कापि is the suggested reading. M_1 & M_2 read त्वापि. M_3 My_1 & My_2 have क्वापि

६. M_1, M_2, M_3—पद्य°

अथ **पिहितालङ्कारो** निरूप्यते । अत्रेदं लक्षणम् ।

परवृत्तान्तसाकल्यज्ञातुराकूतसंयुतम् ।
चेष्टितं दृश्यते यत्र तत्र स्यात्पिहितं मतम् ॥४२०॥

यथा—

शठवैरिचारुतरभारतीरसप्रवणे[1] पुनः प्रियतमे नवांशुकम् ।
कतमापि चन्द्रवदना विनिर्ममे घनगैरिकद्रवकडारमात्मनः[2] ॥४२१॥

अत्र स्वस्मिन्पूर्ववत्सादरभावाभावेन भर्तुः ज्ञानगोष्ठीनिष्ठत्वमनुमाय "त्वं तु दिव्यसूक्तिभोगतृप्तः, मम युवत्याः कथमभिलाषः शाम्यति ? एबमेव यदि, मया काषायः परिधात" इति तद्वृत्तान्तसाकल्यज्ञानपूर्वकं स्वनूतनवसनकाषायतानिर्माणेन[3] स्वाभिप्रायप्रकाशनाद्भवति पिहितम् ।

अथ **व्याजोक्तिर्निरूप्यते** । अत्रेदं लक्षणम् ।

***हेत्वन्तर[4]विनिर्देशाद्यत्राकारस्य गोपनम् ।**
क्रियते तत्र काव्यज्ञैर्व्याजोक्तिररिति कथ्यते ॥४२२॥

यथा—

सुन्दर्यश्शठवैरिणस्सुमशरव्रीडाविधानोदय-
त्सौन्दर्याब्धितरङ्गदङ्गनिकरज्योतिः परञ्चेतसा ।
श्लिष्यन्त्यः पुलकावलीकबलितं गात्रं मुहुः पश्यतां
गूहन्ति व्यजनोत्थशीतलमरुड्डिम्भाङ्गताम्भःकणैः ॥४२३॥

---

१. M_1—°रसद्रवणे; My_1—°रसद्रवण
२. M_1, M_2, M_3, My_2—°गैरिकद्युतिकतारं
३. M_1—°निर्वाणेन
४. My_1—हेत्वोत्तर°
* Cf. Op. cit., śl. 153a.

अत्र शठवैरिप्रवण[1]कान्ताभिश्शठवैरिदिव्यहृदयालिङ्गनजनितपुलकावलीनां व्यजनवीजनपतदुदकशीतलशीकररूपहेत्वन्तरविनिर्देशेन गोपनं कृतमिति भवति व्याजोक्तिः । छेकापह्नुतेर्व्याजोक्तेश्चायं भेदः । तत्र वचनस्यान्यथानयनेनापह्नवः क्रियते । अत्र त्वाकारस्य हेत्वन्तरनिर्देशेन गोपनमिति । लक्षणे[2] लक्ष्यनामधेये च उक्तिग्रहणमाका[3]रगोपनार्थं हेत्वन्तरव्यञ्जकव्यापारमात्रोपलक्षणम् । सूक्ष्मपिहितालङ्कारयोरपि चेष्टितग्रहणमुचितसाधारणव्या[4]पारमात्रोपलक्षणम् ।

अथ गूढोक्तिर्निरूप्यते । यं प्रति किञ्चिद्वक्तव्यं तत्तटस्थजनैर्ज्ञायेतेति तदेव तदितरं कञ्चि[5]त्प्रति श्लेषेणोच्यते चेत्सा गूढोक्तिरिति निष्कर्षः । अत्रेदं लक्षणम् ।

अन्योद्देशप्रवृत्ताया वाचः केनापि हेतुना ।
अन्यमुद्दिश्य चेदुक्तिस्सा गूढोक्तिर्निगद्यते ।।४२४।।

---

१. M_2, My_1 & My_2 omit शठवैरि

२. The word लक्षणे is not found in any ms But the Ku. Ā., which our author very closely follows, has this. (**See**. p. 156); also the particle च in लक्ष्यनामधेये च implies the presence of such a word in the original.

३. M_2 has a gap for आकार

४. M_2 omits साधारण

५. M_2 –किञ्चित्

यथा—

केसराभरणमेव वासनाभेदि[१]षट्[*]पद[२]विशेषभासुरम् ।
स्वीकुरुष्व[३] गणिकां स्पृशेह मा वत्स कुत्सितभुजङ्गसङ्गताम् ॥४२५॥

अत्र शठवैरिणमनाश्रित्य[४] विषयदोषक्रौर्यनि[५]र्भिन्नत्वात्सामान्यवनितासक्तं कञ्चित्प्रति वक्तव्यस्य केसरकुसुमालङ्कारमनवेक्ष्य दुष्टफणिवेष्टितयूथिकाकुसुमाहरणाय[६] प्रवृत्तं समीप[७]स्थितं कञ्चिद्बालकमुद्दिश्य कथ्यमानत्वाद्गूढोक्तिः । *नेयमप्रस्तुतप्रशंसा । कार्यकारणादिसम्बन्धव्यङ्ग्य[८]त्वाभावात् । नापि श्लेषमात्रम् । अप्राकरणिकार्थस्य प्राकरणिकार्थान्वयित्वेनाविवक्षितत्वात् तस्य केवलमन्यवञ्चनार्थं निर्दिष्टतया

---

१. M_1, M_3, My_1, My_2—°भेद°

२. M_1, M_3, My_2—°षट्द्विक°; M_2 omits षट्पद

३. M_1, M_2, M_3, My_2—स्वीकुरुष्ण

४. M_1, M_2, M_3—आश्रित्य

५. M_1, M_3 & My_1 omit न

६. M_2—°आभरणाय

७. M_1—असमीप°

८. M_2—°व्याप्यत्व°

९. M_1, M_2, M_3, My_2—°अन्विधित्वेन

* The word षट्पद with reference to Nammāḷvār can be explained as the six words which form the two most important *manṭras* of the *Srivaiṣṇavas* popularly known as *Dvayam viz.* ओं नमो नारायणाय and श्रीमन्नारायणचरणौ शरणं प्रपद्ये ।

विच्छित्तिविशेषसमुन्मेषात् । अतः[1] गूढोक्तिरियम[2]खिल[3]विलक्षणा[4] ।

अथ **विवृतोक्तिर्**निरूप्यते । अत्रेदं लक्षणम् ।

श्लेषेण गुप्तं यद्वस्तु कविना विवृतं यदि ।
विवृतोक्तिरसौ ज्ञेया काव्यालङ्कारकोविदैः ॥४२६॥

श्लेषेण गुप्तं वस्तु यथाकथञ्चित्कविनाविष्कृतञ्चेद्विवृतोक्तिरिति लक्षणार्थः । यथा—

किं नाभिजातेन किमुग्रसेवासङ्गेन[5] किं काव्यगुरुप्रबन्धैः ।
इत्यन्य[6]हेयत्वमुदीरयन्ती श्रिता शठारिं वचनैस्सलेशम् ॥४२७॥

अत्राकुलीनादिव्यासङ्गप्रतिक्षेपणरूपेण झटिति प्रतीयमानेनार्थेन गुप्तं[7] विधिशिवादिभजनशाक्तन्यायाद्यसत्तन्त्रक्षेप[8]रूपमर्थान्तरं सलेशम्[9]इत्यनेनाविष्कृतम् । इदं शब्दशक्तिक्रोडीकृतगुप्तार्थाविष्करणम् । अर्थशक्तिमूलगुप्ता[10]र्थाविष्करणं यथा—

---

१. M_1, M_2, M_3 & My_2 omit अतः
२. M_1, M_2, M_3—गूढोक्तिरितीयं
My_2—गूढोक्तीयं
३. M_1, M_2 & M_3 omit अखिल
४. My_1—°विलक्षणम् ।
५. M_1,M_3—उग्रवाससङ्गेन; M_2—उग्रवा······किं
६. M_1 & M_3 omit न्य
७. M_1, M_3—गुप्तक°
८. M_1, M_3,—°शाक्तन्याद्यसरूपं; M_2—°शा···न्याद्यसरूपं
९. M_1, M_3—असलेशं; My_1—न लेशं
१०. M_1—°गुप्त्यर्थं°
* Cf. Ku. Ā., p. 158,

श्रीमत्कारिकुमार युष्मदनघश्रीपादपद्म[1]द्वयी-
पीठोपान्ततलान्तरेषु[2] सुचिरं सुस्थोऽस्मि बालो[3] यथा।
एवं सूचिततत्त्वबोधविरहक्लेशं जनं तत्क्षणा-
देशज्ञानविशृङ्खलं वितनुये साक्षाच्छठानामरिः ॥४२८॥

अत्र श्रीमत्कारिकुमारेत्याद्यामन्त्रणेन[4] युष्मत्सन्निधौ दुरधिगम-तत्त्व[5]याथार्थ्यविज्ञानार्थमेतावन्तं[6] कालमवस्थितोऽस्मि। तच्च न लब्ध-मित्यर्थशक्तिलभ्यं[7] वस्तु तृतीयपादस्थ*जनविशेषणेनाविष्कृतम्। सर्वमिदं कविनिबद्धवक्तृगुप्तार्थाविष्करणोदाहरणम्। कविगुप्तार्था[8]विष्करणं यथा—

---

१. M_1, M_2, M_3, My_2 —°पद्य°

२. M_1, My_1, My_2 —°लतान्तरेषु

३. M_1, M_3—साल:

४. M_1, My_2 —°अमन्त्रणेन

५. 'तत्त्व' is the emended reading;
all mss. have दुरधिगमत्व°

६. M_1, M_2, M_3, My_2—°विज्ञानार्थाय तावन्तं

७. M_1, M_3, My_1—°लब्धं

८. M_1 & My_2 omit अर्थ

* सूचितेत्यादिपदेनेत्यर्थः।

मन्त्रं नाकलयस्य[१]मार्गगमनव्याघातभीतिच्छिदं

श्रुत्युल्लङ्घि[२]दृशां[३] पुरो विहरसि क्रूराङ्गयात्रागमे (?) ।

मुग्धे नाथगुरूदितानि कुरुषे किं वापि नैवाधुना

बुद्धे त्वच्चरिते किमेव भविता[४] जानासि[५] न[६] त्वद्धितम् ॥४२९॥

अत्र तावदतिक्रान्त[७]लोकमर्यादां काञ्चित्परवनितां प्रति तदीयहितैषिण्याः प्रणयसख्याः[८] समुचितोपदेशव्यापारो झटिति प्रतीयते । स्वदोषार्तस्य मुमुक्षोः स्वबुद्धिं प्रत्याक्रोशो विवक्षितार्थः । स च +लुप्तोच्चारणेन सम्बुद्धि[९]रूपतामवगमितेन बुद्ध[१०] इत्यनेनाविष्कृतः । कविनिबद्धवक्तृगुप्तं परवञ्चनाद्यर्थं, कविगुप्तं स्वप्रौढोक्तिप्रकटनार्थमिति भेदः ।

अथ **युक्त्यलङ्कारो** निरूप्यते । अत्रेदं लक्षणम् ।

---

१. This is the emended reading;
all mss. read नाकलयस्व मार्ग°

२. M_2, M_3 & My_1 omit the *anusvāra*

३. M_1—पुरा

४. M_1—विमेयितविता;
M_2, M_3, My_2—°चरितेऽपि मेव भवति

५. M_1—जासि

६. M_3—तद् for न

७. M_1, M_3—अतिक्रान्ता°

८. M_1, M_2, & M_3 omit the *visarga*

९. M_1, M_2, M_3, & My_2—सम्बन्ध°

१०. M_1, M_3, My_2—वृद्ध

\+ लुप्तोच्चारणेन is suggested; all mss. read पुरतोच्चारणेन ।
Cf. Ku. Ā., p. 160 in this context. Cf. also the commentary *Alaṅkāracandrikā* there on : स्वरविशेषसहकृतोच्चारणेनेत्यर्थः ।

क्रियया मर्मगुप्त्यर्थं यत्र स्यात्परवञ्चनम् ।
कथ्यते काव्यतत्त्वज्ञैस्तत्र युक्तिलङ्क्रिया ॥४३०॥

यथा—

त्वद्विश्लेषभराकुलेन मनसा कन्या त्वनन्यादरा-[1]
तसद्यः कुङ्कुमकर्दमेन शठजित् ! त्वामालिखन्ती पुनः ।
त्वामप्यङ्कगतं[2] निरीक्ष्य सहसा बाह्वन्तराले[3] श्रियं[4]
विन्यस्य प्रणमत्यथैव[5] भुजयोर्द्वन्द्वं परं[6] गुम्भति ॥४३१॥

अत्र लक्ष्मीभुजान्तरयुगलविन्यासादिरूपक्रियया हरिरनयाऽऽलिख्यत इति भ्रान्तिनिष्पादनेन स्वानुरागरूपमर्मानवभासनाय परातिसन्धानं[7] विवक्षितमिति भवति युक्तिः । *व्याजोक्तावाकारगोपनं, युक्तौ तदन्यगोपनमिति भेदः[8] । यद्वा[9] व्याजोक्तौ युक्त्या गोपनं, अत्र क्रियया गोपनमिति भेदः ।

---

१. M_1, M_3—त्वरादत्; My_2—त्वदन्यादरात्
२. My_2—अन्तगतं
३. M_3—बाह्यान्तराले
४. M_1, M_2, M_3—श्रियः; My_2—श्रिया
५. M_1, M_2, M_3—प्रणमित्सथैव; My_1—प्रणमित्यथैव
६. M_1, M_2, M_3, My_2—पदं
७. M_1, M_2—पराभिसन्धानं,
M_3—परमादिसन्धानं
७. M_1, M_2 & M_3 **omit this sentence**
६. यद्वा is the emended reading;
all mss. read यथा
* Cf. Ku. Ā., p. 160

अथ लोकोक्तिर्निरूप्यते । अत्रेदं लक्षणम् ।

लोकप्रवादानुकारो यत्र प्रकृतसम्मतः ।

तत्र लोकोक्तिरित्येषालङ्कृतिः कथ्यते बुधैः ॥४३२॥

यथा—

विज्ञापयामि शठकोप कृपाम्बुराशे

नानामुखं मम[1] निवर्तय घोरमेनः ।

***तक्रार्थमागतवता कुजनेन पात्र-**

माच्छादनीयमधुना न खलु प्रसिद्धम् ॥४३३॥

अत्रोत्तरार्धेन लोकवादानुकारोक्तिः ।

अथ छेकोक्तिर्निरूप्यते । अत्रेदं लक्षणम् ।

यत्रार्थान्तरगर्भत्वं लोकोक्तेरुच्यते यदि ।

छेकोक्तिर्नाम काव्यज्ञैरलङ्कृतिरुदीर्यते ॥४३४॥

यथा—

शठकोप सर्वजनरक्षणक्षणप्रवण त्वदन्य इह नैव रक्षकः ।**

पततामनन्तभवसङ्कटे नृणां किमु पालयन्ति पशवः पशून्भुवि ॥४३५॥

किमु पालयन्ति पशवः पशूनिति प्रसिद्धलोकवादानुकारः[2] ।

---

१. M_1 omit मम

२. M_1, M_2, M_3—°लोकानुवादः

* "Callaku vacci munta dācinaṭlu" (Having come to get butter milk, there is no point in one's hiding the vessel) is the Telugu proverb that is sanskritised in this hemistich.

** The word क्षण after रक्षण, though not found in any ms., is suggested here to suit the metre viz. *Mañjubhāṣiṇi*.

अत्र—

"अज्ञान्विज्ञानदानेन श्रीमानर्हति रक्षितुम् ।

दैन्यं हर्तुं दरिद्राणां कुशलो न हि भिक्षुकः[१] ॥" इत्यादिन्यायेन

ज्ञानबलैश्वर्यादिलोकोत्तरगुणसम्पन्नतया [२]दुस्तरसंसारनिस्तरणोपायत्वाच्छठारिपुरेव सर्वरक्षकः, [३]तदन्येषां तद्रक्ष्यभूतत्वान्न रक्षकत्वगन्ध इति तद्विषयतया लोकोक्त्यनुवादस्य योजने स्थिते स्वरूपयाथार्थ्यज्ञानविरहादितरे पशुवदविवेकित्वाद्बहिष्करणीया इत्यर्थान्तरमपि गर्भीकृतमितिभवतिच्छेकोक्तिः ।

अथ **वक्रोक्ति**र्निरूप्यते । अत्रेदं लक्षणं ।

यत्र श्लेषेण काक्वा वास्यान्यार्थत्वप्रकल्पनम्[+] ।

तत्र वक्रोक्तिरित्युक्ता लब्धवर्णैरलङ्कृतिः ॥४३६॥

यथा—

अक्रूरोऽयं *सचिवनृपतिस्स व्यतीतो महात्मा

राजोत्तंसस्सरति पुरतस्सोऽस्ति कैलासशैले ।

विप्र[४]द्वेषप्रकृतिरपि च प्राज्ञशिक्षानवासी-

दित्यालापान्दधति शठवैर्युत्सवेषु प्रगल्भाः ॥४३७॥

---

१. M_1, M_2, M_3, My_2—रक्षक:

२. M_2 has a gap for दु:

३. M_2 omits तत्

४. M_2 —°द्वेषि°

* नृपतिसचिवः इति भाव्यम् ।

\+ काक्वा स्यादन्यार्थत्व° would be a better reading.

अत्रायं क्रूरो न भवतीत्युक्ते स महात्मा त्वक्रूरो व्यतीतः। कथं पुनरिदानीमिति राजमूर्धन्य[1] इत्युक्ते शिव इति, विगतप्रद्वेषस्वभावः इत्युक्ते विप्रेषु[2] द्वेषयुक्तप्रकृतिरिति[3] चार्थान्तरं श्लेषेण कल्पितमिति भवति वक्रोक्तिः। इयमविकृतश्लेषवक्रोक्तिः। विकृतश्लेषवक्रोक्तिर्यथा—

उमाधवो वा[4]प्यथवा कुमारो जगत्प्रभुर्देवकुलाभिरामः।
इति ब्रुवाणस्य मुखं[5] च सन्तस्तद्दे[6]वशब्दस्य विवर्णयन्ति[7] ॥४३८॥

अत्रोमाधवकुमारदेवकुलाभिरामशब्दानामा[8]दिमवर्णलोपे कृते सति "माधवो" "मारो" "वकुलाभिराम" इति भवति। [+]मार इति शठरिपोर्वंशक्रमागतं दिव्यनामधेयम्। सर्वमिदं [++]शब्दशक्तिमूलाया वक्रोक्तेरुदाहरणम्। अर्थश्लेषमूला यथा—

---

१. My_2 — राजन्यमूर्धन्य

२. M_2—विप्रविद्वेष°

३. M_1, M_2, M_3 & My_2 omit इति

४. M_1 omits वा

५. M_1, M_2—ब्रुवाणस्समुखं

६. My_2—°देश° for °देव°

७. M_2 — विवर्णयन्तम्

८. M_2 omits म

\+ शब्दश्लेषमूलायाः इति भावः।

++ Cf. "*Vedam Tamiḻśeyda Māran.*"

“किं जातं क्रतुपूर्तिरद्य नृपते” ? “ब्रह्मन्भवादृङ्मुखे”
“शत्रूणां प्रकराः प्रशान्तगतयो[1] नश्यन्ति किं वा द्रुतम्[2] ।”
“विप्र त्वादृशमानसेष्विति जगद्वेदे”ति लीलागिरो[3]
जायन्ते नृपतिद्विजातिसुतयोः श्रीनाथोथोत्सवे ॥४३९॥

अत्र “यज्ञसमाप्तिः किं जाते”त्युक्ते “मृष्टान्नादिप्रदानादिना[4] विप्रमुख एव तत्पूर्ति”रित्याद्यर्थान्तर[5]क्रोडीकारादर्थश्लेषमूला । काक्वा यथा—

किन्न जानन्ति सुन्दर्यश्शठवैरिनमस्क्रियाम्[6] ।
इत्युक्ता[7] किन्न जानन्तीत्याक्षिपत्[8]पुरतस्सखी[9] ॥४४०॥

किन्न जानन्तीति काक्वा स्वरविकारेण जानन्त्येवेत्यर्थान्तरप्रकल्पनम् ।

अथ **स्वभावोक्ति**र्निरूप्यते । अत्रेदं लक्षणम् ।

---

१. M_2 has a gap for न्त
२. My_1—भृशम्
३. M_2—लीलागुरो
४. M_1—भ्रष्टं
५. M_1, M_3, My_2—विप्रमुखवत्तत्पूर्तिरित्याद्यर्थान्तर°;
M_2—विप्रमुखवत्पूर्तिरित्यर्थान्तर°
६. M_1,M_3, My_1—°नमस्क्रिया ।
७. M_1, M_3—उक्तिः
८. M_1 M_3, My_1, My_2—अक्षिपत्
९. M_2, M_3, My_1, My_2—सखीम्

*उच्यते सा स्वभावोक्तिर्यथावद्वस्तुवर्णनम् ।

यथा—

मन्दस्मितं मधुरवीक्षणमुद्विशाल-[1]

बाह्वन्तरं रुचिरवक्त्रमुदाररूपम् ।

पद्मासनस्थितमुदञ्चितहस्तमुद्रं[2]

वन्दे मनोज्ञकबरं[3] वकुलाभिरामम् ॥४४१॥

अथ भाविकालङ्कारो निरूप्यते । अत्रेदं लक्षणम् ।

**कीर्तनं भूतभाव्यर्थसाक्षात्कारस्य[4] भाविकम् ।

यथा—

+मधुरकविदिव्यगाथा[5]प्रणिधानतपोविधानतो[6] नाथः ।

अत्रैव कारिपुत्रं श्रीमन्तं नेत्रसादरमकरोत् ॥४४२॥

अत्रात्रैवेति नाथमुनितपोरूपभूतार्थस्य प्रत्यक्षतामवगमय्य वर्णना-द्भाविकम् ।

---

१. M_2—°विशालं

२. M_1, M_2, M_3, My_2—पादासन°

३. M_2—मनोज्ञकभरं

४. M_1—कीर्तनाभूतभाव्यर्थ°; M_2, M_3, My_2—°भाव्यार्थ°

५. M_2 has विद्या instead of दिव्य

६. M_2 omits तपोविधानतो

* Cf. *Pratāparudrīya* (P. R.), p, 277 :
स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम् ।

* Cf. Ku. Ā., śl. 161a.

\+ This refers to the episode of Nāthamuni's getting the vision of Nammāḷvār. Vide *Prapannāmṛta*, ch. 107. śls. 39-50.

अथोदात्तालङ्कारो निरूप्यते । अत्रेदं लक्षणम् ।

यत्समृद्धिमतोऽर्थस्यश्लाघ्यस्य चरितस्य च ।
वर्णनं तदुदात्तं स्यादलङ्कारविदाम्मतम् ॥४४३॥

यथा—

क्षोणीनाथविभूषणव्रजरजोराजीभिरैरावता-
द्याशादन्तिमदाम्बुनिर्झरभरे शुष्केऽङ्गणक्षोणिषु ।
भृङ्गा यत्पदपद्ममदत्तवकुलव्राताममृतास्वादना-
दुद्गायन्ति यशांसि दिक्षु स कथं नाधाधिपो वर्ण्यते ॥४४४॥

इदं समृद्धि मद्वस्तुवर्णनरूपम् । श्लाघ्यचरितवर्णनरूपं यथा—

श्रीधुर्यः *कुरुनायको जनपतिर्यां निर्ममे[1] निर्ममो
यस्यामाविरभूदगण्यविभवस्साक्षात्परः पूरुषः ।
यत्राकारि च कारिसूनुमुनिना संस्थानमास्थावता
सेयं[2] श्रीकुरुकापुरी विजयते मादृक्तपःश्रीफलम्[+] ॥४४५॥

अथात्युक्तिर्निरूप्यते । अत्रेदं लक्षणम् ।

---

१. M_1, My_2—निर्वमे

२. सेयं is the emended reading; all mss. read नेयं

* Cf. *Prapannāmṛta*, ch. 103. śls. 14-15 :

अस्ति पूर्वपयोराशेः काचित्पश्चिमरोधसि ।
मण्डले पाण्ड्यभूपस्य नगरी कुरुकाह्वया ॥
कौरवेण नरेन्द्रेण द्वापरे परिपालिता ।
तदाख्यया या विख्याता ताम्रपर्णीसरित्तटे ॥

\+ My_1 ends here.

*अद्भुतातथ्यदातृत्वशौर्यादिगुणवर्णनम्[1] ।
क्रियते यदि तत्रेष्टा स्याददत्युक्तिरलङ्कृतिः[2] ॥४४६॥

यथा—

त्वद्दत्तार्थसमृद्धिसिद्धिविभवस्सार्थोऽर्थिनामुर्वरा[3]
दानाम्भोभिरथाच्छकर्दमवती[4] तत्राविरासील्लता ।
तेषां कीर्तिमया समस्तभुवनोपघ्नानुलब्धाकृति-
स्तत्पुष्पं[5] रजनीकरस्तदमृतासारास्त्वदीयाः[6] कथाः ॥४४७॥

इयमौदार्यात्युक्तिः । शौर्यात्युक्तिर्यथा—

श्रीमत्कारिकुमार तावकवचोनाराचधारामुख-
त्रुटचद्द्रादिकृतिच्छटाङ्गविगलद्रक्ताम्बुपूर्णोदराः[7] ।
सप्ताप्यम्बुधयो[8] भवन्ति बडवावक्त्राग्निदग्धाः पुनः
तन्मध्ये तत एव विद्रुमलता जाता नवार्कोपमा ॥४४८॥

सदसदुक्तितारतम्येनातिशयोक्त्युक्त्योर्भेदः ।

अथ निरुक्तिर्निरूप्यते । अत्रेदं लक्षणम् ।

---

१. M_1, M_3, My_2—°तादृक्त्व°
२. M_2—अलङ्क्रिया ।
३. उर्वरा is the emended reading; all mss have उर्वरां
४. M_1, M_3—कर्दमवतं
५. M_2—पुष्पा
६. त्वदीयाः is the emended reading; all mss. have तदीयाः
७. त्रुटचद्द्रादि is the emended reading, all mss. have त्रुट्त्यादि
८. M_1—सप्ताब्ध्याम्बुधयो
* Cf. Ku. Ā., śl. 163a.

*योगतो नामधेयानां यद्यन्यार्थत्वकल्पनम् ।

निरुक्तिस्तत्र काव्यज्ञशेखरैरुपवर्ण्यते ।।४४९।।

यथा—

माधुर्यामृतसागरं शठरिपो यत्त्वामहंपूर्विका-

भङ्ग्या सङ्गतवासतो भुवि रसः शृङ्गारतामिङ्गति[१] ।

किञ्चायं[२] शुचिरुज्ज्वलश्च भवति प्राक्पञ्चबाणाश्रया-

त्प्राप्तं शर्वनिर्[3]गलाक्षिदहनज्वालाकलङ्कं त्यजन् ।।४५०।।

अत्र रसेष्वहमहमिकया शृङ्गाररसस्य समालिङ्गितशठवैरिदिव्य-मङ्गलाङ्गत्वात् +शृङ्गं[४] प्राधान्यमियर्त्तीति योगवशात्तन्नामधेयस्यार्था-न्तरकल्पनम् । तत्पर्याय[५]भूतयो[६]: ++शुच्युज्ज्वलपदयोरप्याश्रयदोषायात-

---

१. M_2—रसश्रीरङ्गतां

२. M_1, My_2—वायं

३. प्राप्तं शर्व is the emended reading, all mss. have प्राप्ता गर्भ°

४. M_2—शृङ्गारं

५. M_2—तात्पर्य° instead of तत्पर्याय°

६. M_1 &M_3 omit यो:

* Cf. Op. Cit śl. 164a.

\+ See Dr. V. Raghavan, *Bhoja's Śṛṅgāraprakāśa*, p. 412 : "(येन) रस्यते, यैः (येन) अनुकूलवेदनीयतया दुःखमपि सुखत्वेन अभिमन्यते, येन रसिकैः अहंक्रियते, येन शृङ्गं उच्छ्रयो रीयते, स खलु तादृशोऽस्ति सर्वजनस्वसंवेदन (सिद्धः) तत्तदुपाधिना (तेन) तेन रसाभिमानादिशब्देन अभिधीयमान(:) स्वादात्मा ।"

++ Cf. *Amarakośa*, I: 6.18 : शृङ्गारः शुचिरुज्ज्वलः ।

मालिन्यनिवृत्त्युपन्यासेन निर्मलत्वप्रौढप्रकाशत्वरूपार्थान्तरकल्पनमिति भवति निरुक्तिः ।

अथ **प्रतिषेधो** निरूप्यते । अत्रेदं लक्षणम् ।

***निषेधस्य प्रसिद्धस्य यदि स्यादनुवर्णनम् ।**
प्रतिषेधस्त्वलङ्कारः कथ्यते काव्यदर्शिभिः ॥४५॥

यत्र निर्ज्ञातो निषेधः स्वतोऽनुलयुक्तत्वादर्थान्तरं गर्भीकरोति तत्र चारुत्वान्वितः प्रतिषेधाख्यो[१]लङ्कार इति निष्कर्षः । यथा—

न पूर्णचन्द्रेण न मन्मथेन न कल्पवृक्षेण न चामृतेन ।
अनिन्दितागण्यगुणाभिरामश्शठारिणैवारचितश्शठारिः ॥४५२॥

अत्र शठारेः पूर्णचन्द्रादिनिर्मितत्वा[२]भावः प्रसिद्ध एव वर्ण्यमा[३]नः तस्य चन्द्राद्यतिशयिता[४]नन्दकरत्वादिकमित्येवंरूपमर्थं गर्भीकरोति । स चार्थस्तत्तत्प्रकारविशिष्ट[५]चन्द्रादिव्यावर्तके[६]नानिन्दितेतिविशेषणेनाविष्कृत इति भवति प्रतिषेधः । यथा वा—

---

१. This is the emended reading.
M$_1$, M$_3$, My$_2$—प्रतिषेधोऽर्थो; M$_2$—प्रतिषेधार्थो

२. M$_2$ omits the letters तत्वा

३. My$_2$—वर्ण्यमानस्य

४. After °अतिशयित, M$_2$ has a gap upto °करोति

५. M$_2$—°विशिष्टं

६. After व्यावर्तक, M$_2$ has a gap upto प्रतिषेधः

* Cf. Ku.Ā., śl. 165a.

हे क्षुद्राः प्रतिपक्षिणो न कुमतिग्रन्थ[1]प्रबन्धाः पुन-

र्वाचः[2] श्री[3]शठवैरिणः श्रुतिगता मर्मान्तरारुन्तुदाः ।

नोदञ्चत्तरुणीनिरीक्षणमिह त्र्यन्तमध्यन्दिन-

स्फायत्कारिकुमारभा[4]स्करदुरालोकाननं लोकनम् ।।४५३।।

अत्र दिव्यसूक्तीनां कुमतिग्रन्थप्रबन्धत्वाभावो[5] निर्ज्ञात एव कीर्त्यमानः तेष्वेव युष्माकं वादप्रागल्भ्यं न श्रुतिसारभूतदिव्यसूक्तिषु लेशतोऽपि व्युत्पत्तिग्रहोऽस्तीति तिरस्कारं गर्भीकरोति,[6] तथाभूततद्दिव्यदर्शनस्य स्त्रीमुख*दर्शनत्वाभाव[7]प्रसिद्ध एव वर्ण्यमानः तत्रैव शक्य[8]त्वं नान्यत्रेत्यपहासं गर्भीकरोति, तदुभयमपि क्षुद्राः इत्यनेनाविष्क्रनम् ।

अथ **विध्यलङ्कारो** निरूप्यते । यत्र +निर्ज्ञातस्यैवार्थस्य विधानमनुपयुक्तिबाधितं सदर्थान्तरगर्भीकरणेन चारुतरं तत्र विध्याख्योऽलङ्कार इति निष्कर्षः । अत्रेदं लक्षणम् ।

प्रसिद्धस्यैव यत्र स्याद्विधानं विध्यलङ्कृतिः ।

---

१. M_1, M_2, M_3—°ग्रन्थाः

२. M_2—वादाः

३. M_2—श्रीधर······तिगता

४. M_1 omits भास्कर

५. My_2—प्रबन्धाभावः

६. M_2, M_3, & My_2 add तथा

७. My_2—°दर्शनाभाव°

८. शक्यत्वं is the emendation for शुकत्वं

* M_2 abruptly ends with श्रीमुखदर्श

\+ Cf. Op., cit., p. 166.

यथा—

> दुरागमपरिष्क्रियादुरपवादान्तर-
>
> प्रतारितनिजाशयप्रथितदिव्यतत्त्वाकृतिः ।
>
> श्रुतिः श्रुतिरभूच्छठद्विषदुदारवक्त्राम्बुज-
>
> प्रवेशकृतसौरभप्रसदनाभिमानाश्रया ॥४५४॥

अत्र श्रुतेः श्रुतित्वविधानमनुपयुक्तं सत्[1] कुदृष्टयादिकल्पितकदर्थ-बहिष्कारेण सकलवैदिकजनानन्दकरत्वरूपमर्थान्तरं गर्भीकरोति । अत्र शठजिदित्यादिविशेषणेनाविष्कृतमिति विधिः । आक्षेपालङ्कारे बाधितौ विधिनिषेधौ तद्भेदत्वेनोक्तौ । अत्र तु सिद्धौ विधिनिषेधौ तत्प्रतिद्वन्द्विनाविति भेदः ।

अथ हेत्वलङ्कारो निरूप्यते । स द्विविधः । हेतुहेतुमतोस्सहवर्णनरूपः, हेतुहेतुमतोरैक्यरूपश्चेति । अत्र द्वयोरिदं लक्षणम् ।

> हेतु*र्हेतु[2]मता हेतोर्यत्र स्यात्सहवर्णनम् ।
>
> हेतुहेतुमतोरैक्यमपरो हेतुरुच्यते ॥४५५॥

तत्राद्यो यथा—

> रागच्छायाकरमृदुपदन्यासलक्ष्मीनिरीक्ष्या
>
> श्रेयो भूयस्तनपरिचयासक्तिमुद्भावयन्ती ।
>
> एषा भाषा वकुलधर ते कस्य वा नो विधत्ते
>
> कान्तेवान्तःकरणहरणं निस्तुलानन्ददानात् ॥४५६॥

---

१. M₁ & My₂ omit सत्

२. हेतुः is the emended reading; all mss. read हेतु

* "हेतुः" अलङ्कार इत्यध्याहार्यम् ।
Cf. Ku. Ā., ślś. 167a & 168a

अत्र दिव्यभाषारूपहेतोरन्तःकरणहरणरूपहेतुमता सहवर्णनाद्धेतुरलङ्कारः । द्वितीयो यथा—

आनन्दो विदुषामनादिवचसां[1] यूथस्य बोधोदयो
विस्रम्भः प्रणमज्जनस्य विमतव्रातस्य गर्वक्षयः ।
उल्लासः करुणारसस्य कमलाभर्तुः प्रसादागमः
कोऽपि श्रीशठवैरिणो विजयते लीलाकटाक्षाङ्कुरः ॥४५७॥

अत्र विद्वदानन्दकरत्वादिनाध्यवसिते शठवैरिणः कटाक्षविशेषे तदानन्दत्वादिव्यपदेशाद्भवति हेतुभेदः । कार्यकारणाभेदव्यपदेशः कार्यावश्यम्भावशैघ्र्यप्रत्यायनार्थः ।

अथ **रसवदाद्यलङ्कारा** निरूप्यन्ते ।

चत्वारो रसवन्मुख्यास्त्रयो भावोदयादयः ।
प्रत्यक्षप्रमुखाश्चाष्टावेते पञ्चदश स्मृताः ॥४५८॥

रसवत्, प्रेयः, ऊर्जस्वी, समाहितमिति **चत्वारः** । भावोदयः, भावसन्धिः, भावशबलता चेति त्रयः । प्रत्यक्षमनुमानमुपमानं शब्दोऽर्थापत्तिरनुपलब्धिस्सम्भवैतिह्ये इत्यष्टौ । *विभावानुभावव्यभिचारिभावैरभिव्यञ्जितरतिहासशोकोत्साहादिश्चित्तवृत्तिविशेषो रसः यत्र रसस्यान्यस्य परत्राङ्गं भवति तत्र रसवदलङ्कारः । विभावानुभावाभ्यामभिव्यञ्जितो निर्वेदग्लानिचिन्तादित्रयस्त्रिंशद्[2]+भेदो देवतागुरुनृपद्विजपुत्रादा-

---

१. M₁ has a gap for चसां.

२. °चिन्तादित्रयस्त्रिंशत् is the emended reading; all mss. read °चिन्तादयः त्रिंशत्°

* Vide *Nāṭyaśāstra*, p. 93 : तत्र विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः । Cf. also Ku. Ā., p. 169.

\+ This is a *Bahuvrīhi* compound qualifying *Bhāva*.

वभिव्यज्यमाना रतिश्च भाव:[1]। स यत्र भावान्तरस्याङ्गं भवति तत्र प्रेयोऽलङ्कार: अनौचित्येन प्रवृत्तो[2] रसो भावश्च रसाभास: भावाभास इत्युच्यते, स यत्र परस्याङ्गं भवति तत्रोर्जस्वी नामालङ्कार:। भावस्य प्रशाम्यदवस्था भावशान्ति:। सा यत्रापराङ्गं भवति तत्र समाहितम्। भावस्योद्गमावस्था भावोदय:। द्वयोर्विरुद्धयोर्भावयोरन्योन्यस्पर्द्धिभावो भावसन्धि:। बहूनां भावानां पूर्वपूर्वोपमर्देनोत्पत्तिर्भावशबलता[3]। एषामपराङ्गत्वे सति भावोदयाद्यास्त्रयो भवन्ति।

तत्र—

रसोऽन्यस्य रसस्याङ्गं तत्र स्याद्रसवन्मतम्।

यथा—

स्फुरद्वक्षोलक्ष्मीखचितकनकाकारवकुल-
स्रगामोदैर्मोदं कलयति शठारिस्सुमनसाम्।
अनासाद्यविद्यातिमिरनिवहान्धीकृतजग-
त्परिज्ञानाधानव्यसनरसिको यत्प्रभवति ॥४५९॥

अत्र स्फुरदित्यादिवाक्येन प्रतीयमानष्य शृङ्गारस्यानासाद्येति वाक्यप्रतिपन्नकरुणरसोऽङ्गं[4] भवतीति रसवदलङ्कार:।

अन्यभावोऽन्यभावस्य यस्याङ्गं प्रेय उच्यते।

यथा—

शठद्विषश्चारुपदारविन्दं स्वच्छन्दमानन्दमरन्दवर्षि।
दुर्वारसंसारदुरन्ततापव्यापारभाराक्रमितो वृणोमि ॥४६०॥

---

१. M_1 & M_2 have भावश्च instead of भाव: । स:

२. प्रवृत्तो is the emendation for प्रवृत्तौ found in all mss.

३. °उपमर्देन is the emendation for °अपमर्देन found in all mss.

४. This is the emended reading; all mss. read °करुणारसङ्ग

अत्र शठवैरिविषयरतिरूपभावस्य दुर्वारेत्यादिपदसूचितो[1] निर्वेदाख्यो व्यभिचारिभावोऽङ्गम् । यथा वा—

निर्मर्यादमहाविभूतियुगलोधौरन्धरीयो[2] गतो
व्यश्रान्तो हरिरेव विस्मयपदारोपोऽपि[3] तस्य स्तुतिम् ।
कर्तुं तावदुदेति साम्बुरसनं वाणो यदा[4] धीमतां
तत्तत्त्वं हृदि धारयन्शठरिपो तामावृणीषे[5] तदा ॥४६१॥

अत्र शठवैरिविषयरतिभावस्य हरिविषयरतिभावोऽङ्गम् ।

यत्र भावरसाभावौ यद्येकस्याङ्गतां गतौ ।
तत्रालङ्कार ऊर्जस्वी मनस्विभिरुदीर्यते ॥४६२॥

यथा—

त्वाद्द्वारपञ्जरनिबद्धशुकाङ्गनानां
माधुर्यधुर्यरचनं वचनं श्रवोऽन्तः ।
यावद्विशत्यतितरां पुरुषास्सरागं[6]
तावत्तदास्यमनु[7]चुम्बितुमारभन्ते ॥४६३॥

अत्र शठकोपविषयरतिभावस्य शृङ्गाररसाभासोऽङ्गम् ।

---

१. M_1, M_3—°सूचिते

२. °धौरन्धरीयो is the emendation for °धौरन्धरीयौ.

३. अपि is the emendation for अति read by all mss.

४. यदा is the emendation for यथा found in all mss.

५. M_1, M_3—आप्रणीषे

६. M_3—सरागाः

७. My_2—तदन्यं

यथा वा—

श्रीमन्पराङ्कुश निरङ्कुशतावकोक्ति-
वातूलतूलितगतिः प्रतिवादिवर्गः ।
व्रीडावशाद्विपिनभाग्घरिणं[1] निरीक्ष्य
प्रस्तौत्यनक्षरमुखत्वसुखाभिमानम् ॥४६४॥

अत्र वक्तुश्शठवैरिविषयस्य रतिरूपभावस्य पाण्डित्यगन्धविधुरतया मृगजातेर्नास्माकमिव साभिवानहानिजनितदौस्थ्यमिति तद्विषयतया प्रवृत्तस्य प्रतिवादिवर्गगतस्य रतिरूपस्यभावासस्या[2]भिव्यञ्जकत्वाद्रतिभावस्य रतिभावाभासोऽङ्गमिति भवत्यूर्जस्वी ।

रसादेर्भावशान्तिस्स्याद[*]ङ्गं तत्र समाहितम् ।

यथा—

विवेकानालोकाद्विविधमपराधं विरचय-
न्नलं मय्युत्सेकाच्छरणवरणानु[3]न्मुखमुखे ।
शठारातेस्स्वातिक्रमकलुषचेतःपरिणतेः
प्रसादः कोऽप्युच्चैरतनुत मदन्तर्विलसनम् ॥४६५॥

अत्राभिमुख्याभिव्यञ्जितस्य शान्तरसस्य शठारेरित्यादिना प्रतीयमाना कोपशान्तिरतिशयाधायकत्वादङ्गमिति भवति समाहितम् ।

---

१. My₂—भागुरिणं

२. This is the emended reading; all mss. have भावाभावस्य

३. This is the emendation for °वरणोनुन्मुख°

* चेत् would have been a better reading instead of स्यात्.

अथ भावोदयः ।

भावोदयः[1] स्यात्तस्यैव रसभावाङ्गता यदि ।

यथा—

एषा योषा स्मरशरमरुद्धूतधैर्यावलम्बा
गण्डाभोगे करसरसिजं कल्पयन्तो शठारे ।
नानारूपैर्मनसि[2] मिलितैर्भोगवाञ्छाविशेषै-
स्त्वामालिङ्गत्यखिलसुखदं भावनाकाण्डगम्यम्[3] ॥४६६॥

अत्र शठवैरिणं प्रति चिन्तारूप(स्य) भावोदयः शृङ्गाररस-स्याङ्गम् ।

अथ भावसन्धिः[4] ।

स्याद्भावसन्धिर्यत्राङ्गं रत्यादेर्यदि[5] जायते ।

यथा—

तन्त्रीभागैर्नखमुखरितैर्वैणिकैस्त्वद्गुणौघा-
नुद्गामन्तीरमररमणीर्वीक्षणो विधाता ।
तद्बिम्बोष्ठस्फुरणतरलैः कैश्चिदङ्गैर्विरेजे
त्वद्वैराग्यश्रवणचकितैः कैश्चिदेवं शठारे ॥४६७॥

अत्र विषयाभिमुख्यवैमुख्यनिरूपणीययोः रतिभावशमभावयोस्सन्धिः शठवैरिविषयरतिभावस्याङ्गम् ।

---

१. This is the emendation for °उदयं
२. This is the emendation for नानाभूपैः
३. M_3—°गद्यम्
४. M_1 & M_3 omit this sentence.
५. रत्यादेः is the emended reading; all mss. read रसादेः

बहुभावोदयो भावशबलत्वं तदुक्तवत् ।

यथा—

***[अद्याप्याकलयाम्यघं क्व नु सुखोदर्का स्थितिः किं पुन-**
र्वक्ष्यत्यार्यजनस्सखे सहि पुनर्दास्यं परं दास्यति ।
साक्षात् श्रीशठजित्क्रियादपि कृपां ,स्वस्थोऽस्मि.........
.........................,.......................] ॥४६८॥

अद्याप्याकलयाम्यघमिति विषादः । क्व नु सुखोदर्का स्थितिरिति वितर्कः[१] । किं पुनर्वक्ष्यत्यार्यजन इति शङ्का । स हीति स्मरणम् । दास्यं परं[२] दास्यतीति मतिः । साक्षाच्छ्रीशठजित्क्रियादपि कृपा[३]मित्यौत्सुक्यं । स्वस्थोऽस्मीत्यादिना धृतिः । तेषां भावानां शबलता शान्तरसस्याङ्गम् ।

अथ **प्रमाणा**लङ्कारो निरूप्यते ।

विज्ञानं वस्तुनस्साक्षात्प्रत्यक्षं स्यादलङ्कृतिः ।

---

१. M_1, M_3—तर्कः ।

२. M_1, M_3—परा

३. क्रियादपि कृपां is the suggested reading;
all mss. have क्रियापि कृपया

* The illustrative verse is not given in any ms. Only three lines of the verse could be reconstructed with the help of the explanation given below by the author himself.

यथा—

श्रावं श्रावं चरितमनघं रूपमेतत्त्वदीयं[1]

दर्शं दर्शं पदयुगसुधासारपूरं शठारे ।

पायं पायं परिमलपरीपाकमाघ्राय चाङ्घ्र्योः

स्पर्शं स्पर्शं वपुरपि सतां निर्वृतानीन्द्रियाणि[2] ॥४६९॥

अत्र पञ्चेन्द्रियाणां निरतिशयवैलक्षण्यमिलितशठवैरिचरितरूपादि-[3]श्रवणदर्शनादिलाभेन सुखसाक्षात्कारवर्णनात्प्रत्यक्षालङ्कारः ।

यथा वा—

[4]अत्रोरसीन्द्रमणिहारलतां शठारे-

भृङ्गावलीति वकुलैकसराभिलीनाम् ।

संशय्य सम्प्रति विनिश्चिनुते बुधानां

यूथस्तदीयकलकाकलिकाग्रहेण* ॥४७०॥

पूर्वं प्रत्यक्षमात्रमत्र तु विशेषदर्शनजन्यसंशयोत्तरप्रत्यक्षजन्यमिति विशेषः ।

अनुमानालङ्कारो निरूप्यते । अत्रेदं लक्षणम् ।

अर्थस्य निश्चयो लिङ्गादनुमानं तदुच्यते ।

---

१. त्वदीयं is the emendation for द्वितीयं

२. This is the emended reading; all mss. have सता निर्वृतासि.

३. M_1 & M_3 omit रूपादि

४. M_3, My_2—अद्यं for अत्र

* The *anvaya* of the verse is :—
बुधानां यूथः अत्र शठारेरुरसि वकुलैकसराभिलीनां इन्द्रमणिहारलतां संशय्य सम्प्रति तदीयकलकाकलिकाग्रहेण भृङ्गावलीति विनिश्चिनुते ।

यथा—

यन्नित्योदितदासचेतनगणा नम्रीभवन्त्यञ्जसा

यत्प्रत्यर्थमहीरुहावलिरपि[1] प्रत्येति निर्मूलिता ।

यद्दिव्योक्तितरङ्गरिङ्गविभवैराशामुखं पूर्यते

तन्मन्ये शठवैरिवैभवमहास्रोतस्विनीजृम्भणम् ॥४७१॥

अत्र दासचेतनगणादि[2]नम्रीभवनादि[3]लिङ्गेन शठवैरिवैभवमहास्रोतस्विनीजृम्भणस्य निर्धार्यमाणत्वादनुमानालङ्कारः ।

यथा वा[4]—

यद्यत्रैव शठद्विषस्तरलितभ्रूविभ्रमोदञ्चिता

दृक्केली[5] प्रसरीसरीति बहुधा तत्रैव मत्यादयः ।

निस्सीमोल्लसनप्रकाशितनिजाकारा विशन्ति क्षणात्[6]

तत्सत्यं पुरतस्सरत्यनुचरस्तस्यैव शान्तो रसः ॥४७२॥

अत्र दृक्केलीमत्यादीनां सामानाधिकरण्योपन्यासेन सपरिकरस्य शान्तरसस्यानुचरतया तदग्रेसरत्व[7]ज्ञापनादनुमानम् । पूर्वं रूपकसङ्कीर्णम्, इदमतिशयोक्तिसङ्कीर्णमिति । भेदः । शुद्धानुमानं यथा—

---

१. महीरुह is the emendation for महीमह

२. My_2—°वेतन°

३. M_1 & M_3 omit नम्रीभवनादि

४. यथा वा is suggested here.

५. My_2—हक्केलीं

६. विशन्ति क्षणात् is the emended reading; all mss read विशान्तीक्षणात्

७. M_1 & M_3 omit त्व.

उन्मीलत्पुलकावलीविलसितैरर्धेक्षणप्रेक्षणै-
रङ्कूरन्नवधर्मशीकरकणैरङ्गैश्च निश्चेष्टितैः ।
एते सत्पुरुषास्स्फुरद्रसभरद्राघीयसा चेतसा
संश्लिष्यन्ति शठद्विषं शुभगुणव्राताम्रताब्धीं[1] ध्रुवम् ॥४७३॥

अत्रोन्मीलदित्यादिनोक्तैर्ज्ञापकैः संश्लेषस्य ज्ञाप्यमानत्वादनुमानम् ।

अथो**पमानं** निरूप्यते । अत्रेदं लक्षणम् ।

उपमानं मतं यत्र साम्योक्त्या वस्तुनिर्णयः ।

यथा—

तमेव जानीहि शठारिलीलाप्रासादचिञ्चाक्षितिजातमुख्यम् ।
छत्राकृतिं यद्विटपो विधत्ते छायां पुनः श्रीनगरेन्दिरायाः ॥४७४॥

अत्रोपमानमूलभूतेन छत्राकृतिरित्याद्यतिदेशवाक्येन दिव्यचिञ्चातरुनिश्चयाद्भवत्युपमानम् ।

यथा वा—

अमृतोदधिमिव मधुरं सरसीरुहबन्धुमिव तमश्शमनम् ।
शशिनमिव शीतलतनुं शठद्विषमहमिमं जानामि ॥४७५॥

अत्रातिदेशवाक्यार्थसादृश्यप्रत्यक्षरूपमुपमानं फलेन सह दर्शितमिति **विशेषः** ।

अथ **शब्दा**लङ्कारो निरूप्यते । अत्रेदं लक्षणम् ।

यत्र श्रुत्यादिभिर्वस्तुनिश्चयश्शब्द उच्यते ।

---

१. M_1, M_3—व्राता समृद्धिः

यथा—

यन्नाथादिमहीसुरा[1] श्रुतिगुहानिक्षेपरूपं परं ।

तत्त्वं त्वत्करमुद्रयैव सुलभं विज्ञाय लब्ध्वा पुनः ।

दौर्गत्यं जगतामुदञ्चितमपाकुर्वन्ति सर्वं ततो

निस्तुल्यं[2] शठकोप ते हि[3] जगदाचार्यत्वमुज्जृम्भते ॥४७६॥

अत्र *"आचार्यवान्पुरुषो वेदे"त्यादिश्रुतिरूपशशाब्दः जगदाचार्यत्वस्थापने[4] प्रमाणतयोपन्यस्त इति भवति शब्दालङ्कारः। एवं स्मृतिपुराण+आगमलौकिकाप्तवाक्यरूपाण्यपि शब्दप्रमाणान्[5]युदाहरणीयानि ।

तत्र स्मृतिशब्दो यथा—

त्रयीगर्भैश्वर्यप्रबलविभवाटोपसुभगां

शठारातेस्सूक्तिं महदमृतनिर्वाणजननीम् ।

विहायान्यत्किञ्चिद्यदभिमनुषे मानुष मनो-

र्वचो धत्ते तत्ते नरकगतये डिण्डिमरवम् ॥४७७॥

अत्र वेदबाह्यकुदृष्टिस्मृत्यादिकं—

++**"या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः ।**

तास्सर्वा निष्फला प्रेत्य तमोनिष्ठा हि ताः स्मृताः ॥" इति

---

१. M1, My2—°महासुराः

२. M1, M3—निस्तूलं

३. M1, M3—देहि

४. M1, M3—°आचार्यस्वस्थापने

५. M1—शब्दप्रमाणागमशब्दप्रमाणानि

* *Chāndogyopaniṣad*, VI. 41.2

\+ Here, *Āgama* means treatises like *Vaikhānasa* and *Pāñcarātra*

++ *Manusmṛti*, XII. 95

मनुस्मरणादरणीयमिति हेयत्वोपन्यासमुखेन दिव्यसूक्तेरूपादेयत्वं[1] स्मृत्यैव स्थापितमिति भवति स्मृतिरूपशशब्दः ।

***पुराणरत्नागमदर्शनीयस्ववैभवा कारिवरात्मजस्य ।**
श्रीसूक्तिमुक्तावलिरातनोति सौभाग्यभाजां हृदयप्रकाशम् ।।४७८।।

+अत्र दिव्यसूक्तिवैभवस्य पुराणागमप्रसिद्धत्वात्तेषामपि प्रमाणतयोपन्यासः । आ++चारात्मतु**ष्टचोरपि मीमांसकोक्तधर्मप्रमाणयोर्वेदशब्दानुमापकतया शब्दप्रमाण एवान्तर्भावः ।

---

१. °सूक्तेः is the emended reading; all mss. read °सूक्तिः

* 'Purāṇaratna' is *Viṣṇupurāṇa*. Cf. *Stotraratna*, śl. 5 :

तत्त्वेन यश्चिदचिदीश्वरतत्स्वभाव-
भोगापवर्गतदुपायगतीरुदारः ।
सन्दर्शयन्निरममीत पुराणरत्नं
तस्मै नमो मुनिवराय पराशराय ।।

\+ This reflects the traditional view that Nammāḷvār lived prior to the composition of *Viṣṇupurāṇa* and *āgamas*. Historically however, this is an anachronism.

++ Cf. *Pūrvamīmāṁsā*, I. 3.7 : अपि वा कारणाग्रहणे प्रयुक्तानि प्रतियेन्निति ।

** Cf. *Tantravārtika*, pp. 129ff :

यथाभ्यासं ह्याशयवैचित्र्येण शुभाशुभोभयहीनक्रियानुष्ठायिनामात्मतुष्टिरपि विचित्रैव भवति ।.........यदेव किञ्चनानूचानोऽभ्यूहत्यार्षं तद्भवतीति । वैदिकवासना जनितत्वाद्वेद एव स भवति ।

Cf. also Manu, II. 6 : वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनः तुष्टिरेव च ।।

तत्राचारप्रमाणं यथा—

हित्वाखिलं शठारातिं भजस्व जन सादरम् ।
महतामयमाचारो हानिराचामोचने ॥४७९॥

आत्मतुष्टिप्रमाणं यथा—

शठद्विषश्शक्तिभरं निरीक्ष्य बिभेमि[1] नाहं भववर्त्मवर्ती ।
स्वदोषभूयस्त्वविलोकनेन तदत्र वृत्तिर्मनसः प्रमाणम् ॥४८०॥

अत्रात्मतुष्टया स्वदोषदर्शनजनितभयाभावलब्धोन्मेषया संसारोत्तारकशठकोपमहादेशिकविषयकात्मप्रावण्यं[2]मखिलशास्त्रानुमतमुन्नीयते । एवं श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपं *मीमांसकोक्तप्रमाणमपि सम्भवदुदाहरणीयम् ।

अथश्रुतिर्यथा—

पराङ्कुशस्त्वं नाम्नैव[3] न परिच्छदमिच्छसि ।
अर्थस्य श्रुतिसिद्धस्य न हि लिङ्गेन साधनम् ॥४८१॥

अत्र वकुलाभरणस्य पराङ्कुशश्रुत्या सर्वप्रतिपक्षशिक्षणविचक्षणत्वं समर्थितमिति भवति श्रुत्यलङ्कारः ।

लिङ्गं यथा—

श्रीपतेरिव तवापि भूतले शोभतेऽयमवतारवैभवः ।
जन्मगर्भसहजं त्वहङ्कृतिक्षेपणं खलु मतं पराङ्कुश ॥४८२॥

---

१. बिभेमि is suggested; all mss. read बिभेहि.

२. °विषयकात्मप्रावण्यं is suggested; all mss. read °विषयाकारप्राबल्यं

३. M_1—पराङ्कुशस्सन्नाम्ना ।

* See *Mīmāṃsāparibhāṣā*, p. 23 :
तत्राङ्गत्वबोधकप्रमाणानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याभेदेन षट् ।

अत्र *"स उ श्रेयान्भवति जायमान" इत्यादिश्रुतिप्रसिद्धसर्वोपकारकभगवदवतारस्येव भागवताग्रेसरस्य शठरिपोरप्येतदवतारपरिग्रहलिङ्गेन तदव्यापारस्य दुस्सहाभिजनाद्यहङ्कारनिवर्तन[1]मुखेन जगदुज्जीवनैकप्रयोजनत्वं समर्थितम्। लिङ्गस्यापि वेदमूलानुमापकतया वैदिकशब्दप्रमाण एवान्तर्भावः। एवं लौकिकशब्दानामपि लौकिकशब्दाम्नायकतया लौकिकशब्दप्रमाण एवान्तर्भावः। लौकिकशब्दो यथा—

शठारे वाङ्मुखेनैव विधत्से भववारणम्।
[+]नखैस्समापनीया[2]र्थे कुठारैः[3] किं प्रयोजनम् ॥४८३॥

अत्र शठकोपस्य दुर्विभेदजगत्संसारवारणसुखसाध्यत्वेनखैरिति लौकिकशब्दः प्रमाणतयोपन्यस्तः। क्वचिच्छब्दप्रमाणकल्पनया चमत्कारः यथा—

जातोऽहं मनसो हरेरिति विधो किं कत्थसे तच्छ्रुते-
रर्थोऽयं मुरचन्द्रमाश्शठरिपोस्तच्चित्तसिद्धाकृतिः।
हे दोषाकर जन्म ते जलनिधेर्जम्बालगर्भान्तरा-
त्तद्विष्णोर्विमलं क्व मानसमिदं क्वाङ्गं तवाङ्काङ्कितम् ॥४८४॥

अत्र **"चन्द्रमा मनसो जातः" इत्येतदर्थिकायाः श्रुतेः शठवैरि-

---

१. M_1, M_3—°निवर्तक°

२. M_1—सपावनीलेऽर्थे; M_3—सपानीयेऽर्थे

३. M_1—कुमारैः

* *Ṛgveda* 3.8.4b.

* *Ṛgveda* 10.90.13a.

*+ Sanskrit form of the Telugu proverb "Goṭito poyedāniki goḍḍali enduku."

मुखचन्द्रविषयत्वं कल्पितम् । तथाभूततदव्याख्यानौचित्येन[1] मध्यस्थकवि-वाक्यमुपन्यस्तम् ।

अथार्थापत्ति निरूप्यते । अत्रेदं लक्षणम् ।

यत्रोपपत्तिरर्थस्यानुपपत्तौ[2] प्रकल्प्यते ।
तत्र संख्यावदिष्टा स्यादर्थापत्तिरलङ्कृतिः ॥४८५॥

यथा—

दीपिकैव शठकोप तावकी भारती निरवधिप्रभावती ।
अन्यथा तमसि देहिनां(कथं[3]) जायतेऽभिलषितार्थदर्शनम् ॥४८६॥

अत्र शठकोपभारत्यामनुपपन्नस्य[4] दीपिकात्वारोपरूपार्थस्यान्यथे-त्यादिनोपपत्तिप्रकल्पनादर्थापत्तिः ।

अथानुपलब्धिर्निरूप्यते । अत्रेदं लक्षणम् ।

उच्यतेऽनुपलब्धिश्चेन्नोऽर्थो यत्रोपलभ्यते ।

यथा—

आश्रितेषु शठारातेर्विद्यते नैव पातकम् ।
अस्ति चेदुपलभ्येत वाचि वा चरितेऽपि वा ॥४८७॥

अथ **सम्भवो** निरूप्यते । अत्रेदं लक्षणम् ।

उपपन्नत्वमर्थस्य सम्भवस्तत्र कथ्यते ।

---

१. This is the emended reading; all the mss. read तथाभूतद-व्याख्यान°.

२. उपपत्तिः is the emendation for उपपत्तेः

३. कथं is suggested; all the mss. leave space there.

४. अनुपपन्नस्य is the emendation for अनुपन्यस्य

यथा—

कृतमेतेन भोक्तव्यं शठारे नात्र चित्रता ।

किन्तु शोचामि ते क्षान्तिं[1] या स्याद्दासरदीपिका ॥४८८॥

अत्र कृतस्य भोक्तव्यत्वेनोपपन्नत्वोपादानात्सम्भवप्रमाणसिद्धोऽर्थो दर्शितः ।

अथैतिह्यम् ।

लोकप्रवादतोऽर्थस्य सिद्धिरैतिह्यमुच्यते ।

यथा—

अधमकलत्रत्वादपि[2] गुरुदासीत्वमेव मुख्यमिति ।

कथनादतो महान्तस्तव सदनाङ्गणभुजिष्यतामाप्ताः ॥४८९॥

अत्राधमकलत्रत्वादपीत्यादिकथनस्यानिर्दिष्टप्रर्वकप्रवादप्रवाहरूपता[3] प्रदर्शिता ।

*अथैषामलङ्काराणां यथासम्भवं क्वचिन्मेलने लौकिकालङ्काराणां मेलन इव चारुत्वविशेषसमुन्मेषान्नृसिंहन्यायेन[+] पृथगलङ्कारव्यवस्थितौ तत्प्रकारो निर्णीयते । तत्र ++तिलतण्डुलन्यायेन स्फुटावगम्यमानभेदानामलङ्काराणां मेलने संसृष्टिः, **क्षीरनीरन्यायादस्फुटभेदानामलङ्काराणां

---

१. क्षान्ति is the emendation for क्षान्तिः

२. अपि is the emendation for अधि.

३. M_1, M_3—°कलत्रादपि

* Cf. Ku. Ā., pp. 178-79

** See Ibid., pp. 22

\+ See Lau. Nyā., Part II, pp. 23 & 41.

++ See Ibid., p. 33.

